श्री

ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः प्रणम्य भगवत्पादान् श्रीधरादींश्च सद्गुरून् संप्रदायानुसारेण गीताव्याख्यां समारभे १ भारते सर्ववेदार्था भारतार्थश्च कृत्स्नशः गीतायामस्ति तेनेयं सर्वशास्त्रमयी मता २ कर्मोपास्तिज्ञानभेदैः शास्त्रं काण्डत्रयात्मकं अग्नेरूपासनाकाण्डात् तत्तृतीयो नातिरिच्यते ३ तदेवं ब्रह्मविद्विद्दुः वेदे यत्तदुपासते ३ निष्कलत्वेन वेद्यस्य ह्युपास्याद्भ्यनतीरिता ४ इयमष्टादशाध्यायी क्रमात् षट्त्रिकेन हि कर्मोपास्तिज्ञानकाण्डत्रितयात्मा निगद्यते ५ तत्र प्रथमं कर्मसु स्रोत्तस्कन्दादग्निरं दर्शतं ब्रुवन् सुधृतराष्ट्र उवाच धर्मक्षेत्र इति तत्र वेदे तेषां कुरुक्षेत्रं देवयजनमासेति कर्मकाण्डप्रसिद्धं कुरुक्षेत्रमन्यत् अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां

धृतराष्ट्र उवाच धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः मामकाः पाण्डवाश्चैव किमकुर्वत संजय १ संजय
उवाच दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा आचार्यमुपसंगम्य राजा वचनमब्रवीत् २ पश्यैतां
पाण्डुपुत्राणामाचार्य महतीं चमूं व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ३ अत्र शूरा महेष्वासा भीमार्जुने
समा युधि युयुधानो विराटश्च द्रुपदश्च महारथः ४ धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् पुरु

ब्रह्मसदनमित्यविमुक्ताख्यं ब्रह्मप्राप्तिस्थानभूतं कुरुक्षेत्रं अन्यत् ब्रह्मसदनत्वं चास्य अत्र हि जन्तोः प्राणेषूत्क्रममाणे रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवतीति वाक्यशेषेण व्युत्पादितं एतद्व्यावृत्त्यर्थं धर्मक्षेत्रे इति विशेषणं कुरुदेशान्तर्गतं हि धर्मक्षेत्रमेव न तु तेन ब्रह्मसदनं प्रवर्ग्यकाण्डे तस्य धर्मक्षेत्रत्वमात्रश्रवणात् तत्र समवेताः मिलिताः युयुत्सवो योद्धुमिच्छवः पाण्डवानां पृथग्ग्रहणं तेषु ममत्वाभावसूचनार्थं १ व्यूढं व्यूहरचनया स्थितं आचार्यं द्रोणं राजा दुर्योधनः राजाब्रवीदित्येव वक्तव्ये वचनपदेन संक्षिप्तं बहूर्थत्वादिगुणवत्त्वं वाक्यस्य सूच्यते द्रुपदपुत्रेणेति पूर्ववैरसूचनेन क्रोधोद्दीपनार्थं विशेषणं ३ महेष्वासाः महान्त इष्वासाः धनूंषि येषां ते युयुधानः सात्यकिः द्रुपदश्च महारथ एकः ४ धृष्टकेत्वादयः षट् ५

भ॰गी॰
टी॰
१

युधामन्युरुत्तमौजाः सौभद्रोऽभिमन्युः पंचद्रौपदेयाः प्रतिविंध्यादयश्चेति । अष्टौ च काराात् पांडवा घटोत्कचादयश्चेति प्रसिद्धा ग्रा
ह्याः सर्वेपि महारथा एव तल्लक्षणं तु एको दशसहस्राणि योधयेद्यस्तु धन्विनां शस्त्रशास्त्रप्रवीणश्च स वै प्रोक्तो मह
ारथः अमितान्योधयेद्यस्तु संप्रोक्तोतिरथस्तु सः रथस्त्वेकेन योद्धा स्यात तन्न्यूनोर्धरथः स्मृत इति ६ विशिष्टाश्च
ष्टाः निबोध बुध्यस्व मो वा दिकस्य परस्मैपदिनो बुधेरिदं रूपं संज्ञार्थं अस्मत्सैन्येपि शूराः संतीति ज्ञापनार्थं परे
षु प्रावल्यं दृष्ट्वा तवोत्साहभंगो माभूदित्यर्थः ७ विकर्णः स्वभ्राता सोमदत्तिर्भूरिश्रवाः जयद्रथपदस्थाने तथैव

युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ६ अस्माकं तु विशिष्टा ये
तान्निबोध द्विजोत्तम नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते भवान्भीष्मश्च कर्णश्च कृपश्च समितिं
जयः अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ८ अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः नानाश
स्त्रप्रहरणाः सर्वे युद्धविशारदाः अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितं पर्याप्तं त्विदमेतेषां बलं भीमा
भिरक्षितं १० अयनेषु च सर्वेषु यथाभागमवस्थिताः भीष्ममेवाभिरक्षंतु भवंतः सर्व एव हि ११

केति कश्चित्स्यात् ८ अन्ये शल्यकृतवर्मप्रभृतयः शस्त्राणि विदारकाणि खड्गादीनि प्रहरणानि केवलं प्रहा
र्याणि गदादीनि नानाविधानि येषां ते नानाशस्त्रप्रहरणाः ९ पर्याप्तं परितः आप्तं परिवेष्टितं पांडवसैन्यं हि
सप्ताक्षौहिणीपितेनास्मत्सैन्येन वेष्टयितं शक्यं न तु तदीयेनास्मदीयमित्यर्थः एवं च पर्याप्तमित्यस्य धारणे
यमित्यर्थः १० अयनेषु व्यूहरचनया सैन्यप्रवेशमार्गेषु स्वे स्वे स्थाने स्थिता यूयं मध्यस्थं भीष्ममेवा
भिरक्षंतु अस्य सेनापतेः चोपचल्पे सर्वापि सेना आकुलीभवेत् तस्य स्थैर्ये स्थिरा च भवेत् अतः स एव रक्ष्य इत्यर्थः ११

२

तस्य एवं वदतो दुर्योधनस्य संजयवाक्यमिदं सिंहनादमिति णमुलंतं तेन विजघेत्यस्यानुप्रयोगः कषादित्वात्सम्मूलका
षंकषतिस्मदेत्यादिवत् कुरुवृद्धो भीष्मः प्राग्विराटनगरादौ दृष्टप्रभावान्पांडवान्दृष्ट्वा राजो भयमाभूदिति शं
खं दध्मौ हर्षयुद्धोत्साहं जनयन् हेत्वर्थे शतृप्रत्ययः हर्षजननतार्थमित्यर्थः अध्म अन्यंतस्मिहेताः कर्मक
र्तरि प्रयोगः ७, १, १९ अथ वा स्थितान्भयोद्विग्नतया वेष्टुमुद्युक्तान् व्यवस्थितान्कपिध्वजपांडवपदात्यन्यो भीष्मध्वजे
तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् १२ ततः शंखाश्च भे
र्यश्च पनवानकगोमुखाः सहसैवाभ्यहन्यंत स शब्दस्तुमुलोभवत् १३ ततः श्वेतैर्हयैर्युक्ते महति स्यं
दने स्थितौ माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः १४ पांचजन्यं हृषीकेशो देवदत्तं धनंजयः पौंड्रं दध्मौ महा
शंखं भीमकर्मा वृकोदरः १५ अनंतविजयं राजा कुंतिपुत्रो युधिष्ठिरः नकुलः सहदेवश्च सुघोषमणिपुष्पकौ
१६ काश्यश्च परमेष्वासः शिखंडी च महारथः धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः १७ द्रुपदो द्रौपदे
याश्च सर्वशः पृथिवीपते सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक्पृथक् १८ स घोषो धार्तराष्ट्राणां हृद
यानि व्यदारयत् नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् १९ अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्क
पिध्वजः प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः २० हृषीकेशं तदा वाक्यमिदमाह महीपते सेनयोरुभयो
र्मध्ये रथं स्थापय मेच्युतः यावदेतान्निरीक्षेहं योद्धुकामानवस्थितान् कैर्मया सह योद्धव्यमस्मिन्रणसमुद्य
मे तोर्पचप्ररूपिते २१ हृषीकेशं सर्वेषामिंद्रियाणां प्रवर्तकत्वेन परचित्तज्ञं वाक्यमेवाह ननु कांचिदर्थमिति द्योतना
र्थं वाक्यपदं वाक्यमेवाह सेनयोरिति २१ रथस्थापनप्रयोजनमाह यावदिति कैः सह मया योद्धव्यं मया सह वा कै
र्योद्धुमिति उभयत्रापि सहशब्दसंबंधः केवलं नैते न पतंते मया वा के जेतव्या इत्यालोचनार्थमित्यर्थः २२ योत्स्य
मानान्न तु शांतिकामान्यतो दुर्बुद्धेः प्रियचिकीर्षितिने तेषामपि तत्तुल्यत्वं सूचितं २३

महाभयत
टी॰ भी॰
२

रथोत्तमं स्थापयित्वाऽवाचेति द्वयोः संबंधः २४ महीक्षितां पृथिवीश्वराणां २५ पितॄन् पितृव्यादीन् भूरिश्रवःप्रभृतीन् पितामहान् भीष्मादीन् मातुलान् शल्यादीन् भ्रातॄन् दुर्योधनादीन् पुत्रान् लक्ष्मणादीन् पौत्रान् लक्ष्मणादिपुत्रान् सखीन् अश्वत्थामादीन् २६ सुहृदः कृतवर्मादीन् २७ कृपया स्नेहेन स्वजनमिति विशेषणेन दर्श्यते २८ सीदंति

संजय उवाच एवमुक्तो हृषिकेशो गुडाकेशेन भारत सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमं २४ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितां उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति तत्रापश्यत्स्थितान् पार्थः पितॄनथ पितामहान् आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखींस्तथा श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि तान्समीक्ष्य स कौंतेयः सर्वान्बंधूनवस्थितान् २७ कृपया परयाविष्टो विषीदन्निदमब्रवीत् अर्जुन उ॰ दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितं २८ सीदंति मम गात्राणि मुखं च परिशुष्यति वेपथुश्च शरीरे मे रोमहर्षश्च जायते गांडीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ३० निमित्तानि च पश्यामि विपरीतानि केशवः न च श्रेयोनुपश्यामि हत्वा स्वजनमाहवे ३१ न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च त इमेवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ।। किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च त इमेवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ३३ आचार्याः पितरः पुत्रास्तथैव च पितामहाः मातुलाः श्वशुराः पौत्राः श्यालाः संबंधिनस्तथा एतान्न हंतुमिच्छामि घ्नतोपि मधुसूदन अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ३५

निश्चेष्टानि भवंति रोमहर्षो रोमांचः २९ ३० निमित्तानि लोकक्षयकराणि भूमिकंपादीनि ३१ ३३ प्रयत्नाद्धतिश्यालशब्दे इत्यादिः विजामातृरूनवोढा स्यालादिति मत्रवर्णात् स्याला जामाताव पेतीति वा स्यं सूर्यस्यतेरिति पारकः ३४ हंतुं इच्छापि मम न भवति किमुत हंतुं त्वामित्यर्थः महीकृते पृथिव्यर्थे ३५ ६

शि॰
२

आततायिनः अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैव षडेते आततायिनः आततायिनमायान्तं हन्यादे
वाविचारयन् नाततायिवधे दोषो हन्तुर्भवति कश्चनेति यद्यप्येवं तथापि एतान् हत्वा अस्मान् पापमेवाश्रयेत् आतता
यिवधोऽर्थशास्त्रविहितः न हिंस्यात्सर्वभूतानीति धर्मशास्त्रं तच्च पूर्वस्मात्प्रबलं यथोक्तं याज्ञवल्क्येन स्मृत्यो
र्विरोधे न्यायस्तु बलवान् व्यवहारतः अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिरिति अस्मान् हत्वा एतानाता
ततायिनः पापमेवाश्रयेत् इत्यपरा योजना तथा च एतान् वा अस्मद्वधेन तुष्यन्तु न तु वयमेतेषां वधेन तुष्याम
इति भावः ३६ ३८ ननु आहूतो न निवर्तेत द्यूतादपि रणादपीति विजितं क्षत्रियस्येति च युद्धं दानं वृत्तिः हिंसया
निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः ३६ तस्मान्ना
र्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान् स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ३७ यद्यप्येते न पश्यन्ति लोभो
पहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे च पातकं ३८ कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुं कुलक्ष
यकृतं दोषं प्रपश्यद्भिर्जनार्दन ३९ कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः धर्मे नष्टे कुलं कृत्स्नमध
र्मोऽभिभवत्युत ४० अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकर ४१
यदि तु क्षत्रियस्येष्टात् कथं युद्धान्निवृत्तिमिच्छसीत्याशंक्याह कथमिति सा हि लोभमूलिका स्मृतिः कुलक्षयदोषविधि
नाबाध्यते यथा औदुम्बरीं स्पृष्ट्वोद्गायेदिति स्पर्शेन विधिना विरुद्धा सती औदुम्बरी सर्वा वेष्टयितव्येति सर्ववेष्टनस्मृतिर्बा
ध्यते लोभमूलकत्वान्न च तु न हि विधिमात्राद्यत्किंचित्कर्तव्यं श्येनादीनां अधर्मरूपाणामप्यनुष्ठेयत्वापत्तेः तस्मा
द्यत्फलतो न दुष्यति तदेव विहितं धर्मरूपमनुष्ठेयं यथोक्तं फलेनापि च यत्कर्म पापमनानां न वध्यते केवलप्रीतिहे
तुत्वात् तद्धर्म इति कथ्यते इति श्येनादिवत्पापानुबन्धित्वान्न युद्धं स्यान्यमेवेत्यर्थः ३९ प्रणश्यन्तीति अनष्टानां कुलवृ
द्धानामभावान् अवशिष्टबालादिरूपं वंशं धर्मलोपात् अधर्मोऽभिभवति ४० दुष्टासु पुत्रा अपि वर्णेन त्वेपासौ नास्य ४१

म.भा.
गी.टी.
१२

कथं तर्हि जामदग्न्येन रामेण क्षत्रियेषु हतेषु तत्स्त्रियः पुनः पुनः ब्राह्मणेभ्यः पुत्रानुत्पादयामासुरिति तथा स्थापयते कथं ध्वत
राष्ट्रादीनां प्रसंकरजत्वमित्याशङ्क्याह पतन्तीति हि शब्दो वैदिकीप्रसिद्धिं द्योतयति सा च न ह्यग्रे अन्यस्माज्जातमस्तीति श्रु
तिः अन्यस्माज्जातं शेषोपत्यं नास्तीति तदर्थः अन्योदर्य्यो मनसापि न मंतव्यो ममायं पुत्र इति यास्कवचनाच्च ये यजामहे र
तिस्मात्पुनर्वयं स्मतेव पेय जामहे इत्यर्थकात् दृश्यमानस्य पुत्रादेः संशयग्रस्तत्वात् पंम मपि तेव्वेति निश्चयस्य दुःसाध्य
त्वात् अत्रश्रेयोहमस्मि सन्यजे ब्राह्मणोर्थवादश्च न चैते ब्राह्मणास्मो वयमब्राह्मणा वेति तस्माद्धोजपतेरेव पिंडादिप्राप्तिर्न
तु क्षेत्रपतेरिति लुप्तपिंडोदकक्रियत्वाद्वंश्यपावित्र्यणा यातो भवति ते च तत्पुत्रस्मृति स्तु इह लोके वंशस्थापनमात्र पत्तन
तं तेन क्षेत्रपतेः कश्चिदामुष्मिक उपकारोस्ति उदाहृत स्मृति विरोधात् अयं च संकरोस्माभिः स्वयं कृतः अश्वे च वंश्यप्रम
शंकरो नरकायैव कुलघ्नानां कुलस्य च पतन्ति पितरो ह्येषां लुप्तपिंडोदकक्रियाः ४२ दोषैरेतैः कुलघ्नानां वर्णसंक
रकारकैः उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ४३ उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन नरके निय
तं वासो भवतीत्यनुशुश्रुमः ४४ अहो बत महत्पापं कर्तुं व्यवसिता वयं यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः
यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः धार्त्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ४६ संजय उ० एवमुक्त्वार्जुनः
संख्ये रथोपस्थ उपाविशत् विसृज्य सशरं चापं शोकसंविग्नमानसः ४७ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्र
ह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादो नाम प्रथमोध्यायः १ संजय उवाच तं तथा कृप
याविष्टमश्रुपूर्णाकुलेक्षणं विषीदन्तमिदं वाक्यमुवाच मधुसूदनः १
स्मान्न विधेय एवेति भावः ४२ एतदेव विवृणोति द्वाभ्यां दोषैरिति ४३ ४४ ४६ संख्ये संग्रामे भीष्मपर्वण्यार्ष्यप्रकाशे भगवद्गीता
सु प्रथमोध्यायः १ अर्जुनेयुद्धादुपरते मत्पुत्राणामकंटकं राज्यं प्राप्स्यतीत्याशावतो राजानं प्रति संजय उवाच तं तथेति तमर्जुनं
तथा स्वजनान्हत्वा कथं सुखिनः स्याम माधवेत्युक्तप्रकारेण कृपया स्नेहेन न तु दयया परदुःखप्रहाणेच्छारूपया तस्याः पर
दौर्बल्यनिश्चयानंतरमाविर्भावात् अर्जुनेयदि वा नो जयेयुरिति स्वपराजयमाशंकमाने दुर्बलत्वाद्धीनेव दद्ष्टत्वानर्जनो विषीदन्निति स्ने
हातिशयसूचकवाक्यशेषविशेषणाभ्यामाविष्टं व्याप्तं विषीदन्तं सीदन्ति मम गात्राणीत्यादिनोक्तरूपं विषादं प्राप्नुवन्तं इदं वक्ष्यमा ३

अर्जुनं उद्बोधयन् श्रीभगवानुवाच कुत इति कश्मलं लं वै कलंकं विषमे युद्धसंकटे अनार्यैर्भीरुभिर्जुष्टं सेवितं न तु श्लाघ्यैः शूरैः अनार्यैर्जुष्टमित्यर्थः यद्वा अनार्यैर्जुष्टमिति विग्रहो दर्शितः। ततः प्रश्नाद्यो विषय दत्युक्तमदोषाद्दुर्पत्ते अत एवास्वर्ग्यमकीर्तिकरं च हे अर्जुन त्वदभ्युदयस्य भवतो नैतद्युक्तमिति भावः २ तदेवाह क्लैब्यमिति क्लैब्यं निर्वीर्यत्वं न च शक्तोऽस्य वस्यामिति युक्तोरूपं मा गाः नैतत्त्वयि महादेवप्रतिभटे युक्तं अतः क्षुद्रं तुच्छं हृदयस्य दौर्बल्यं तत्त्ववेदौर्बल्यं न तु शक्तिसहायाद्यभाव कृतं तत् त्यक्त्वा उत्तिष्ठ युद्धाय परंतप शत्रुतापन ३ ननु शत्रवो वा स्वभावदुष्टा वा तापनीयाः न तु वंधवाः साधवश्चेत्यर्जुन उवाच कथमिति मधुसूदनारिसूदनेति संबोधयन् त्वं वापि दुष्टानेव शत्रून् तापयसि नतापयतः कथं महं दुष्टौ गुरू च भीष्मद्रोणौ जहातीति वक्तुमयुक्तमिति सूचयति

श्रीभगवानुवाच कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुनः २ क्लैब्यं मा स्म गमः पा
र्थ नैतत्त्वय्युपपद्यते क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतपः ३ अर्जुन उवाच कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदनः ४ गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके हत्वार्थका
कामांस्तु गुरूनिहैव भुंजीय भोगान् रुधिरप्रदिग्धान् ५

समानार्थकमिदं संबोधनद्वयं वक्तुः शोकेन विह्वलत्वात् तत्र पौनरुक्त्यदोषावहमित्यन्ये इषुभिरिति ताभ्यां महत्वादि वाचापि योद्धुमशक्यं किमुत वाणैरिति भावः ४ ननु युद्धे धर्मोपि गुरूणामपि वधः श्रेयानित्याशंक्याह। गुरूनिति यद्यपि लब्दुक्तं प्रशस्तमेव तथापि महानुभावान् गुरून् अहत्वा भैक्ष्यमपि भोक्तुं श्रेयः प्रशस्तं नरकावंतं हि गुरूं तत्कालेदुर्योधनादीनेव दुष्टान् न जहात्याशंक्याह अर्थकामानिति धनार्थिनो गुरवो वश्यं दुर्योधनसाहाय्यं करिष्यंतीति तेन न तद्वधो विप्रशस्त एवेत्यर्थः तु शब्दः पक्षांतरोपन्यासार्थः इहैव न तु परलोके भुंजीयेति संप्रश्ने लिङ् गुरून् अहत्वा भैक्ष्यं श्रेयः उत हत्वा भोगसंपादनं श्रेय इति संप्रश्ने स्वपक्षमेवात्यपक्षे दूषणमाह रुधिरप्रदिग्धानिति ५ ॥

एवं तर्हि भैक्ष्यमेव वने श्रेय इत्याशंक्याह न चैतदिति यद्यप्युक्तं विप्रस्य भैक्ष्यमेवेष्टं तथापि नः अस्माकं क्षत्रियाणां भैक्ष्यभोग
योर्मध्ये कतरन्नो गरीय इति वयं न विद्मः ननूक्तं युद्धमेव गरीय इति तत्राह यद्वेति यद्वा वयं जयेमैव शत्रून् यदि वा नो
स्मान् शत्रव एव जयेयुः इदमपि न विद्मः अन्यपक्षे पुनर्मरणमप्रार्थितं भैक्ष्यमेव वा पद्यत इति भावः ननु महत्यपि संशये सति
तव जय एव निश्चितमत आह यानेवेति इष्टनाशरूपो जयोऽपि पराजयरूप एवेत्यर्थः यत्तु निश्चितेऽपि भैक्ष्यश्रेयस्त्वे पुनर्युद्ध
भैक्ष्ययोः कतरच्छ्रेय इति संशयो नोचितः अतो नः अस्माकं मध्ये कतरत् सैन्यं गरीय इति व्याख्येयमिति तदसत् धर्मसंमू
ढचेता इति वाक्यशेषादुक्तसंशयस्यैवोचितत्वात् सैन्यगरीयस्त्वसंशयेनैव जयसंशये अन्यथासिद्धे अन्यतरसंशयवैय

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धा
र्तराष्ट्राः ६ कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्य
स्तेऽहं शाधि मां त्वां प्रपन्नं ७ न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणां अवाप्य भूमावसु
पत्नमृद्धं राज्यं सुराणामपि चाधिपत्यं ८ संजय उवाच एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः न योत्स्य इ
ति गोविंदमुक्त्वा तूष्णीं बभूव ह ९ तमुवाच हृषीकेशः प्रहसन्निव भारत सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः १०

र्थ्यान्न विशेषाध्याहारदोषाच्च ६ उक्तसंशयवानेव पृच्छति कार्पण्येति कार्पण्यं दीनत्वं स्वभावः शौर्यं तेजो धृतिर्दाक्ष्यमित्या
दिना वक्ष्यमाणलक्षणः शेषं स्पष्टं ७ ननु क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतपेति युद्धमेव श्रेय इत्युक्तं किं पुनः पृच्छसीत्य
आह न हीति बंधुनाशनिमित्तः शोको राज्यलाभेन वा न निवर्तयिष्यत इति युद्धादन्यं कंचित् निवृत्तिहेतुं शमोपायं ब्रू
हीत्याशयः अत्रार्जुनविषाददर्शनेन ब्रह्मविद्याधिकारिविशेषणं भैक्ष्यचर्यादि इहामुत्रार्थफलभोगविरागश्च दर्शितः
८ ९ तमिति स्फुटोपमम् एवं वदन्तीति प्रहसन्निदं वक्ष्यमाणं १० ॥ ॥

अर्जुनस्य देहनाशे आत्मनाशधीः स्वधर्मे युद्धे चाधर्मधीरिति मोहद्वयं तत्राद्यं ब्रह्मविद्यास्त्रभूतैर्विंशत्या श्लोकैरपनि
नीषन् श्रीभगवानुवाच अशोच्यानन्वशोचस्त्वमिति जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति श्रुतेः देहादु
पाधिनाशेप्यात्मनाशस्याहितत्वेन अशोचनीयान् भीष्मादीनन्वशोचः कथमेते गुरवो मया हंतव्याः कथं वा तै
र्विना जीविष्यामीति शोकं कृतवानसि एवं मूढोपि त्वं प्रज्ञावादान् शब्दान् नरके नियतं वासः पतंति पितरो ह्येषा
मित्यादीन् भाषसे परं न प्रज्ञावानसि तत्र हेतुः गतासूनिति गतासून् गतप्राणान् देहान् नानुशोचंति प्रसुते निर्हरंत्ये

श्रीभगवानुवाच अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भा
षसे गतासूनगतासूंश्च नानुशोचंति पंडिताः ११ ॥

व एतेन प्राण एव द्रष्टा न तु देहः तथा च श्रुतिः प्राणो ह पिता प्राणो माता प्राण आचार्य इत्यादिः अत एव स प्राणेनेतानस्म
मयं तं न पित्रादिहंतात्वमसि धिक्त्वामिति वदंति उत्क्रांतप्राणान् दहन्तमपि नैव वदंतीति लोकवेदप्रसिद्धिः तस्मादात्मा
देहादन्यः चेतनत्वात् व्यतिरेकेण घटवत् यदि देहश्चेतनः स्यात् मृते पितरि चैतन्यमुपलभ्येत तस्माद्देहनाशे ना
त्मनाशमन्वानो मूर्ख एवासीत्यर्थः यत्तु प्रज्ञानां पंडितानां च वादान् वक्तुमयोग्यान् भाषसे इति तार्किक व्याख्या
नं तन्न अहीधीयजो दुर्लभत्वात् विशेषाध्याहारसापेक्षत्वाच्चोपेक्ष्यं ११ ॥

म॰ भा॰
भी॰ टी॰
५

ननुदेहादन्योपिदेहनाशेननश्यतांकोशकारइवकोशनाशेनेतितत्राह नत्वेवाहमितित्वमहमिमेचसर्वेऽनादयोनित्याश्च श्चेत्यर्थः जातुकदाचित्अहंनआसंइतिनअपितुआसमेवनत्वंनासीरितिनअपितुआसीरेवइमेजनाधिपाःराजानस्तदुपलक्षणंसर्वस्यजंतुजातस्यनासन्नितिनअपितुआसन्नेवेतिकोनअनादित्वादनंतत्वमप्याहनचेतिनभविष्यामइतिनैवकिंतुसर्वेभविष्यामएवननुदेहस्यानात्मत्वेकथंतस्योत्पायंपाउयतइतिचेत्तद्देहतदभिमानमात्रादितिब्रूमः यद्यपिपक्षःपरशरीरेक्रियान्तितदातस्योत्पादेहपतिर्नबाध्यते तस्यतदानींदेहाभिमानाभावात्पक्षस्तुबाध्यतेऽभिमानसत्वादितिलोकेप्रसिद्धंकिंचप्राचीनकर्मव्यतिरेकेणजीवनंनोपपद्यतेकृतहानाकृताभ्यागमप्रसंगात्वृक्षादिष्वपिप्राक्कर्मास्तीत्यनुमेयंस्थावरजीविकाप्राक्कर्मपूर्विकात्वात्पाकादिक्रियापूर्वकास्मदादिजीविकावत् अपि

नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः नचैवनभविष्यामःसर्वेवयमतःपरं १२ ॥

चक्रियाभेदेविनानकार्यवैचित्र्यंदृष्टंघटशरावोदंचनादिषुतद्वदिहापिसुखदुःखादिवैचित्र्यंप्राक्कर्मवैचित्र्यात्किंच पतद्यासद्योजातस्यगोवत्सस्यस्तनपानादौप्रवृत्तिः जंतुमात्रस्यमरणत्रासश्चप्राग्भावीयानुभवजनितसंस्कारजन्योभोजनादिप्रवृत्तिचोरत्रासादिवदित्यतोस्तिप्राचीनकर्मअपिचलौकिकशास्त्रप्रसिद्धमेतत् यथादेवदत्तःस्वशरीरेकंटकवेधेनविद्यतेएवंशत्रुकृतायांदेवदत्तप्रतिमायांकंटकेनविद्धायांदेवदत्तोव्यथतेतत्रव्यथाहेतुर्नीतरंधातुवैषम्यंनापिबाह्यंकंटकवेधादिकिंतुकेवलंप्राक्कर्ममात्रंएवंचबीजांकुरन्यायेन कर्मतज्जन्यसंस्कारपरंपरयाअनादिःसंसारइतिदेहनाशादात्मनाशोस्तीतिनभीष्मादयःशोचनीयाअत्रपूर्वस्मिन्नस्मिंल्लोकेआत्मनोदेहादन्यत्वममृतत्वंगतास्तन्देहानितिविशेषणेनअत्रतुसत्स्मिन्शरीरविशिष्टस्यात्मनोव्यवहारदृष्ट्यानित्यत्वंसाधितमितिभेदः १२

यद्यप्येवं तथापीष्टदेहवियोगजः शोको भवत्येवेत्याशंक्याह देहिन इति देहः स्थूलः सूक्ष्मो विद्यतेऽस्य स देही चिदात्मा त
स्य यथास्मिन्स्थूलशरीरे कौमाराद्यवस्थासु देहभेदेपि एक एवाहं बाल्ये आसमिदानीं वृद्धोस्मीत्यभेदप्रत्यभिज्ञानादेकं बाला
दिशरीरेभ्योन्यत्वं च व्याहतेभ्यो नेहत्वं भिन्नो कुसुमेभ्यः सूत्रमेवेतिन्यायादेवं देहांतरप्राप्तिरपि स्थूलाच्छरीरादन्येषां लिंग
शरीराणां सूक्ष्माणां स्थूलशरीराकारिणां प्राप्तिः अयमर्थः यथा एकमपि स्थूलं शरीरं कौमाराद्यवस्थाभेदादनेक
रूपं एवं नित्यमपि लिंगशरीरं प्राक्तनकर्मभेदात्सुरनरतिर्यगाद्यवस्थाभेदादनेकं भवति तत्रोक्तन्यायेन स्थू
लादिवत्सूक्ष्मादपि शरीरादात्मा विविक्त एव एवं च शोकादिधर्मिणो लिंगादपि विभिन्नस्य तवेष्टवियोगजः शो

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा। तथा देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति १३

कोपि न युक्तः अत एव तत्र तस्मिन्विषये धीरो न मुह्यति आभिमानिकौ शोकमोहौ देहद्वयाभिमानत्यागात् धीरं न
बाधेते अतस्त्वमपि धीरो भवेति भाव एवं श्लोकयोर्गतास्त्वं नेति वयमिति च बहुवचनं उपाधिभेदाभिप्रायं अत्र
तु देहिन इत्येकवचनं उपाधेयचिदात्मैक्याभिप्रायमिति ज्ञेयं तथा च श्रुतिरेकस्यात्मन औपाधिकं भेदमाह यथा
ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमा
त्मेति क्षेत्रेषु वक्ष्यमाणलक्षणेषु स्थूलसूक्ष्मदेहद्वयात्मकेषु एको देवः सर्वभूतेषु गूढः सर्वव्यापी स
र्वभूतांतरात्मेति च एकत्वोक्तेर्विभुत्वमप्यस्यास्ति ह्यतेन देहादीनामभिमानिनामविभूतां च परामिमत्मात्मत्वं प्रत्या

ननु आत्मनो लिंगशरीरादन्यत्वेपि अहं दुःखीत्याद्यनुभवात् दुःखादिधर्माश्रयत्वं दुर्वारं ततश्च भीष्मादिवंधुवर्गनाशे सति दुः
खसंबंधो भवत्येवेत्याशंक्याह मात्रास्पर्शा इति मीयंते विषया आभिरिति मात्रा इंद्रियवृत्तयः पद्मादश प्रत्तामात्रादयः दश
भूतमात्राः नामादयः कोषीतकि प्रसिद्धा इंद्रियविषयरूपाः ग्राह्याः तासां स्पर्शा विषय विषयभावेन संबंध इति व्याख्ये
यं यद्वा मात्रा प्रमाता सह स्पर्शाः विषयेंद्रियसंबंधाः स्पर्शशब्दस्य च नंद्यादित्वं स्पर्शात्मत्वाद् वहिर्वा घ्यानित्यत्र दृष्टं त
त्र स्पर्शपदेन द्वयोः विषयेंद्रिययोरपि लाभः तेन प्रमातुः प्रमाणद्वारा प्रमेयेण सह संबंधाः सर्वे शीतोष्णादिवदागमापायि
न उत्पत्तिविनाशशीला अत एवानित्याश्च तद्वदेव सुखदुःखदाश्च अतस्तान् तितिक्षस्व सहस्व हे कौंतेय भारत तेषु तम
वेश्यत्वेन धीरत्वमस्य सहत्व च प्रतिप्रमातृत्वादिरनर्था हि सुप्तिसमाधिग्रहावेशादिषु भावाज्जाग्रत्स्वप्नादौ भावश्चकादा

मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः आगमापायिनोऽनित्यास्तांस्तितिक्षस्व
भारत १४

चित्कदया आत्मनि प्रतीयमानोपि रज्जुरगादिवन्मिथ्याभूतः सन् तद्धर्मत्वं भजते पदयत्राभेदेन कदाचिद्भाति कदाचिन्नेते
तत्राध्यस्त रज्ज्वामिव सर्पः प्रमात्रादिश्च प्रतीतिप्रत्यग्भेदेन कदाचिद्भाति अतो मिथ्येति निश्चितं तेन प्रतीतिप्रमातृसं
बंध एव नास्ति सत्यमिथ्यावस्तुनो वास्तवसंबंधायोगात् प्रमातृधर्माणां दुःखादीनां तु प्रतीतिसंबंधो दूरापेत एवेति कथं
तर्ह्यात्मनि दुःखित्वप्रत्ययः तत्तदुपाधितादात्म्यस्यादिति ब्रूमः अत एव जाग्रति दृष्टं दुःखं स्वप्ने नानुवर्तते स्वप्ने दृष्टं
वा जाग्रति न दृश्यते तथा चैव श्रुतिः स यत्तत्र पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इति कामः संकल्पो
विचिकित्सेत्यादिश्रुतिरेतत्सर्वं मन एवेति प्रभेदनिर्देशात् कामादिसर्वविकारोपादानत्वं मनस एवाहतस्मात् स्वप्नद्वारमा

तितिक्षाफलं प्रपञ्चयन्नमेवेत्याह यं हीति एते मात्रास्पर्शाः प्राक् व्याख्याता एता त्रिविधा अपि यं जाग्रति स्वप्ने संप्रज्ञातसमाधौ वा न व्यथयन्ति स्वस्थानात् प्रच्यावयन्ति पुरुषं पुरुषश्रेष्ठ पुरि वसतीति पुरुषस्तं पुरश्च कर्मेन्द्रियादि खलु पंच तथा पराणि ज्ञानेन्द्रियाणि मनआदि च तुष्टयं च प्राणादिपंचकं मध्ये विषयादिकं च कामश्च कर्म च तमः पुनरष्टमी पूरिति प्रसिद्धाः यद्वा स्थूलसूक्ष्मोपाधिमध्ये एवं इतरासां अन्तर्भावात् अत्र अष्टपुरिति तमेव ग्राह्यं तेन कारणोपाधेरपि आत्मनो विविक्तत्वदर्शिनं पुरुषर्षभेति त्वमप्येतद्दर्शनं भवितुं योग्योसि सर्वपुरुषश्रेष्ठत्वादिति सूचयति उपाधित्रयत्यागादेव समे सुखदुःखे यस्य तं न हि समाधिस्थस्य सुखाय दुःखाय वा अवीतो ह्यस्य शोभवत इति पुनः समस्य समदुःखसुखत्वे धीरं ध्यायिनं योगिनं न व्यथयन्ति सोमृतत्वाय कल्पते योग्यो भवति १५ ननु सुषुप्तिसमाध्यादौ त्यक्तोपाधेरात्मनः समदुःखसुखत्वेपि सोपाधिकदशायां तत्प्रायः पिंडस्य दग्धत्वमिव तस्य दुःखित्वं दुर्वारं उपाधिश्च मूलप्रकृतेर्वापि कार्यं प्रमात्रारूप इति तत्सत्त्वेन निर्मूलोच्छेदमहत्य ततः सोमृतत्वाय

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ । समदुःखसुखं धीरं सोमृतत्वाय कल्पते १५ नासतो
विद्यते भावो नाभावो विद्यते सतः । उभयोरपि दृष्टोन्तस्त्वनयोस्तत्त्वदर्शिभिः १६ २६

कल्पत इत्यनुपपन्नमित्याशंक्याह नासत इति प्रमात्रादेरागमापायित्वेन कादाचित्कत्वात् रज्जुरगादिवदसतः भावः सत्ता कालत्रयेपि नास्ति अयमर्थः प्रमात्रादिर्मूलाज्ञानेन चिदात्मनि कल्पितः मूलाज्ञानस्य चात्मज्ञानेन निवृत्तौ कारणाभावात् पुनः प्रमात्राद्युद्भवो नास्तीति निष्प्रत्यूहममृतत्वं ज्ञानान्न सिध्यतीति नन्वप्रतीतिमात्रात् प्रमात्रादेर्मिथ्यात्वोपगमे आत्मनोपि सुषुप्त्यादावप्रतीयमानत्वाविशेषान्मिथ्यात्वमस्त्वित्याशंक्याह नाभावो विद्यते सत इति सद्वस्तुनः अभावो सत्त्वं कदाचिदपि न विद्यते सुषुप्त्यादावपि अश्रुतयोः सुखाज्ञानयोः सुखमहमस्वाप्सं न किंचिदवेदिषमिति उत्थाने परामर्शदर्शनात् सदन्नभवमंतरेण तयोः परामर्शासंभवात् अतः सतोः सत्त्वं नास्ति स्मृतिरपि सुप्तौ केवलं प्रमात्रायभावं दर्शयति नित्यत्वेन चाह य ईक्षते तत्र पश्यति यत्र पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोन्यद्विभक्तं यत्पश्येदिति यदि प्रमात्रा

दिसिद्धिस्तर्हि सतोर्थस्य सुप्त्यादावदर्शनं सान्निध्याभावाद्दृष्टं दूरस्थोपाद्यावत्क्षयं नाद्यः आत्मदृष्टं नष्टस्वभावस्यात्म
त्रसद्भावकल्पनायोगान्नान्त्यः उदाहृतदृयाश्रितत्वेवतान्निषेधात्तस्मादुभयोरसत्यत्वेन वासाम्यं दुर्वचनं ननु सति
आकाशादेः क्वचिद्देविदेशे कालेचाभावो यद्यपि नास्ति तथापि सत एव परमाण्वादेर्घटान्ते रभावोस्ति प्रागसतो
पिघटादेर्भावश्च दृष्टः तत्कथमुच्यते नासतो विद्यते भावो नाभावो विद्यते सत इत्याशंक्याविद्वद
नुभवेनानुरस्यति उभयोरपीति अंतोयाथात्म्यं यथास्वप्ने नभः कुंभरज्जुरगादयो
नित्यत्वानित्यत्वसत्यत्वादिधर्मोपेतत्तया निश्चिता अपि प्रबोधेनासत्यं तेते
घटज्ञाग्रद्दृष्टा अपि तेते तत्त्वज्ञानेन बाध्यते ननु जाग्रद्वासनावशात्स्वप्न
नभआदेर्नित्यत्वादिनिश्चयो भ्रम इति चेत् अनादिका
लप्रवृत्तप्रागभावीयसंस्कारवशात् जाग्रन्नभआदावपि स
भ्रम इति तुल्यं ननु स्वरूपसदेव रज्जनादिकं गगनादिकं च तुल्यपादावध्यस्य
तेन त्वसतत्वाश्रंगादिकं गगनादिकं तु तद्वतीत्या स्वरूपेण असदपि कथमात्मन्य
ध्यस्यत इति चेत् अध्यासे हि पूर्वानुभवमात्रमपेक्ष्यते न तु त्वनुभूतस्य स्वरूपेण सत्वमपि दर्पणे
प्रतिबिंबिते गगने पि नेत्याध्यासदर्शनात् न च गगनेनेत्यं स्वरूपेण सत्वमस्ति अध्यस्य चान्यत्राध्यस्यते तस्मादु
भयपरंपरायाः संभवात्स्वप्नदृष्टैरिवास्माभिरदृष्टमपि सदसतोर्याथात्म्यं प्रबुद्धैर्दृष्टं शांकमेव तथा च श्रुतयनेह
नानास्ति किंचन अस्तीत्येवोपलब्धव्यः अन्नोन्यदार्तमित्यादयः अनात्मनोऽसत्वमात्मनश्च सत्वं प्रतिपादयंतीत्य
वेसतोत्मानेनासतोवाधात्केवल्यं सिध्यतीतिभावः १६

यस्याभावो नास्ति तस्य सतः सत्वे किं मानमित्याशंक्याह अविनाशीतितच्छब्देन प्रकृतं सत् परामृश्यते येन सता इदं सर्वं वियदा
दिभ्रमस्य तंत्या प्रघटः सन् पटः सन्निति सर्वस्य सदभेदानुभवात् यथा घटो भ्रमस्तेषामवामृदिति घटादीनां मृदभेदानुभवान्मृदुपा
दानकत्वबोध्यं ननु मृदुत्सदपि किं विदाकारवद्भवतीत्याशंक्याह अविनाशी तितत्सत् अविनाशि विद्धि अयमर्थः एवं व
स्यापरित्यागोऽत्र विनाशः मृद्धि पिंडाकारतां त्यक्त्वा घटी भवति अतः सा विनाशशीला विकारधारारूपत्वात् ब्रह्म तु न तथा
किं तर्हि रज्जुवत् स्वरूपमविनश्यदेव कार्याकारं भवति स्वकीयेन सत्तास्फुरणेन कार्यं यपयति अतो विनाशि तथा च श्रुतयः अ
प जायमानो बहुधा विजायते जात एव न जायते कोन्वेनं जनयेत्पुनः अजायमानः जन्माख्यं विकारमलभमानो विजा
यते वियदादिरूपेण विभवति तथा लोके दृष्टो जातो घटादिकार्यं परमार्थः दृष्टो न जायते परिणाममुपादानस्याभावा

अविनाशि तु तद्विद्धि येन सर्वमिदं ततं विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ७ ॥

२

त्मृदादेस्तु स्वाश्रमृदादिवत्तुच्छत्वात् अत एवैनं घटादिकोनुजनयेत् कोपि कृतर्हि समासत इति चेत् रज्जूरगादिवदिति द्वैत
रमेतत् तथा प्राणा वै सत्यं तेषामेष सत्यं तस्य भासा सर्वमिदं विभातीति सतः सत्यत्वेन प्राणोपलक्षितस्य प्रपंचस्य सत्यत्वं स
तो भानमेव प्रपंचस्य सत्यत्वं सतो भानमेव प्रपंचस्य भानमिति तथा च प्रपंचगते सत्तास्फूर्ती सतः सत्वे प्रमाणमित्यर्थः श्रुतिश्च
अन्नेन सोम्य शुंगेनापो मूलमन्विच्छ अद्भिः सोम्य शुंगेन तेजो मूलमन्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छ सन्मूलाः सोम्ये
माः प्रजाः सदायतनाः सत्प्रतिष्ठा इति सतो जगदुपादानत्वं कार्यलिंगेन दर्शयति सतो विनाशित्वं च विनाशहेत्वभावादित्याह
विनाशमिति न कश्चित्कर्तुमर्हतीति नापचीयत इत्यव्ययं एतेन सर्वविकारशून्यस्याविनाशो नास्तीत्यर्थः अपक्षयो हि जन्मादिविकार
वत एव भवतीति स एवात्र सर्वविकारोपलक्षणतया बोध्यः न कश्चिदित्यनेन तदन्यस्य विनाशहेतोरभावो दर्शितः द्विती

एवं सत आत्मनो नित्यत्वं असतो देहादेरनित्यत्वं चोक्तमुपसंहरन्नेनं युद्धाभिमुखं करोति अंतवंत इति यद्वा नासतो विद्यते भाव इति असतां देहानां कालत्रयेपि सत्वं नास्तीति परमार्थदृष्ट्या उक्तं तथापि तां दृष्टिमप्रतिपद्यमानस्य नरकादिभयमनुरुध्यमानस्य व्यवहाराभिप्रायेन नित्यानित्यविभागमभिप्रेत्य देहानामंतवत्वमुच्यत इति न दोषः नित्यत्वे कालापरिछेद्यत्वं तच्च व्यवहारेण न भवतीत्यत उक्तं अनाशिन इति नाशोऽदर्शनं तद्वान् हि आकाशः न भं आत्मनि लीयत इति स्मृतेः अयं तु न तथेत्यनाशी सर्वदैव प्रकाशमान इत्यर्थः एतदपि घटादिवद्दृश्यत्वेनेत्याह अप्रमेयस्येति तथा च श्रु

॥ अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत १८

तिरात्मनः अप्रमेयत्वमाह एतदप्रमेयं ध्रुवमिति अप्रमेयमित्यर्थः एतच्चात्मनि प्रमाणाप्रसरात् तेनेयं तथा च श्रुतिः येन सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयादिति प्रसिद्धिस्त्वस्य प्रत्यगात्मत्वादेव यस्मात् परोक्षो दृष्टस्य आत्मा सर्वांतर इति श्रुते उक्तं च प्रमाणमप्रमाणं च प्रमाभासस्तथैव च यत्प्रसादात्प्रसिध्यंति तदसंभावनाकृतमिति तस्माद्युध्यस्व भारत भीष्मादिदेहानां मिथ्यात्वादनित्यत्वाच्च त्वयमेव न स्वप्रयत्नप्राहननानिवर्तत्वात्त्वया स्वधर्मो न नाशनीय इति भावः १८

श्रीव
८

नन्वनासतो विद्यते भावः इति न्यायेन स्वतो मात्रादेर्मिथ्यात्वेन निःस्वरूपत्वात्कर्तृत्वं न संभवति अतः सदेवास्य कर्तृत्वं सर्वं
धर्मोद्भवान्नकं वीची आत्मायां नः ततः कर्तृत्वेबंध आत्मनश्च मोक्ष इति तयोर्वैयधिकरण्यं स्यात् तथा येन सर्वमिदं ततं इति सतो
देहाद्युपादानत्वं चोक्तं तथा च हननक्रियायां प्रत्येकस्यैव कर्तृत्वं कर्मत्वं चापद्यतिति तच्च विरुद्धं स्वात्मनि व्यापारायोगात् न हि
वह्निर्वह्निं दहतीतिपूर्वोक्ताभिप्रायशंकायामाह य एनमिति यश्च तार्किकादिरेनमात्मानं हन्तारं हननक्रियायाः कर्तारं मन्यते यश्च
चार्वाकादिरेनं हतं हननक्रियायाः कर्मभूतं मन्यते तावुभावपि न जानीत आत्मतत्त्वमिति शेषः यस्मान्नायं हन्ति न हन्यते न
हि यः कर्ता स आत्मा नापि देह आत्मा तयोः प्रागेवानात्मत्वावधारणात् अयमभावः यथायः पिंडे वह्निसंबंधादेव दग्धृत्वेन
तत्त्वतः एवं मात्राद्युदयसमनियतं कर्तृत्वं मात्रादिधर्म एवनात्मनः आत्मनि तु कर्तृत्वप्रतीतिर्मात्रादिसंबंधादेव अतो
मात्रादिविशिष्टस्यैव बंधो न केवलस्य मोक्षश्च मात्रादिवियोग एवेति न बंधमोक्षयोर्वैयधिकरण्यं सत्त्वादेर्निःस्वरूपत्वम् नच मात्रा

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतं उभौ तौ न विजानीतो नायं हन्ति न हन्यते १९

मस्ति सत्त्वासत्त्वाभ्यामनिर्वचनीयस्य व्यवहारयोग्यस्य ब्रह्मज्ञानैकबाध्यस्य स्वप्नमायागंधर्वनगरादितुल्यतत्स्वरूपस्याभ्युपगमात्
तस्मान्न कर्तृत्वमात्मधर्मः यथोक्तं आत्मा कर्तादिरूपश्चेन्मा कांक्षीस्तर्हि मुक्ततां नहि स्वभावो भावानां व्यावर्तेतौष्ण्यवद्रवेरिति
किंच कर्तृत्वं रागद्वेषादिविकारवत एव संभवति तदभावादुःखीति आत्मनः स्वरूपमानेसाक्षित्वं वाध्यते यथोक्तं नर्तस्याद्विक्रियां दुः
खी साक्षिता काविकारिणः धीविक्रियासहस्राणां साक्ष्यतोहमविक्रिय इति नच सतो देहाद्युपादानत्वेन हननक्रियाकर्मत्वं संभव
ति विवर्तवादाभ्युपगमात् न ह्यध्यस्तस्य धर्मैरधिष्ठाने विकार इष्यते यथोक्तं भाष्ये यत्र यदध्यस्तं तत्कृतेन गुणेन दोषेण वाणु
मात्रेणापि न संबध्यत इति विवर्तं चैतद्बृंदे नहि भूमिरूषरवती मृगतृष्णाजलवाहिनीसरितं समुद्वहति मृगवारिपूरपरिपूरवती न नदी
तथैष प्रपंचं स्पृशतीति एतेन कर्तृत्वकर्मत्वयोरनात्मधर्मत्वादनात्मनश्चानेकरूपत्वादेकत्रात्मनि तदुभयविरोधोद्भावनमपि
निरस्तं वेदितव्यं एवं चार्वाकतार्किकाभिमतौ देहात्मकर्त्रात्मवादौ हन्तावेन्मन्यते हन्तुं हतश्चेन्मन्यते हतं उभौ तौ न विजानीतो
नायं हन्ति न हन्यतइति काठकोक्तेन मंत्रेणार्थवैद्यपाठभेदात्सिद्धेन परिहृतौ वेदितव्यौ १९

भ॰गी॰
मो॰टी॰
८

नाहं हंति न हन्यत इत्युक्तं तत्र न हन्यत इत्येतदुपपादयति तत्रस्यैनैव मंत्रेण द्वितीयेन न जायत इति अयं आत्मा कदाचिन्न जायते अभिनवो नो
त्पद्यते न वा म्रियते निरन्वयो न नश्यति तार्किकाभिमत घटवत् तत्र क्रमेण हेतुद्वयं अजो नित्य इति अजत्वात् न जायते नित्यत्वात् च न
वा म्रियते इत्यर्थः अस्तु तर्हि क्षणिक विज्ञानवद्धारारूपः तस्य विज्ञानवादिभिः अजत्वनित्यत्वाभ्युपगमादित्याशंक्याह भूत्वा
भविता न भूय इति अयमित्यनुवर्तते अयं भूत्वा भूयो भविता न भूयो: स भूत्वा भवितेति भवनक्रियाद्वयस्य क्त्वाप्रत्ययेन समानक
र्तृत्वं धारैक्याभिप्रायेण भूत्वैव तानन्तु भूत्वा स्थित्वा स्थित्वा विनश्यति तार्किकाणां हि विज्ञानं उत्पत्ति स्थिति नाश क्षणमात्रस्थायित्वात् त्रिक्ष
णवस्थापि विज्ञानवादिनां तु पूर्वस्य नाशक्षण एवोत्तरस्योत्पत्तिक्षणः स एवास्य स्थितिक्षणश्चेति क्षणिकत्वात् विज्ञानानां भ
वनक्रियाद्वयस्याव्यवधानाद्भूत्वा भवितेत्युक्तेनाद्दोषाप्यपंनयतः शाश्वतः शाश्वदेकरूपः योऽहं बाल्ये पितरावन्वभूवं सोऽहं स्थविरे
प्रणप्तॄननुभवामीति बाल्यस्थाविरयोरेकप्रत्यभिज्ञानात् न च सादृश्यात् प्रत्यभिज्ञानं सादृश्यग्रहीतुः स्थिरस्याभावात् एवमजन्मम
रणहीनोपि धर्मान्तरविशिष्टः भूत्वा पुनः धर्मान्तरविशिष्टो भविता इत्यपि न भूत्वैव भविता न भूत्वेति योजना अर्हतां हि श

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता न भूयः अजो नित्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने
शरीरे २०

रीरपरिमाणमात्मानमभ्युपगच्छन्तो नित्यस्यैकस्यैवात्मनः क्रमेण वृत्त्युत्क्रमेण वा मशकमनुजमतंगजशरीरप्राप्तौ परिमाणस्य भेदं मन्य
मानाः तस्यैवात्मनो विशेषणीभूतपरिमाणभवनादौपचारिकं भवनमुपगच्छन्ति तदपि न शाश्वतत्वादेव उपचयापचयवतो मध्यमपरि
माणस्य वस्तुनो नित्यत्वायोगात् अनेनैव सुखदुःखादि धर्मान्तरोत्पत्तिमतो भाक्तं भूत्वा भवनं प्रत्याख्येयं न हि दुःखादिधर्मिणः स्वनाशमं
तरेणात्यन्तिक दुःखोच्छेदः संभवति घटादौ यावद्रूपनाशादर्शनात् ननु नित्यत्वं शाश्वतत्वं चाकाशेप्यस्ति अत आह पुराण इति पुरावि हारि
दृष्टेः प्रागपि सत् एव एतेन अपवृत्त्यादि धर्मा राहित्यान्मुख्यमजत्वादिकं आत्मन एव वियदादेस्त्वमुख्यं इति दर्शितं अत एव शरीरे हन्य
माने न हन्यते भाष्ये तु वा शब्दस्य कार्येन जायते म्रियते वेत्यर्थः तत्रोपपत्तिः अयं न भूत्वा अभूत्वा अनुत्पद्य न भविता घटादिवत् ततो न जा
यते अथवा नञः पर्नीनयितं न जायते न वा म्रियत इति यतो भूत्वा अभविता घटवद्विनाशी न अतो न म्रियत इति शाश्वतः पुराण इत्येता
भ्यामपचयोपचयौ न विद्येते इति न हन्यते न विपरिणस्यत इति च व्याख्यातं केचिदेवमाहुः न जायते म्रियते इति प्रतिज्ञा कदा
चिदित्यादिना तस्या उभयादनं अज इत्यादिरूपसंहार इति २०

श्रीव
८

नाहं हंतीत्येतदुपपादयति वेदेति विनष्टं अदर्शनं गंतुं शीलमस्येति विनाशि अन्त्यगतत्वमुपाधित्रयं स्थूलसूक्ष्मकारणशरीराख्ये तनोत्यं अविनाशिनं अत एव नित्यं नाशहीनं तत्र हेतुः अजं जन्मवान् हि अनित्यः अयं तु अजत्वान्नित्य इत्यर्थः ननु विनाशित्वकार्यापेक्षया अन्यत्वमजत्वं नित्यत्वं च सांख्याभिमते प्रधाने तार्किकाभिमते नभसि चास्ति अत उक्तं अव्ययमिति न व्येति एवीव स्यान्नत्यजतीत्यव्ययमपरिणामि प्रधानं तु चलं गुणवृत्तमिति न्यायेन गुणसाम्यावस्थायामपि परिणाममेव सत्त्वं दास्तीति तेषामभ्युपगमात् आकाशस्यापि तस्माद्वा एतस्मादात्मन आकाशः संभूत इति उत्पत्तिश्रवणादनित्यत्वाभावादेवनाव्ययत्वं नादृशं आत्मानं यो वेद अपरोक्षीकरोति स पुमान् कथं केन प्रकारेण कमन्यं घातयति हननक्रियायां प्रवर्तयति कं वा हंति न केनचित्प्रकारेण कंचिद्घातयति न वा हंतीत्यर्थः द्वैताभावात् तथा हि श्रुतिर्विद्यावस्थायां सर्वकारकव्यापारं निषेधति यत्र त्वस्य सर्वमात्मै

वेदाविनाशिनं नित्यं य एनमजमव्ययं कथं स पुरुषः पार्थ कं घातयति हंति कं २१ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोपराणि तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही २२ ॥

वाभूत्केन कं पश्येदित्यादिः अविद्यावस्थायामेव च सर्वकारकव्यवहारं दर्शयति यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादि एतेन सर्वकारकोपमर्दिन्या विद्यायाः सर्वकारकसापेक्षैः कर्मभिः सह समुच्चयो निरस्तः परस्परविरुद्धस्वभावत्वेन शीतोष्णयोरिव द्वयोरेककार्यकारित्वस्य रथाश्वन्यायेनासंभवादित्यन्यत्र विस्तरः मादृशानां मुमुक्षूणां कालेविद्यालेशानुवृत्त्या घातयितृत्वादेः प्रसक्तावपि विषयातस्य बाधितत्वात् आगामि कर्मणामश्लेषाद्धनदोषः तथा च वक्ष्यति हत्वापि स इमाँल्लोकान्न हंति न निबध्यते इति २१ ननु ब्राह्मणो यजेत जातपुत्रः कृष्णकेशोऽग्नीनादधीतेति आत्मानं वयोवर्णादिविशेषणवंतमेवाधिकृत्य कर्मविधयः प्रवर्तंते तेन जीर्णा दुर्बलमिव देहादन्य आत्मावधारयितुं न शक्यत इत्याशंक्याह वासांसीति दंडी प्रैषानन्वाहेति दंडस्य विशेषणत्वेपि न प्रैषानुवक्तृस्वरूपांतर्गतत्वं एवं ब्राह्मणत्वादेरपि न स्वर्गकामस्वरूपांतर्गतत्वमिति वस्त्रे देवदत्तयोरिव जडाजडयोर्देहात्मनोरत्यंतविलक्षणत्वमस्तीति वस्त्रनाशेन देवदत्तनाशं मन्वानस्येव तद्देहनाशादात्मनाशं मन्वानस्यात्यंतमौढ्यं स्पष्टमि

स॰भा॰
भा॰टी॰
१०

कीदृशोसौ देहीत्यत आह नैनमिति एनं शस्त्राणि न छिंदंति न द्वेधा कुर्वंति अस्थूलत्वात् नहि पार्थिवपरमाणुवृत्याकुंजरूपाद्याश्रयोभ
विष्यतीत्याशंक्याह नैनं दहति पावक इति अनणुत्वात् आपश्चैनं न क्लेदयंति अस्पर्शत्वात् स्पर्शवद्धि द्रव्यमद्भिराद्रीकर्तव्यं न त्वस्पर्शं
न शोषयति मारुतः अस्नेहत्वात् एतेन अस्थूलमनणु अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगंधवच्चयदिति श्रुतिप्रसि
द्धानां दीर्घत्वादीनामपि संग्रहो ज्ञेयः २३ कुतो हेतोरस्य शस्त्राणि छेदादीन्न कुर्वंतीत्याशंक्य तस्य छेदाद्ययोग्यत्वादित्याह
अछेद्योयमिमामति अत्राछेद्यत्वादेः पूर्वोक्तान्येव अस्थूलत्वादीनि कारणानि ज्ञेयानि एवमछेद्यत्वादिनास्थूलाद्यभावरूपान्
गुणानुक्त्वा भावरूपानपि गुणानाह नित्य इति सर्वैर्विशेषणैरखंडैकरसस्यैव वस्तुनो लक्ष्यत्वात् नित्यत्वादिभिरुत्पाद्यत्वा
त्या दिकं निराक्रियते यतो नित्य अतो पटवदनुद्यः यतः सर्वगतः अतो ग्रामवदप्राप्यः यतः स्थाणुः पूर्वरूपापरित्यागेन स्थि

नैनं छिंदंति शस्त्राणि नैनं दहति पावकः न चैनं क्लेदयंत्यापो न शोषयति मारुतः २३ अछे
द्योयमदाह्योयमक्लेद्योशोष्य एव च नित्यः सर्वगतः स्थाणुरचलोयं सनातनः २४ ॥

रस्वभावः अतः क्षीरादिवदविकार्यः अचलः यथा दर्पणः स्वतः स्वाच्छ्यादप्रच्युतोपि मलरूपेणावरणेन स्वाच्छ्यात्प्रच्याव्य
ते एवं स्वयं स्थाणुरपि अन्यसंयोगाच्चांचल्यमनुभवेत् न च दोषापकर्षणलक्षणसंस्कारमपेक्षते अयं तु अचलत्वान्न
तथा एवं च उत्पत्याप्तिविकृतिसंस्कृतिरूपं चतुर्विधं क्रियाफलमात्मनि न संभवतीत्युक्तं तत्र हेतुः सनातन इति सनाद्
त्यपरं नैरंतर्यं तच्च देशतः कालतो वस्तुतश्च परिछेदराहित्यं परमते परमाणूनां कालतः परिछेदाभावेपि देशपरिछे
दोस्ति आकाशस्य तदुभयाभावेपि वस्तुनः परिछेदोस्ति सोपि त्रिविधः सजातीयविजातीयस्वगतभेदरूपः यथा वृ
क्षस्य स्वगतो भेदः पत्रपुष्पफलादितः वृक्षांतरात्सजातीयो विजातीयः शिलादितः ततश्च सनातने नैरंतर्येण त्रि
विधपरिछेदराहित्येन भवति अस्तीति सनातनो अखंडैकरसोयस्मात्तस्मान्नोत्पत्याद्याश्रयत्वमस्येत्यर्थः २४ श्रीव
१०

एवं त्रैपं वस्तूक्तं तत्त्वं तत्त्वाध्यस्तदेहत्रयनिरासेनापरोक्षीकर्तव्यमित्याह अव्यक्तोऽयमिति व्यक्तं स्थूलशरीरं प्रत्यक्षगम्यं तदन्योऽयं
प्रत्यगात्मा तथाऽचिंत्योऽयं चिंत्याद्योग्यं रूपादिप्रकाशकार्येणानुमेयं पंचवृत्त्यादिसमुदायात्मकं लिंगशरीरं अप्रत्यक्षं ततोऽप्यन्यो
यं तथाऽविकार्योऽयं विकारं स्थूलसूक्ष्मकार्यभावेनावस्थानमर्हतीति विकार्यं त्रिगुणात्मकं मूलाज्ञानं कारणशरीरं सुषु
प्तिस्थं न किंचिदवेदिषमिति परामर्शदर्शनादहं न जानामीत्यनुभवाच्च साक्षिप्रकगम्यं ततोऽप्यन्योऽयं उच्यते व्यक्तादिनिषेधमु
खेन न तु स्थूलगम्यादितया अयमेवंविध इति विधिमुखेनोच्यते यस्मादेवमयमुच्यते तस्मादेनं विदित्वा नानुशोचितुमर्हसि तरति
शोकमात्मविदिति श्रुते आत्मवित्त्वाद्बंधुवियोगजं शोकं माकार्षीरित्यर्थः उक्तं वा मनोऽवस्थात्रयातीतत्वं स्वप्रनिद्रापूर्वावस्थो ता

अव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यते तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि २५ अथ चैनं नित्यजा
तं नित्यं वा मन्यसे मृतं तथापि त्वं महाबाहो नैनं शोचितुमर्हसि २६ जातस्य हि ध्रुवो मृत्युर्ध्रुवं ज
न्म मृतस्य च तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि २७ ॥

प्राज्ञस्तत्त्वस्वप्रनिद्रयाननिद्रं नैव च स्वप्नं तुर्यं पश्यंति निश्चिता इति २५ एवं तत्त्वदृष्ट्या शोके नोचित इत्युक्तं इदानीं प्राकृत
जनदृष्ट्यापि शोको नोचित इत्याह अथ चेति नित्यं नियमेन जातं नित्यजातमिति चार्वाकपक्षः नित्यं सर्वदा जातमिति क्षणि
क विज्ञानवादिपक्षः नित्यश्चासौ अपूर्वदेहेन्द्रियसंबंधाज्जातश्चेति तार्किकादिपक्षः एवं नित्यं वा मन्यसे मृतमित्यपि यो
ज्यं पक्षत्रयेऽपि शोको न युक्तः महाबाहो इति युद्धार्थमुत्साहयति २६ शोचितुं नार्हसीत्युक्तं तत्र हेतुमाह जातस्ये
ति जातस्य ध्रुवोऽपरिहार्योऽर्थः मृत्युर्मरणेऽप्यपरिहार्येऽर्थे मरणाख्ये त्वदुद्योगं विनापि अवश्यंभाविनि विषये न त्वं शो
चितुमर्हसि वक्ष्यति च मयैवैते निहताः पूर्वमेवेति २७ ॥

अस्त्वात्मनो ऽशोच्यत्वं तथापि दृष्टदेहविनाशजः शोको ऽभवत्येवेत्याशंक्य सकारणस्य देहादेर्मिथ्यात्वं साधयति अव्यक्तादी
नीति भूतानि विपदादीनि तद्विकारभूतानि जरायुजादीनि च न व्यक्तं अव्यक्तं अस्तानं तदेव आदिर्येषां तथाविधानि व्यक्तः स्प
ष्टः मध्यः उत्पत्तिमारभ्य मरणात्प्रागवस्था एषां अव्यक्ते एव निधनं लयो येषां मिति अयमर्थः रज्जूरगादिकारणभूतानं
रज्ज्वज्ञानं व्यक्तमस्ति परीक्षमाणं च न दृष्टिपथमवतरति अतस्तदव्यक्तं तत उत्पन्नः सर्पस्ततो वल्मीपतेन रज्ज्वां ए
वं आत्मनि कल्पितानां भूतानां आदिरंतश्चाव्यक्तमेव तेन आद्यावंते च यन्नास्ति वर्तमानेऽपि तत्तथेति न्यायेन मध्येऽभासस
मानान्यपि तानि रज्जूरगावत् असं एतेष्वेव एवंविधेन तत्र तस्मिन् विषये का परिदेवना को वा विलापः नाहं मरूमरी २८

॥अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्तनिधनान्येव तत्र का परिदेवना २८॥

चिकाहं दो नष्ट इति कश्चित्तत्त्ववित् विलपति अत एव भूतानां रज्जूरगादीनामिव प्रतीतिसमकालिकीं सृष्टिमभिप्रेत्य कोषी
तकि ब्राह्मणे स्वापप्रबोधयोर्जगल्लयोदयोपवर्ण्यते यदा स्वपिति तदेनं वाक्सर्वैर्नामभिः सहाप्येति चक्षुः सर्वैरूपैः सह
अप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रबुध्यते ऽथैतस्मादात्मनः सर्वे प्राणा यथायत
नं विप्रतिष्ठन्ते प्राणेभ्यो लोका इति प्राणाः चक्षुरादीन्द्रियाणि देवास्तदनुग्राहकाः सूर्यादयः लोकाः रूपादयः ननु वि
हान्यत्र च आत्मैव सर्वभूतानां लयोदयस्थानं विमुच्यते नान्यत्तत्कथमेषामव्यक्तं लयोदयः स्थानमभिधीयते सत्यमत्ता
नाश्रयत्वाद्भूतानां तथात्वव्यपदेशो न वस्तुगत्या न हि अपरिणामिनः कूटस्थस्य सम्भवत्येतत्कथमेषामव्यक्तं लयोदय
स्थानत्वं संभवति यथोक्तं अस्य हेतेंद्रजालस्य यदुपादानकारणं अ

ननुवज्रपंजरतुल्यस्य सर्वप्रमाणसिद्धस्य वियदादिप्रपंचस्य कथं रज्जुरगादिवद् ज्ञानप्रभवस्येनौत्पत्तिकतुच्छत्वमुच्यते कथं वा कर्मज्ञा
नकांडापेक्षितमात्मनो यज्ञादिकर्तृत्वं चापह्नूयत इत्याशंक्याह आश्चर्यवदिति कश्चिज्ज्ञानात्मा ततः एनं प्रतीतानामपि लोको
क्तं भूतग्रामं आश्चर्यवत् आश्चर्यमद्भुतं स्वप्नमायेंद्रजालादिकं तेन तुल्यमाश्चर्यवत् यथाभूतं पश्यति तथा कश्चिदेनं आश्चर्यवद्व
दति स तेन असत्वेन वा निर्वक्तुमशक्यमपि अनिर्वचनीये नैव लोकाप्रसिद्धेन रूपेणोपपादयति तथा हि रज्जुरगादिवत्प्रपंचः सं
श्चेत् नेह नानास्ति किंचनेति श्रुत्या न बाध्येत असंश्चेन्न प्रतीयेत तस्मादनिर्वचनीयोऽयमिति तदिदं सर्वव्यवहारास्पदस्या
पि प्रपंचस्य मिथ्यात्वोपपादनमत्याश्चर्यमित्यर्थः तथा एनं प्रपंचमन्य आश्चर्यवत् शृणोति इमे लोका इमे देवा इमे वेदा इदं श्र
सर्वं यदयमात्मेति प्रत्यक्षेण अनात्मतया उपलभ्यमानस्यापि प्रपंचस्य प्रत्यगभिन्नत्वेन श्रवणं तदसंतमाश्चर्यं न हीयं

॥ आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः आश्चर्यव॥
॥ च्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् २९॥ ॥ ॥

श्रुतिः यजमानः प्रस्तर इत्यादिवदुपचरितार्था प्रपंचस्यात्मनः पृथक्त्वे आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं स
र्वं विदितं भवतीत्येकविज्ञानात्सर्वविज्ञानप्रतिज्ञोपरोधापत्तेः न च प्रतिज्ञायौपचारिकी प्रदेशांतरस्थ तस्यैव यथा सौम्यैकेन मृत्पिंडे
न सर्वं मृन्मयं विज्ञातं स्यादिति दृष्टांतस्योपरोधापत्तेः तस्मात्प्रतिज्ञा दृष्टांत निगमनानामेकवाक्यत्वात् न प्रपंचस्यात्मनोऽन्यत्वं त
त्वभेदग्राहि प्रत्यक्षविरोधादाश्चर्यमेव शृणोति कश्चिदेनं प्रत्यगनन्यत्वेन श्रुत्वा अपि शास्त्रात् उक्तोस्वप्नादि दृष्टांतेनोपपा
द्य दृष्ट्वा ध्यानेन च साक्षात्कृत्वापि न तत्त्वतो न वेद जानाति तथा हि प्राप्तापि प्रतिज्ञानी व्राविक्षेपवतः परिहीयत इति वक्ष्यति तस्मा
दात्मैकात्म्यासंभवत्येव प्रपंचस्य रज्जुरगादितुल्यत्वेन तुच्छत्वं परिहारा एनं आत्मानं कर्तृत्वभोक्तृत्वदुःखित्वानित्यजडसंगित्वपरि
च्छिन्नत्वादिधर्मवत्तया प्रसिद्धमपि तत्त्वमसीत्यागमोपपाद्ब्रह्माकारांतःकरणवृत्त्या ब्रह्मविद्याख्यया अप्रकर्तारमभोक्ता

स॰भा॰
भा॰१
ष॰२

रमानंदघनं सत्यचिद्रूपमसंगमनंतमपरोक्षीकरोतीतिमहदाश्चर्यं पत्यश्यतितदाश्चर्यं वदितिक्रियाविशेषणं वाश्चा
विद्यकमपिदर्शनेम विद्यांस्वात्मानं बंकर्तकज्जीवं निवर्तयतीतियद्वायः पश्यतिस आश्चर्य वदितिकर्तृ
विशेषणं पतत् एवंएवंविद्वान्समाधिकुत्थानयोः परस्परविरुद्धमात्मनोब्रह्मभावं जीवभाव
वं चयावेदार वंधकर्तृ स यमनुभवतीतितथावाङ्मनसातीतमप्यात्मानं यद्वाचावदतितदप्या
श्चर्यंअगृहीतसंगतिकेनापिशब्देनयथासुप्तः प्रबोध्यतेतद्वत् यथोक्तंवार्तिके अ
गृहीत्वैवसंबंधमभिधानाभिधेययोः हित्वानिद्रांप्रबुध्यंतेसुषुप्तेर्बोधितापरैः जाग्रत्वोनयतःशब्दंसुषुप्तेर्वैतिकश्चन ध्वस्तेतोज्ञानतोज्ञानेब्रह्मास्मीतिभवेत्फलंअविद्याघातिनःशब्दाद्याहं ब्रह्मेतिधीर्भवे
न्नश्यत्यविद्ययासार्द्धंहत्वारोगमिवौषधमितितथायःश्रृणोति सोपिआश्चर्यवत्तुश्रुतिदुर्लभइत्यर्थः श्रवणायापिबहुभिर्योनलभ्यइतिश्रुतेःश्र एवंतोपि बहवोयन्नविदुरितिश्रुतेः द्वितीयपादार्थसंग्रहइति आत्वायेनमितिआश्चर्योविक्ताकुशलोस्यलब्धाश्चर्योज्ञाताकुशलानुशिष्टइतिउत्तरार्द्धस्तुश्लोकेपूर्वार्द्धेनसंगृही
तइतिज्ञेयंदुर्विज्ञेय
माक्ततत्वं
तद्ज्ञानार्थंयत्नस्त्वेतिभावं २९ राम

ति ति

शिव
१२

प्रकृतमर्थमुपसंहरति सर्वाणिभूतानिकथमेतेदीनाअल्पबलाः बलवतरेणमयाहंतव्याः कथमेषांपुत्रादयएतेर्वि
नाजीविष्यंतिकथंवाःहंभीष्मादिभिर्गुरुभिर्विनाजीविष्यामीतिशोचितुंनार्हसीत्यर्थः ३० अर्जुनस्यअनात्मनिदेहेआत्म
धीरूपोमोहोनिवारितः इदानींस्वधर्मेयुद्धेअधर्मधीरूपंमोहंनिवारयतिस्वधर्ममपीत्यादिना युद्धंक्षत्रियस्यस्वोधर्मः
तमवेक्ष्यापिविकंपितुंचलितुंनार्हसि यस्मात्धर्मादनपेतात्युद्धादन्यत्क्षत्रियस्यश्रेयःप्रशस्ततरंनास्ति ३१ किंच
यदृच्छयाअप्रार्थितमप्युपपन्नंउपस्थितं स्वर्गस्यद्वारंअपावृतमुद्घाटितंयेक्षत्रियाः लभंतेते [illegible]नोधन्याभवंतीति सुखि

देहीनित्यमवध्योयंदेहेसर्वस्यभारत तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि ३० स्वधर्ममपिचा
वि वेक्ष्यनविकंपितुमर्हसि धर्म्याद्धियुद्धाछ्रेयोन्यत्क्षत्रियस्यनविद्यते ३१ यदृछयाचोपपन्नंस्वर्गद्वारमपावृतंसुखि
नःक्षत्रियाःपार्थःलभंतेयुद्धमीदृशं ३२ अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि ततःस्वधर्मंकीर्तिंचहित्वा
पापमवाप्स्यसि ३३ अकीर्तिंचापिभूतानिकथयिष्यंतितेव्ययां संभावितस्यचाकीर्तिर्मरणादतिरिच्य
ते ३४ भयाद्रणादुःपरतंमंस्यंतेत्वांमहारथाः येषांचत्वंबहुमतोभूत्वायास्यसिलाघवं ३५ अवाच्यवादां
श्चबहून्वदिष्यंतितवाहिताः निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिं ३६ हतोवाप्राप्स्यसिस्वर्गंजित्वावा
भोक्ष्यसेमही तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः ३७

संबंधः ३२ युद्धत्यागेदृष्टनाशोनिष्टप्राप्तिश्चभवतीत्याह अथचेदिति ३३ अव्ययांदीर्घकालां ३४ अकीर्तिमेवाहभयादिति त्वंबहुमतोभू
त्वास्वतएव अतिप्रलाघवंतःसन्लाघवंलघुभावंकातर्यारव्यमेषांपुरतोयास्यसितेमहारथास्त्वांभयादुणादुपरतंमंस्यंतेइतियोजना ३५ किं
च अवाच्यवादान्वक्तुमयोग्यान्शब्दान्त्वंढतिलोर्जुनइत्यादीन्सामर्थ्यंनिंदंतः धिगस्यसौर्यंयोभीष्मादिभयात् पलायनंइतिइदंव
चनंमरणादपिअधिकंदुःखंततोन्यतदुःखतरमधिकंदुःखंकिंनकिमपीत्यर्थः ३६ यद्यजयेभयादेवानोजयेयुरित्युक्तंतत्राहहत
तोवेतिरणेअस्थिरस्यस्वर्गोवाराज्यंवासिद्धमस्तीतिपक्षद्वयमपिहितावहमित्यर्थः ३७

म.भा. गी.टी. १२

[illegible]

स्वधर्मस्य युद्धस्याकरणे धर्मकीर्तिनाशः पापावप्तिश्च यद्येवं दितिश्चेन्नो केन भगवता यद्युक्तोत पापिष्ठं ह्यस्य अर्जुनाभिमतः काम्यत्वपक्षे:
अहो वत महत्पापं कर्तुं व्यवसिता वयं यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यताः इति तत्राकरणे पापप्रशक्तिरस्ति तां निवारयितुं सिध्यसि
ध्योः समत्वलक्षणमाह सुखदुःखे इति समे कृत्वा सुखदुःखयोस्तद्धेत्वोः राज्यलाभालाभयोस्तद्धेतोर्जयपराजययोः रागद्वेषा
वकृत्वेत्यर्थः केवलं स्वधर्मोयमिति मत्वा युद्धाय युज्यस्व घटस्व एवं कुर्वंस्त्वं पापं नाप्स्यसि यस्तु राज्यलोभेन सुहृद्वधं करोतीति तस्यास्त्ये
व पापमिति भावः कथं तर्हि स्वधर्मत्वेनानुष्ठितेपि युद्धे हतो वा प्राप्स्यसि स्वर्गमित्यादि फलस्मरणमानुषंगिकमिति ब्रूमः त
था चापस्तम्बः तद्यथाम्रे फलार्थे निमित्ते छायागंधावनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते नो चेदनूत्पद्यन्ते न धर्महानिर्भ
वतीति आनुनिर्देशने न प्रतिपादयति ३८ एवमर्जुनस्य स्वपरयोः शोकमपि मोहापनयनौ तत्र कं घातयति हंति कमिति कर्तृत्वका
रयितृत्वयोरात्मन्यसंभव उक्तः ततो युद्धाय युज्यस्वेति नियोगश्चोक्तः नहि कर्तृत्वकारयितृत्वसर्वगतस्य नियोज्यत्वं सं
भवतीति परस्परव्याहतमेतदिति मामाशंक्य अधिकारभेदेनानयोर्व्यवस्थापयन् परिहरति एषा तेऽभिहितेति [illegible]भि

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ३८ एषा तेभि
हिता सांख्ये बुद्धिर्योगे त्विमां शृणु बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि ३९

हिता अशोच्यानन्वशोचस्त्वमित्यादिना स्वधर्ममपि चावेक्ष्येत्यतः प्राक्तनेन संदर्भेण उक्ता सांख्ये सम्यक्ख्यायते: प्राक्तनेन संदर्भेण प्रकाश्यते
वस्तुतत्त्वमनयेति संख्या उपनिषत् तत्र विदिते सांख्ये औपनिषदे बुद्धिस्तज्ज्ञानं संसारनिवर्तकं एषा ते सांख्ये बुद्धिरभिहितेति संबंधः योगे सिद्ध्यसि
द्ध्योः समो भूत्वा समत्वं योग उच्यते इति वक्ष्यमाणलक्षणे विषये तु शब्दः पूर्ववैलक्षण्यद्योतनार्थः वक्ष्यति च बहुज्ञानकर्मनिष्ठयोर्विभिन्नाधि
कारित्वं लोकेस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामिति एतेन ज्ञानकर्मणोः समुच्चयपक्षः का
पास्तः इमां स्वधर्ममपि चावेक्ष्येत्यादिना अनंतरग्रंथेनोक्तामपि विस्तरेणाभिधीयमानां शृणु इमामेव बुद्धिं स्तौति सार्धेन बुद्ध्येत्यादिना न
नेकर्मबंधप्रहाणमात्मज्ञानेनैव अश्रूयते तस्यैवात्मनोपदं वित्वा न लिप्यते कर्मणा पापकेनेति श्रुतेः कर्मयोगस्तु कर्मबंधं हटी कारिष्य
स्येवेति कथमुच्यते कर्मबंधं प्रहास्यसीति चेत् स्मृतिवलादि ब्रूमः न पाहि ईशावास्यमिदं सर्वं यत्किंचिज्जगत्यां जगत् तेन त्यक्तेन भुंजीथा मा
योतोस्ति न कर्म लिप्यते नरे इति श्रुतिरीश्वरेण इदं सर्वं त्यक्त्वा मितमस्तीति न कश्चिन्न किंचित् स्वछपाकर्तुं प्रभवति अतः सर्वत्र ममताहीनः

श्रीव
१२

एतदेवोपपादयति नेहेति इह कर्मबंधप्रहाणार्थे कर्मयोगेऽनुष्ठीयमानेऽभिक्रियतेऽभ्यापते इत्यभिक्रमः कर्मारंभः कर्मैव वा तस्य नाशो
नास्तिऽनात्फलंदत्वा नश्यति न त्विदमिष्टफलस्याजननात् न त्वेतस्यापि काम्यातः या ज्ञितया नित्याकरणाज्जनितः प्रत्यवायउत्पद्येत वस
हदनुष्ठितस्य बंधप्रहाणप्रत्यवायहरिहाराख्यफलद्वयहेतुत्वायोगादितिस्याशंक्याह प्रत्यवायो न विद्यत इति तमेवं वेदानुवचनेन ब्रा
ह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेतिष्क्रत्यासंयोगपृथक्त्वन्यायेन इध्वेंद्रियकामस्य जुहुयादित्यनेन नित्यस्य दध्नो वीर्यार्थत्ववत्
नित्यानामपि कर्मणां विविदिषार्थत्वं विनियोगवलात् सिध्यतीति न नश्वकाम्येने वप्रयोगेन नित्यस्यापि सिद्धेन नित्याकरणनिमित्तो वा को
प्यत्वात् सर्वांगानुपसंहारनिमित्तो वा प्रत्यवायो न विद्यते नित्यानामेवं वा विनियोगात् मित्येषु च यथाशक्त्युपबंधस्यानुष्ठानात् वा तिं
केनु च काम्यानामप्यत्रा विनियोगो दृष्टः यथा वेदानुवचनादीनामेकात्म्यज्ञानजन्मने तमेतावमिति वाक्येन नित्यानां वदत्येते विधिः
यद्यावि विविदिषार्थत्वं काम्यानामपि कर्मणां तमेतमिति वाक्येन संयोगस्य पृथक्त्वेन इति अस्मिन्पक्षे काम्यानामपि तुल्यत्वात् नि
त्यवद्यथाशक्त्युपबंधो भविष्यतीति न सर्वांगानुपसंहारजनित प्रत्यवायो विद्यते स्वल्पमप्यस्य धर्मस्यानुष्ठितं अनुपभुक्तबीजक
नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ४० व्यवसायात्मिका
बुद्धिरेकेह कुरुनंदन बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां ४१
त्वं जन्मजन्मांतराभ्यस्तं दानमध्ययनं तपः तेनैवाभ्यासयोगेन तत्रैवाभ्यसते पुनरिति स्मृते रुत्तरोत्तरसंस्काराधानद्वारा स्वसजातीयवृद्धेर्नि
मित्तं सुत्कर्मादिदोषक्षयद्वारा महतो भयात् संसारात् त्रायते तस्मात् सांख्यानधिकारेण कर्मयोग एवानुष्ठेय इति भावः ४ ननु चैवं सांख्ययोग
योर्महाभयात् त्राणहेतुत्वे तुल्ये चेत्को नयोर्विशेष इत्याशंक्य सांख्यानां पातसंका नास्ति योगिनां तु यावद्बुद्धिदेहकैवल्यंपातशंकास्तीत्याह
व्यवसायात्मिकेति व्यवसायस्तत्वनिश्चयस्तदात्मिका तदेकाकारा बुद्धिरंतःकरणवृत्तिः अहं ब्रह्मास्मीति वाक्याजन्या ब्रह्माकारांतःकरण
वृत्तिः ब्रह्मविद्याविधानात् समस्तद्वैतस्य तद्बाधेन समभ्युदिता एकाएकैव सर्वकार्बुद्धिर्नातोऽस्य ब्रह्मलोकइतिश्रुतेः ब्रह्मैव लोको
ब्रह्मलोकः इह ब्रह्मैव न हि सकृत्ब्रह्मलोकज्ञाने ज्ञाते यत्कर्तव्यं वा किंचिदवशिष्यते कृतकृत्यत्वात् ब्रह्मविदो नास्य पातशंका नास्ति अव्य
वसायिनामज्ञानिनां तु बुद्धयोऽनंताः ता अप्रत्येकं बहुशाखा इति इदमेव मम श्रेय इति निश्चयस्य दुर्लभत्वात् कदाचिद्दश्रेयस्यपि श्रेयो बुद्धे

सर्वथापातसंकास्तीतिमहान्स्वल्पोविशेष इति भावः ४१

दृष्यं

उत्पन्नाऽपिनैवदृढेति यामिमामित्यादिना अव्यवसायिनोमूढाः यांपुष्पितांपुष्पितद्रुमवद्दर्शनतोरमणीयांवाचंश्रवणं हवैचातुर्मा
स्ययाजिनःसुकृतंभवति अपामसोमममृताअभूमेत्येवंरूपांप्रवदंतिअविपश्चितः अव्यवसायिनोमूढाः यतोवेदवादरताः वेदांत
र्गतेषुअर्थवादेषुयस्यपर्णमयीजुहूर्भवतिनशापापश्लोकंशृणोतीत्येवमादिषुरताः अतएवकर्मणोऽन्यत्आत्मज्ञानंतत्फ
लंमोक्षंनास्तीतिवादिनोवदनशीलाः ४२ तथाभोगगमनश्रेयैश्वर्यंचतयोगतिःप्राप्तिस्तांप्रतितदर्थमित्यर्थः कामात्मानः कामग्रस्तचि
त्ताः अतएवस्वर्गपराः कीदृशींभोगैश्वर्यगतिंजन्मकर्मफलप्रदांभोगैश्वर्येहिपुरुषस्तद्वासनावासित पुनर्भोगैश्वर्यप्राप्त्ययेज
न्मलभतेतदर्थंकर्माणिचकुरुतेफलंचततोभोगादिकंप्राप्नोतीतिचक्रमनिसमावर्ततेतेननिष्कामतस्युतोभवतीत्यर्थः किंचक्रियाविशेष

यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः वेदवादरताःपार्थनान्यदस्तीतिवादिनः ४२ कामात्मानःस्वर्गपराजन्मकर्मफल
प्रदां।क्रियाविशेषबहुलांभोगैश्वर्यगतिंप्रति ४३ भोगैश्वर्यप्रसक्तानांतयापहृतचेतसां व्यवसायात्मिकाबुद्धिःस
माधौनविधीयते ४४

एवंबहुलाधश्चायंयथावित्तव्ययापासाद्याधिक्यंतथातथाभोगैश्वर्यप्राप्तेराधिक्यमित्यर्थः एतेनात्यंतायाससाध्येष्वपिकर्मस
फललोभात्सज्जंतइत्युक्तंभाष्येभोगैश्वर्यगतिंप्रतिसाधनभूताः येक्रियाविशेषाअग्निहोत्रादय तद्बहुलांजन्मरूपंजन्मरूपंयत्कर्म
फलतत्प्रदांचवाचमेवेतिव्याख्यातं ४३ भोगेति तयापुष्पितवाचा अपहृतचेतसांपुंसांबुद्धिः समाधौसमाध्यनुष्ठानकालेव्यव
सायात्मिकाव्यवसायोज्ञानंतदात्मिकोशुद्धचिन्मात्राकारेणविधीयतेनभवति कर्मकर्तरिलकारः विरक्तस्यबुद्धिःसमाधौ
चिन्मात्राकाराभवतिनतुभोगाद्यासक्तस्येति स्पष्टमेव भाष्येतु समाधौअंतःकरणेव्यवसायात्मिकाबुद्धिर्नभवतीति
व्याख्यातंपक्षसमाध्यनुष्ठानार्थमेवनिश्चयात्मिकानेषांबुद्धिर्नभवतीतिव्याख्येयं ४४ ॥

त्रै

कस्मादेवं समाधौ स्थिरबुद्धिर्भवतीत्यत आह त्रैगुण्येति त्रैगुण्यं गुणत्रयप्रकार्यं ऊर्ध्वमध्याधोगतिरूपं संसरणं तदेव प्रकाश्यत्वेन विषयो येषां तादृशाः कर्मकाण्डपरा वेदाः त्वं तु निस्त्रैगुण्यो भव ऊर्ध्वगतावपि विरक्तो भवेत्यर्थः वक्ष्यति च न तद्गुणप्रधानं गतित्रयं ऊर्ध्वं गच्छन्ति सत्त्वस्था इति दिव्येभ्योऽपि विषयेभ्यो विरक्तः समाधावधिक्रियत इति भावः किं च तत्त्वेणोपायो निस्त्रैगुण्य इत्यत आह निर्द्वन्द्व इति सुखदुःखमानापमानौ शत्रुमित्रे शीतोष्णे तोयाहत्यादीनि द्वन्द्वानि सप्रतिपक्षद्वयरूपाणि तेभ्यो निर्गतो निर्द्वन्द्वः सर्वत्र समबुद्धिरित्यर्थः ननु बाध्यमानमुष्णादिकं कथं शीतादिवत् सोढुं शक्यमत आह नित्यसत्त्वस्थ इति नित्यं सर्वदा सत्त्वं धैर्यं सत्त्वगुणो वा तदाश्रितो भव त्वं धीरो हि सर्वं सोढुं शक्नोति सात्त्विको वा प्रारब्धकर्मोपस्थापितमिदं दुःखमपरिहार्यं किमुत मनसैवेति जानन् सर्वं सोढुं शक्नोत्येव न त्वप्रत्यन्तदुःसहं तथादि दुःखं कथं निस्त्रैगुण्येन सर्वथा प्रवृत्तिरूपेण सोढुं शक्यमत आह निर्योगक्षेम इति अप्राप्तस्य प्राप्तिर्योगः प्राप्तस्य रक्षणं क्षेमः एतद्द्वयमपि प्रारब्धकर्माधीनमिति ततोऽपि निर्गत इत्यर्थः ततः हेतुः यतः आत्मवान् जितचित्तः स एव हि सर्वोऽप्यापत्सु अनाकुलो नित्यं तत्प्रतपानिरुपमश्रम भवतीति त्वमप्येतादृशो निस्त्रैगुण्यो भवेत्यर्थः ४५ ननु आत्मवत्त्वं चित्तशुद्धौ सत्यामेव भवति सा च सकलवेदोक्तकर्मानुष्ठानसा

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन । निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ४५ यावानर्थ उदपाने
सर्वतः संप्लुतोदके तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ४६

ध्यापतो निस्त्रैगुण्यत्वं दुर्लभमित्याशंक्याह यावानिति सर्वतः संप्लुतोदके महति उदपाने जलाशये पुरुषस्य यावानर्थः यावत्स्नानपानादिकं प्रयोजनं घटमात्रजला निर्वर्त्यं भवति न कृत्स्नं जलाशयस्य व्यापनिर्वर्त्यं तावानेवार्थो विजानतो युक्तस्य चित्तस्य ब्राह्मणस्य ब्रह्मबुधस्य सर्वेषु वेदेषु वेदैकदेशोपनिषद्वचनमात्रनिर्वर्त्यो भवति न कृत्स्ने वेदार्थानुष्ठाने स्व च सिध्यर्थमपेक्षते एकेन जन्मना कृत्स्न वेदार्थानुष्ठानासंभवात् एतद्धि केन जन्मान्तरीयेण वाजपादिना चित्तशुद्धौ सत्यामुपनिषद्वचनान् निस्त्रैगुण्यता संभवतीति भावः दृष्टान्तस्तु सर्वतः संप्लुतोदकस्थानीये आत्मज्ञाने पुरुषस्य तावानर्थः कृत्स्नोऽपि भवति यावान् अनेककूपरूपोदपानेष्वनीत्येषु सकलवेदोक्तकर्मसमनु
२ ष्ठितेषु भवति ब्रह्मानंदे क्षुद्रानंदानामन्तर्भावात् तथा च श्रुतिः ज्ञाने सर्वकर्मफलान्तर्भावं दर्शयति यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेदेति वक्ष्यति च सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते इति गंगातुल्यज्ञानोदयात् प्रागेव कूपोपमानि कर्माणि कर्तव्यानीति भावः इति व्याचख्युः अस्मिन्पक्षे पूर्वार्द्धे अनेकस्मिन्यथा ॥

तथा भवतीति पदचतुष्टयाध्याहारः यावानर्थ तावानेतयोरनुषंगश्च दार्ष्टान्तिके द्रष्टव्यः १

ननु ममापि ग्रौपनिषदात्मज्ञानार्थिनः शम एवेष्टस्तत्कथं मां युध्यस्वेति प्रेरयसीत्याशंक्याह कर्मण्येवेति कर्मण्येवाधिकारो न ज्ञाननिष्ठायां
मा फलेषु संगोस्त्विपप्रकृष्यते कर्मफलं स्वर्गपश्वादि हेतुः कर्मसु प्रवर्तकं यस्य तादृशो मा भूः अकर्मणि कर्माकरणेपि तव संगो मास्तु ४७ एतदेव
विवृणोति योगस्थ इति योगस्थः सन् संगं फलतृष्णां कर्तृत्वाभिमानं च त्यक्त्वा कर्माणि ज्ञानार्थं कुरु हे धनंजय सिध्यसिध्योः कर्मफलस्य विविदिषा
देः सिद्धौ असिद्धौ वा समो हर्षविषादशून्यो भूत्वा कर्माणि कुर्वीति संबंधः इदमेव सिध्यसिध्योः समत्वं योग इत्युच्यते ४८ इदमेव बुद्धियोगं स्तौ
ति दूरेणेति कर्मफलकामेन क्रियमाणं बुद्धियोगात् पूर्वोक्तान्निष्कामात्कर्मणः दूरेण हि प्रसिद्धं अवरं अत्यंतमनिकृष्टं अतो बुद्धौ योगरूपायां त
त्फलभूतायां सांख्यरूपायां वा तन्निमित्तं शरणं रक्षितारं आश्रयं वा ईश्वरमन्विच्छ प्रार्थयस्व तत्प्रीत्यर्थं कर्माणि कुर्वित्यर्थः यतः फ
लहेतवः फलमेव हेतुः प्रवर्तकं येषां ते तादृशाः फलतृष्णावंतः कृपणाः दीनाः भवंतीति यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृ

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि ४७ योगस्थः कुरु कर्माणि संगं त्य
क्त्वा धनंजय सिध्यसिध्योः समो भूत्वा समत्वं योग उच्यते ४८ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय बुद्धौ शरणम
न्विच्छ कृपणाः फलहेतवः ४९ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलं ५०

पण इति ४९ किं च बुद्धीति बुद्धियुक्तः समत्वबुद्धियुक्तः योगाय समत्वबुद्धियोगाय युज्यस्व घटस्व योगः सिध्यसिध्योः समत्वबुद्धिः कर्मसु
बंधकेष्वपि कौशलं बंधनिवर्तकत्वसंपादनं ननु बुद्धियुक्तैः कर्मभिः दुष्कृतं त्यजतु धर्मेण पापमपनुदतीति श्रुतेः सुकृतं तु सजातीयत्वे
नन दुःपरिहरमिति कथं उभे सुकृतदुष्कृते जहातीत्युच्यते सत्वशुद्धिज्ञानोत्पत्तिद्वारेति श्रीच अर्वाच तु दुष्कृतत्यागमुक्तरीत्याभ्युपेत्य
फलत्यागात्सुकृतत्यागोपि कर्मयोगिनो भवतीदुष्कृतफलवन्मोक्षप्रतिबंधतत्फलस्यानुत्पादात् यत्तु श्रौपसंवोक्तम् दृष्टनि
दर्शनेन नांतरीयकं सुकृतफलमुक्तं न तत्फलत्वेनोपपद्यते नांतरीयकत्वादेव तस्मात्फलद्वारा मोक्षप्रतिबंधके क्रियमाणे एव
सुकृतदुष्कृते कर्मयोगी जहाति ज्ञाने तु संचिते अपि ते जहातीति नयोर्विशेष इत्याहुः ५० ॥

श्री

शिव
१५

एतदेवाह कर्मजमिति बुद्धियुक्ताः समत्वबुद्धियुक्ताः क्रियमाणं कर्मजं फलं त्यक्त्वा मनीषिणो मनोनिग्रहसमर्था भूत्वा जन्मरूपेण बंधेन वियुक्ताः संतो ऽनामयं निरुपद्रवं पदं मोक्षाख्यं गच्छंति ५१ कदा मनीषिणो भवंतीत्यत आह यदेति तेन वमोहः इष्टानिष्ट वियोगसंयोगजपरितापजं वैक्लव्यं तदेव कलिलं मिव कलिलं कालुष्यं बुद्धिगतं बुद्धिर्यतितरिष्यती व्यतिक्रमिष्यति बुद्धिः प्रसन्ना भविष्यति तदा श्रोतव्यस्य शास्त्रभागस्य श्रुतस्य च निर्वेदं वैराग्यं गंतासि प्राप्स्यसि भावः मालिन्यायां बुद्धौ ऽप्रसन्नदुर्हितत्स्यापि पुण्यार्थस्यास्फुरणात् श्रोतव्यं श्रुतं च व्यर्थमेव तद्वत् शुद्धायामपि बुद्धौ सद्यः सर्वार्थस्फुरणात् तन्नपो वैयर्थ्यमित्युभयत्रापि तत्त्वान्निर्वेदं उचितः प्रसन्नाच बुद्धिर्निरहंता तुं योग्या भवतीति श्रवणादिकं त्यक्त्वा ध्याननिष्ठ एव भवेदिति ५२ ननु बुद्धिप्रसादोपि केन लिंगेन ज्ञेय इत्यत आह श्रुतीति श्रुतिभिर्नानाविधशास्त्रश्रवणैर्विप्रतिपन्ना आत्मा नित्यो ऽनित्यो वा नित्योपि कर्ता अकर्ता वा प्रकर्ता एकोनेको

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयं ५१ यदा ते मो
ह कलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ५२ श्रुतिविप्रतिपन्ना
ते यदा स्थास्यति निश्चला समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ५३ अर्जुन उवाच स्थितप्र
ज्ञस्य का भाषा समाधिस्थस्य केशव स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ५४ ॥ ॥

वेत्येवमादि संशयग्रस्तासतीयदाश्रसंभावनाविपरीतभावनानिरासएवंकं श्रुतितात्पर्यविषयीभूतेब्रह्मत्वेतेनिश्चलापुनः कुतर्कैर्नास्कंदनीविचिकित्सापरीत्तनिश्चयवती भूत्वा समाधौ निर्विकल्पे केप्रत्यगात्मनि अचला लयविक्षेपपरहिता स्थास्यति स्थिरा भविष्यति तदा योगं विवेकप्रज्ञां प्राप्स्यति निश्चलसमाधिलाभ एव बुद्धिप्रसादलिंगमिति भावः ५३ लब्धसमाधेः स्थितप्रज्ञापरनाम्नो लक्षणानि बुभुत्सुरर्जुन उवाच स्थितप्रज्ञस्येति स्थिता प्रत्यगात्मनि प्रतिष्ठिता प्रज्ञा यस्य तस्य स्थितप्रज्ञस्य समाधिस्थस्य समाधौ स्थितस्य का भाषा भाषणं वचनं अयमसौ परैर्भाष्यते इत्येकः प्रश्नः स्थितधीः स्थितप्रज्ञो ऽव्युत्थितः स्वयं किं प्रभाषेत कथं वदति कथमासीत कथं वा व्रजति विषयान्भुंक्ते इति प्रश्नत्रयं ५४॥

स्ते

कौम

एतेषां क्रमेणोत्तरमाह भगवान् प्रजहातीत्यादिना॥ अत्र यान्येव कृतार्थलक्षणानि तानि ज्ञानसाधनानीति मत्वाऽपदिश्यते स्थि-
तप्रज्ञलक्षणानि तेषां च कृतार्थेषु यत्नसाध्यत्वात् कृतार्थेषु स्वाभाविकत्वात् यथोक्तं उत्पन्नात्मप्रबोधस्य ह्यद्वेष्टृत्वादयो गुणाः भवं-
त्ययत्नतस्तस्य न तु साधकरूपिणः इति यदा योगी सर्वान् स्थूलसूक्ष्मकारणशरीरभोग्यान् कामान् काम्यमानान् विषयान् प्रक-
र्षेण सम्यक् जहाति त्यजति कीदृशान् कामान् मनोगतान् मनस्येव संकल्पविकल्पात्मके स्थितान् न तु बहिः यथोक्तमस्मत्पादाचार्यैः
दोषनिमित्तं रूपादयो विषयाः संकल्पकृता इति तत्र स्थूलानां कामानां त्याग एकांतसेवामात्राद्भवतीति सस्य वीपाने वलानांक वी-
रणग्रामस्य समनस्कस्य नाग्रहवासनामयाः स्वप्ने ये कामाः स्फुरंती तेषामपि त्यागो भगवद्ध्यानादिरूपसद्वासनाभ्यास-

श्रीभगवानुवाच प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्त-
दोच्यते ५५ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ५६

बलेन भवति ये त्वप्रसंहृतकरणे संप्रज्ञातसमाधिकाले द्विधाः कामाः संकल्पमात्रोपनतादहरविधासु प्रसिद्धास्तेषामपि त्या-
गोऽसंप्रज्ञातसमाध्यभ्यासबलेन भवति एवं त्रिविधान्कामान् त्यक्त्वा आत्मन्येवात्मस्वरूपे करसे आत्मना स्वेनैव स्वप्रकाशेन तुष्टः
बाह्यविषयनिरपेक्षो यदा भवति तदा स स्थितप्रज्ञ इत्युच्यते ५५ दुःखेषु शास्त्रपातेषु दुःखसाधनेषु प्राप्तेष्वपि अनुद्विग्नमना अप्र- तादृशु
चंचलमनाः वह्नयादिव यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यत इति सुखेषु सुखसाधनेषु सुरवंदनादिषु प्राप्तेष्वपि वि-
गतस्पृहो निर्वृतिकत्वाद्भवति अत एव वीताः रागभयक्रोधा यस्मात् स तथा न हि तस्यामवस्थायां रागादयो दुःखादयो
वा संभवति एवंविधः समाधिस्थः स्थितधीः स्थितप्रज्ञ उच्यते ५६

स्थितधीः किं प्रभाषेतेत्यस्योत्तरमाह यः सर्वत्रेति सर्वेषु धनदारजीवनादिष्वनभिस्नेह स्नेहवान् हि धनदारादिषु कलेषु सत्सु वि
लेषु वा हमेव विकलः सकलोस्तीति स्वसंदर्पी वेतः परानुसंधानरहितो जल्पति अयं तु न तथेति भावः तथा शुभं प्राप्य नाभिनंदति
संतुष्टो भूत्वा शुभप्रापयितारं न प्रशंसतीति तथा अशुभं प्राप्य न द्वेष्टि दुःखी भूत्वा अशुभप्रापयितारं न निंदतीत्यर्थः तस्य प्रज्ञा प्रतिष्ठिता ५७
किमासीतेत्यस्योत्तरमाह यदेति इंद्रियार्थेभ्यः शब्दादिविषयेभ्यः प्रारब्धकर्मवशेन व्युत्थितोपि योगी द्वैतदर्शनादुद्विग्नः सन् विरो ।२।
धसंस्कारप्राबल्यात् पुनः समाधिमनुतिष्ठत्येवास्तेत्यर्थः शेषं स्पष्टं ५८ ननु विषयेभ्य इंद्रियाणां निवृत्तिश्चेत् स्थितप्रज्ञ
लक्षणं तर्हि मूढालसयोगिनामपि वैशाद्याद् व्याधिनां स्तीति सर्वोपि स्थितप्रज्ञ एवेत्याशंक्याह विषया इति सत्यं देहिनो देहाभिमानवतो मू
ढस्य तु स्यादेतन्निराहारस्येंद्रियैर्विषयाननाहरतोऽभुंजानस्य विषयाः विनिवर्तंत एव तथापि रसवर्जं रसो भोगरागस्तद्वर्जं

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ यदा संहरते चायं कूर्मोंगानीव स
र्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ५८ । विषया विनिवर्तंते निराहारस्य देहिनः रसवर्जं र
सोप्यस्य परं दृष्ट्वा निवर्तते ५९ यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ६०

निवर्तंते तथापि सूक्ष्मरूपेण रागोस्तीति रागमूलस्यात्मानात्माभ्यासादाहान्नासौ स्थितप्रज्ञ इत्यर्थः अस्यैव पुनः परं दृष्ट्वा आत्मानं साक्षात्कृ
त्य निराहारस्य बाह्यादीनि निगृह्णतः रसोपि निवर्तते मूलाज्ञानदाहादिति अस्ति सुप्तादेः समाधिस्थस्य च महान् विशेष इति भावः प्राचस्तु री
तिः काष्ठतपस्विनो वा मूढस्यापि विषयाननाहरतो रसवर्जं विषया विनिवर्तंते तस्यैव परं दृष्ट्वा स्थितस्य रसोपि निवर्तते इति व्याच
ख्युः ५९ किंच सुप्तादेरिंद्रियाणि अज्ञानात्स्वयमेव लीयंते समाहितेन तु तानि कूर्मेणांगानीव स्वेच्छया संह्रियंते एतच्चात्यंतायास
साध्यमित्याहुः यततइति विपश्चितः शास्त्राचार्योपदेशवतो यततोपि समाधिसिध्यर्थं यतमानस्यापि पुरुषस्य इंद्रियाणि
कर्तृणि मनः प्रतीचि स्थिरीक्रियमाणं कर्मीभूतं हरंति विषयप्रवणं कुर्वंतीत्यर्थः प्रमाथीनि यथा वहवोऽश्वारा वने एकं पुरु
षं प्रमथ्य तस्य वित्तं हरंति यतः प्रसभमतिशयेन प्रमथनशीलानि ६० ॥

यद्यप्येवं तथापि तानि नियंतव्यान्येवान्यथास्थितप्रज्ञत्वस्यैवासिद्धिरित्याह: तानीति संयम्य वशीकृत्य युक्तः सन्नद्धः मत्परः अहमेव सर्वे
षां प्रत्यगात्मा परः स्त्र्यादिभ्यो बाह्येभ्यो देहेंद्रियादिभ्यश्चांतरेभ्यश्च बहिः प्रियः तमः यस्य स मत्परः सन्नासीतेति हि यस्माद्वशे प्रज्ञापां
शोभं स्पष्टं ६१ यदा पंचावतिष्ठंते ज्ञानानि मनसा सह बुद्धिश्च न विचेष्टते तामाहुः परमां गतिमिति श्रुतौ इंद्रियमनोबुद्धीनां निग्रहे प
रमपदप्राप्तिरित्युक्तं तत्र उपसंहृतकरणस्य बाह्यान् शब्दादीन् गृह्णतो मनोमात्रेणावस्थितस्य योगिनो मनसोऽनिग्रहे किं स्यादि
त्याह ध्यायतइति बाह्यान् विषयान् शब्दादीन् ध्यायतश्चिंतयतः पुंसः पुरुषस्य तेषु शब्दादिषु संगः संबंधो जायते बाह्यार्थेभ्यो
निग्रहीतेभ्योऽपि इंद्रियाणि मनोदोषात् पुनर्बाह्यार्थान् गच्छंतीत्यर्थः ततः संगात्कामः तस्मिन् विषयेऽभिलाषः संजायते का
ति. मात्कुतश्चिद्धेतोः प्रतिहतादभिज्वलनात्मा क्रोधोऽभिजायते ६२ ततः क्रोधात्संमोहः कार्याकार्यविवेकाभावो भवति ततः स्मृति

तानि सर्वाणि संयम्य युक्त आसीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ६१ ध्यायतो विषयान्पुंसः सं
गस्तेषूपजायते संगात्संजायते कामः कामात्क्रोधोऽभिजायते ६२ क्रोधाद्भवति संमोहः संमोहात्स्मृतिवि
भ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ६३ रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् आत्मवश्यै
र्विधेयात्मा प्रसादमधिगच्छति ६४

विभ्रमः शास्त्रार्थानुसंधानस्य विभ्रंशः स्वरूपं चलनं भवति स्मृतिभ्रंशाद्बुद्धिनाशः शास्त्रार्थस्य निश्चितिनिरोधनं भवति तस्मिंश्च शास्त्रजे
परोक्षज्ञानेऽपि नष्टे पुरुषो नश्यति पुरुषार्थायोग्यो भवति यो हि तादृशः स नष्ट एवेति लोको वदति ६३ ननु विषयान् ध्यायतो वियो
गिनो सुखस्थाने प्रमाणस्वाभाव्यादिंद्रियाणां विषयेषु संगो दुष्परिहरस्ततश्चोक्तरीत्या तस्यापि नाशप्रसक्तिरित्याशंक्याह रागद्वेषे
ति विधेयात्मा किंकरीकृतमना आत्मवश्यैर्मनोधीनैरिंद्रियैः स्वामिनश्चितस्य किंकरीकृतस्य कामक्रोधहीनत्वात्स्वयम
पि रागद्वेषवियुक्तैः विषयान्यपि पतितान्नोदीनि वानास्यपाचरन्नुपभुंजन्नपि पुमांस्तत्र कामाद्यनुदयात् प्रसादं संक
ल्पपंकलेपप्रक्षालनेन मनसः स्वास्थ्यमभिगच्छति मनसः स्वास्थ्यमेव प्रत्यगात्मनः स्वास्थ्यं तस्य तद्गुणसारत्वात् अ
तिमनस्कमपि वाजितमनस्कं विषयसंगो न बाधते तो मनोजयोऽवश्यकर्तव्य इत्यर्थः ६४ ॥ श्रीव.
२

किंच चित्तस्य प्रसादे हि अस्य पुंसः सर्वदुःखानां काममूलकानां कामाभावात् हानिः परिहारो जायते कामानुदये हेतुमाह प्रसन्नेति हि
तस्मात् प्रसन्नचेतसः पुंसो बुद्धिर्व्यवसायात्मिका निश्चयः आशु शीघ्रं पर्यवतिष्ठते सुदृढो भवति तस्मिन्नसति प्रमाणाभावात् कामोदय इत्यर्थः
६५ समनस्कानामिंद्रियाणामनिग्रहे दोषमुक्तः बुद्धेः पर्यवस्थाने को दोष इत्यत आह नास्तीति अयुक्तस्य अवनमननयोरनासक्त
स्य बुद्धिर्व्यवसायात्मिका निश्चयो नास्ति प्रमाणविषयासंभावनायाः प्रमेयविषयासंभावनायाश्च अनिरासात् तथा अयुक्तस्य असमाहितमन
सः भावना वृत्त्याकारांतःकरणवृत्तिप्रवाहो नास्ति मनसश्चांचल्येन बुद्धेरपि चांचल्यात् अभावयतो ध्यानमकुर्वतो शांतिः सर्वदुःखो
परमश्च नास्ति चेतसो नवस्थितत्वेन दुःखावश्यंभावात् अशांतस्यानुपरतसर्वदुःखस्य सुखं प्रत्यगभिन्नानंदात्मकं कुतः न कुतश्चि
ते दुःखित्वादेव अशांतस्य अयुक्तस्येति पदं युजिर्योगः इत्यस्य रूपं द्वितीये युज समाधाविति तस्य तस्माद्बुद्धेः पर्यवस्थानमावश्यकं ६६

प्रसादे सर्वदुःखानां हानिरस्योपजायते प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ६५ नास्ति बुद्धिरयुक्तस्य न चायु
क्तस्य भावना न चाभावयतः शांतिरशांतस्य कुतः सुखं ६६ इंद्रियाणां हि चरतां यन्मनोनुविधीयते तदस्य
हरति प्रज्ञां वायुर्नावमिवांभसि ६७ तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता

तदभावे दोषमाह इंद्रियाणां हीति हि यस्मादिंद्रियाणां चरतां स्वस्वविषये प्रवर्तमानानां कर्मणि षष्ठी यत् मनो विकल्पमनः तोनुकूलीकृत्य वि
धीयते प्रवर्त्यते कर्मकर्तरि लकारः प्रवर्तत इत्यर्थः तदिंद्रियानुसारि मनः अस्य साधकस्य प्रज्ञां आत्मतत्त्वविषयां बुद्धिं हरति तस्याः म
नोनुसारित्वात् दृष्टांत स्पष्टार्थः अन्ये तु इंद्रियाणां मध्ये यदिंद्रियमनुलक्षीकृत्य मनः प्रवर्तते तदिंद्रियं अस्य साधकस्य मनसो
वा प्रज्ञां हरतीति योजयंति आत्मविषयां प्रज्ञां दुष्टमनोविषयः विषयां करोतीति भाष्ये व्याख्यालोचनीयं ६७ यततो ह्यपीत्यत्रोपक्रां
तमर्थं बहुधा उपपाद्य उपसंहरति तस्मादिति यस्मादिंद्रियाधीनं मनो मनोनुगा च प्रज्ञा तस्मात् हे महाबाहो यस्य यतेः इंद्रियाणि सर्वशः
सर्वप्रकारेण स्वकारणेन मनः न सासहितानीति यावत् इंद्रियार्थेभ्यः शब्दादिभ्यो निगृहीतानि भवंति तस्य प्रज्ञा प्रतिष्ठितेत्यभिविद्धि ६८

मा.भा.
भी.टी.
१८

यदापंचावतिष्ठंत इत्युदाहृतश्रुतेः तामाहुः परमां गतिमित्येवं चतुर्थपादं व्याचष्टे यानिशेति सर्वेषां भूतानामभक्तानां या निशेव निशा यस्यां मध्यंदिने उल्लूकादीनामंधा अप्यंधा एव सर्वे प्राणिनो भवंति तस्यां तस्मिन्प्रत्यग्ज्योतिषि संयमी इंद्रियमनोबुद्धीनां निग्रहणशीलो योगी जागर्ति इंद्रियादीनां दृष्टशक्तिलोपेपि अनुपरतदृक्शक्तिरेवास्ते तथा च श्रुतिः न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते ऽविनाशित्वादिति यस्यामविद्याख्यायां क्रियाकारकादिद्वैतस्वप्नवर्त्तिकायां सर्वाणि भूतानि जाग्रति निशीथे उलूकादयः स्वस्वव्यापारे प्रवर्त्तंते साऽविद्या पश्यतो मुनेः आत्मदर्शनवतो योगिनः प्रारब्धकर्मणा विदेहकैवल्यप्रतिबंधात् लेशतोनुवर्त्तमानाप्युत्था

यानिशासर्वभूतानांतस्यांजागर्तिसंयमी यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः ६९ ॥

न काले व्यवहरतोस्य गाढांधकारवती निशेव क्लेशकरा भवति अतिसुकुमारा हि योगिनः बाह्यव्यवहाराद् उद्विजंते नरा इव गाढांधकारे घरासंचारात् यथोक्तं योगभाष्ये अक्षिमात्रकल्पो हि विद्वानत्यल्पदुःखलेशेनाप्युद्विजत इति अत्र वार्त्तिकानि कारकव्यवहारे हि शुद्धं वस्तु न वीक्ष्यते शुद्धे वस्तुनि सिद्धे च कारकव्यापृतिस्तथा काकोलूकनिशेवायं संसारोऽज्ञात्मवेदिनोः यानिशा सर्वभूतानामित्यवोचत्स्वयं हरिरिति बुद्धतत्त्वस्य लोकोयं जडोन्मत्तपिशाचवत् बुद्धतत्त्वोपि लोकस्य जडोन्मत्तपिशाचवदिति न देवं किमासीतेत्यस्योत्तरं यदा संहरते चायमित्यादिना एतद्देनेन ग्रंथेन स्थितप्र

शिव
१८

ननु प्रजहाति यदा कामान् इंद्रियाणींद्रियार्थेभ्यो निगृहीतानीत्यादिना: सकृतविशेषाणां प्रहाणेनेंद्रियादीनां प्रत्याहरण
मुक्तं न च न तेषामात्मन: पृथक्सत्वमस्तीति सिद्धं न च नेह नानास्ति किंचनेत्यादिश्रुत्या तेषां बाधान्न तदस्तीति वाच्यं इहेति प्रतीयमानत
निषेधान्न हि इह भूतले घटो नास्तीत्युक्ते घटस्य स्वरूपं निषिध्यते किंतु तस्य भूतलसंबंधमात्रं तस्मात्कामानां पृथक्सत्वमस्त्येतो
नाद्वैतसिद्धिरित्याशंक्य सदृष्टांतं परिहरति आपूर्यमाणमिति प्रविशंतीभिरद्भिरापूर्यमाणमपि अचलप्रतिष्ठं अनुद्रिक्तं वृद्धिही
नत्वात् एवं निर्गच्छंतीभिरद्भिः क्षीयमाणमपि अचलप्रतिष्ठं ह्रासहीनत्वादित्यपि बोध्यं एवंविधं समुद्रं यद्वत् आत्मप्रभवा आप: प्रवि
शंति तद्वत् यं पुरुषं कामैरापूर्यमाणं हीयमानं हि अचलप्रतिष्ठं निर्विकारं वृद्धिह्रासहीनत्वात् आत्मप्रभवा: सर्वे कामा: प्रवि
शंति स एव शांतिं मोक्षं आप्नोति कदु:खोपशमं प्राप्नोति न तु कामकामी विषयार्थी अयं भाव: कूटस्थादात्मन: सर्वस्य उत्पत्तिस्त

आपूर्यमाणमचलप्रतिष्ठं समुद्रमाप: प्रविशंति यद्वत् तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी ७०

त्रैवचलयतीति सर्वश्रुतिस्मृतिप्रसिद्धं तेन कामानां प्रहाणेनेंद्रियाणां प्रत्याहरणं स्मर्यमाणं न तेषां परमार्थत: पृथक्सत्वं सा
धयति बहुप्रमाणविरोधात् किंतु पामरप्रसिद्धं पृथक्त्वमभिप्रेत्य प्रहाणादिकमुक्तं प्रविलीनत्वे नैव व्याख्येयं यथाग्नये स्विष्टकृते अष्टा
कपालं निर्वदित्यादौ निर्वयतिनापाग उच्यते ननु श्रोतार्थ: मात्रं तद्वदिहापि त्वेयं नेह नानास्तीत्यपि इह परिदृश्यमाने प्रपंचे आत्माति
रिक्तो नाना किमपि नास्तीत्येवंपरतया व्याख्येयं तथा च आत्मैवेदं सर्वं ब्रह्मैवेदं सर्वं सर्वं खल्विदं ब्रह्मेत्यादय: श्रुतिवादा: संगच्छंते
आत्मनि कल्पितस्यास्य चात्रैव निषेधेनान्यत्र सत्वानुपपत्तेर्न कामानां पृथक्सत्वं वारंभणं विकारो नामधेयमिति कार्यस्य वा
गालंबनमात्रत्वश्रवणादित्यन्यत्र विस्तर: ७० [redacted]
त्वमस्तीति युक्त एव समुद्रदृष्टांत: यत्तु समुद्रात्पृथग्गंगाया: सत्वमस्तीति तत्र कार्यकारणासत्तातिरिक्तसत्ताया अभावात्वा २

स·भा·
भी·टी·
· १५

प्रासंगिकीमाशंकांपरिहृत्यव्रजेतकिमित्यस्यप्रश्नस्योत्तरमाह विहायेति पूर्वोक्तान्त्रिविधान्कामान्विहायय:चरतिविषयान्भुं
क्तेनिस्पृहस्सन्यतोनिर्ममः ममतावान्हिइदंममभूयादित्यन्यधनादावपिस्पृहां करोतिनिर्ममोपिकुतः यतोनिरहंकारः नह्यहंका
रमृत्यस्यसुत्यादौममताद्दष्टातस्मादहंकारप्रविलयात्शांतिंमोक्षंप्राप्नोति अत्रयःसर्वत्रानभिस्नेहइतिसर्वत्रयच्छब्ददर्श
नात् साधनविधिपरएवायंग्रंथः अन्यथास्थितप्रज्ञस्यप्रकृतत्वात्तदनुवादार्थोयच्छब्दोऽर्थप्राप्नोतिकिंलोकेहिपरस्वभावक
थनेसएवंकरोतीतितच्छब्दएवप्रयुज्यतेनतुयच्छब्दः विधौतुयएवंकरोतिसइदंप्राप्नोतीतिद्वयोरपिप्रयोगोदृश्यतेलक्षण
कथनार्थत्वेपितत्रतात्पर्याभावाद्विधावेवपर्यवस्यतीतिदिक ७१ प्रतिपादितांकर्मयोगप्राप्यांसांख्यनिष्ठांफलेनस्तुवन्नु

विहायकामान्यःसर्वान्पुमांश्चरतिनिस्पृहः निर्ममोनिरहंकारःसशांतिमधिगच्छति ७१ एषाब्राह्मीस्थितिः
पार्थनैनांप्राप्यविमुह्यति स्थित्वास्यामंतकालेपिब्रह्मनिर्वाणमृच्छति ७२ इतिश्रीभगवद्गीतासूपनि
षत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेसांख्ययोगोनामद्वितीयोध्यायः २

पसंहरति एषेति एषास्थितप्रज्ञलक्षणप्रसंगात् कथिताब्राह्मीब्रह्मशब्देनात्रब्रह्मविदुच्यतेब्रह्मविद्ब्रह्मैवभवतीतिश्रुतेः यस्त्वे
वंब्राह्मीस्थितिः निष्ठांएतांनिष्ठांप्राप्यनरोनविमुह्यतिपुनर्मोहंनप्राप्नोति अस्यांअंतकालेपिस्थित्वेतिसहकज्ञातापीयंफल
वतीनतुपासनाभ्यवविराभ्याससापेक्षेत्युक्तंब्रह्मनिर्वाणमृच्छतिप्राप्नोति किंलोकांतरवत्गतिप्राप्यंब्रह्मनेत्याह निर्वाणमितिनि
र्वृतंवाणंगमनंयस्मिन्प्राप्येब्रह्मणितन्निर्वाणं तथाचश्रुतिः नतस्यप्राणाउत्क्रामंत्यत्रैवसमवलीयंतेब्रह्मैवसन्ब्रह्मा
प्येतीतिगतिमंतरेणरूपोपाधिप्रविलयमात्रात् घटाकाशस्यमहाकाशत्वप्राप्तिवत्जीवस्यब्रह्मप्राप्तिमाह अंतकालेपीत्य
पिशब्दात्योब्रह्मचर्यादारभ्यात्रतिष्ठतिसब्रह्मनिर्वाणंकैमुतिकन्यायेनप्राप्नोतीतिगम्यते अस्याध्यायस्यार्थः संग्रहोम

श्रीव
१५

धुसरूतेनश्रीपादेः ज्ञानंतत्साधनंकर्मसत्वसुद्धिश्चतत्फलंतत्
फलंज्ञाननिष्ठैवेत्यध्यायेस्मिन्प्रकीर्तितंफलं ॥

इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोः श्रीनीलकंठस्य कृतौ भारतभावदीपे भीष्मपर्वणि भगवद्गी
तार्थप्रकाशे द्वितीयोऽध्यायः २ एवंस्मिन्नध्याये एषातेभिहिता सांख्ये बुद्धिर्योगे त्विमांश्रृणु इति द्वे बुद्धी प्रदर्श्य व्यवसायात्मिका बुद्धिरिति श्लो
केन सांख्यनिष्ठावतां पाताशंका नास्ति कर्मयोगनिष्ठावतां तु सास्तीत्युक्त्वा यावानर्थ उदपाने इति सांख्यनिष्ठायां सर्वकर्मफलांतर्भावश्च वर्ण
तामेव प्रशमात्मिकां स्वाशयानुकूलां पश्यन्नर्जुन उवाच ज्यायसीति हे जनार्दन कर्मणो निष्कामकर्मयोगापेक्षया बुद्धिः सांख्यनिष्ठालक्ष
णं ज्ञानं ज्यायसी प्रशस्ततरा चेत्ते तव मता तत्तर्हि मां भेस्वहन्यापितुर्ध्यंतं घोरे बंधुवधाख्ये कर्मणि किं नु कुतो हेतोर्नियोजयसि पुनः पुनर्युध्य

अर्जुन उवाच ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन तत्किं कर्मणि घोरे मां नियोजयसि केशव १ व्यामि
श्रेणेव वाक्येन बुद्धिं मोहयसीव मे तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयां २ ॥

स्वेति वदन् १ ननु तव सांख्यनिष्ठायामनधिकारात्कर्मैव कुर्विति त्वां ब्रवीमि तत्राशंक्याह व्यामिश्रेणेति अविविक्तेनेव शब्देन विविक्तेऽपि बुद्धिदोषाद
विविक्तेनाश्रुत्वामीति सूचयति तेन वाक्येन त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेति क्वचिद्दनिष्ठां त्याजयसि कर्मण्येवाधिकारस्ते इति तामे
व च ग्राहयसि तथा निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान् भवेति च निवृत्तिमार्गमुपदिशसि धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न
विद्यत इति प्रवृत्तिमप्युपदिशसि न ह्येतन्मया युगपदुभयं स्थितिगतिवदनुष्ठातुं शक्यं अतो मम बुद्धिं मोहयसीव वस्तुतस्तु मम मोहनाश
यितुं प्रवृत्तोऽसीति इवशब्देनोच्यते तत्तयोर्मध्ये यदेकं प्रधानं मद्योग्यं तत् निश्चित्य वद येनानुष्ठितेनाहं श्रेयः कल्याणमाप्नुयात् २ ॥ राम

भ·भा
भी·
प·
२०

अत्रोत्तरं श्रीभगवानुवाच लोकेस्मिन्निति पुराद्वितीयाध्याये मया निष्ठा एकैव प्रोक्ता परंतु सा द्विविधा द्विप्रकारा एकस्या एव ब्रह्मनिष्ठाया प्रकार द्वयमुक्तमधिकारिभेदेन नतु ब्रह्मप्राप्तये परस्पर निरपेक्षमार्गद्वयमुक्तमित्यभिप्रायः हेऽनघ विशुद्धान्तःकरण मद्वचनस्यार्थं सम्यगालोचयेत्यर्थः तदेव प्रकारद्वयमाह ज्ञानयोगेनेति सांख्यानां प्रकृतिपुरुषविविक्तत्वं जानतां आत्मानात्मविवेकोत्तीनयोगः ज्ञानोपायो वेदान्तश्रवणमननं निदिध्यासनात्मकस्तेन ज्ञानयोगेन ब्रह्मणि निष्ठां परिसमाप्तिं सांख्याः प्राप्नुवन्तीत्यर्थः योगिनां सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यत इति उक्तलक्षणयोगवतां कर्मयोगेन संध्योपासनादिनिर्विकल्पकसमाध्यनुष्ठानांतस्तिष्ठ कर्मयोगपदार्थः तेन योगिनो ब्रह्मनिष्ठां प्राप्नुवन्तीत्यर्थः अयंभावः इह जन्मनि जन्मान्तरे वा ईश्वरप्रीत्यर्थमनुष्ठितैः कर्मभिर्विशुद्धसत्वो विवेकवैराग्यसमादिषट्कोपेतो मुमुक्षुः प्रत्यकावणचितः श्रवणमननाभ्यासेनैव कृतकृत्यो भवति स चेत्श्रवणादेः प्रागसमाहितचित्तस्तर्हि निदिध्यासनस्यापेक्षितकत्व

श्रीभगवानुवाच लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां ३ ॥राम॥

मुक्तं सोयं सांख्यमार्गः तथा सर्वाणि कर्माणि परमगुरावर्पयन् श्रवणमननात्मकविचारमन्तरेणैव केवलं श्रद्धावान् प्रतीचो निर्विशेषब्रह्मरूपत्वं गुरुवाक्यतो निश्चित्य संभावनादिदोषरहितं आचार्यो निर्गुणब्रह्मोपास्तिप्रकारमधिगम्य कर्मछिद्रेषु समाध्यभ्यासं कुर्वन्निष्कलं प्रत्यगात्मस्वरूपं साक्षात्करोति सोयं योगमार्गः तेन कृतायोगकौशलं तेषामस्तितेसांख्याः येषां तन्नास्ति ते योगिन इति अतएव द्विप्रकारा निष्ठा न तु द्वे निष्ठे इति भगवत्कृतम् यथोक्तं वशिष्ठेन द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव योगस्तत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणं असाध्यः कस्यचिद्योगः कस्यचित्तत्त्वनिश्चय प्रकारौ द्वौ ततो देवो जगाद परमः शिव इति चित्तादर्शनलोपलक्षितस्य ब्रह्मसाक्षात्कारस्य द्वौ क्रमौ चित्तादर्शिष्यालक्षणे ज्ञानमेव यथा रज्ज्वां सर्पादि सम्यगवेक्षणेनैव नश्यति न ध्यानेन तस्य सत्वलक्षणे योगएव यथा सत्यद्रग्ग

श्रीः
२०

अनयोः प्रकारयोरंगांगिभावमाह नकर्मणामिति कर्मणां यज्ञादीनां रंभात् अननुष्ठानान्नैष्कर्म्यं ज्ञाननिष्ठां नाश्नुते न प्राप्नोति विविदिषाति
पत्तेनेति श्रुत्या यज्ञादीनां विद्यांगत्वेन विधानात् ननु सत्वशुद्ध्यप्राधान्यात् कर्मणां विविदिषांगत्वमत्र गम्यते तेन विविदिषापाय यज्ञादी
नां सिद्धायां एनमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीति श्रुतेः प्रव्रज्यारूपमेव नैष्कर्म्यमिह ज्ञाननिष्ठासाधनं गृह्यते न ज्ञानं नैष्क
र्म्यमिति सिद्धिं समधिगच्छतीति योजनायाः परमामित्यादौ विवादेन द्रुह्वकस्य परमत्वविशेषणस्याभावात् न च कर्मयोगजनितचित्तशुध्य
भावे केवलात्संन्यासात्सिद्धिं समधिगच्छतीति योजनायां विप्रकृष्टयोर्ज्ञानकर्मणोः समुच्चयासंभवस्याभीष्टस्यासिद्धेः किमिति नैष्कर्म्यशब्दे
न ज्ञाननिष्ठा गृह्यत इति चेन्न त्यक्तुं गुणैः कर्म कार्यत इति वाक्यशेषान्नैर्गुण्यहेतु मुख्यं ज्ञानमेवेह नैष्कर्म्यपदार्थः ननु प्रव्रज्या विविदि
षति पत्तेनेत्यत्रोचितुं गमिष्यत्यग्रे तजिघासत्यसिनेत्यादाविव तृतीयान्तस्य प्राधान्ये धर्मेणैवान्वयात् अध्वादीनां गमनादाविव यज्ञादीनां कं

न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते न च संन्यसनादेव सिद्धिं समधिगच्छति ४

वेदन एवान्वयो ज्ञेयः एतमेवेति श्रुतिस्तु विविदिषासंन्यासाभिप्रायेण प्रवृत्ता एतं ह्येव तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लो
कैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीति ज्ञानपरिपाककार्यस्य जीवन्मुक्तिसुखार्थस्य याज्ञवल्क्यादिभिरनुष्ठितस्य विद्वत्संन्यासस्यापि
शाखे दर्शनात् असंन्यासिनो ज्ञानमेव नोत्पद्यत इति प्राचामाग्रहो विक्षेपककर्मत्यागरूपसंन्यासविषयः ननु कामाद्युपपदविधानमात्रविषयः
गार्गीवाचक्नवीशिष्टादीनामतथाविधानामपि ज्ञानोत्पत्त्यवगमादित्यास्तां तावत् कर्मभिरशोधितचित्तस्य मंदबुद्धेः रागद्वेषादिग्रस्तस्याप्रा
प्तात्मानात्मविवेकस्य नैष्कर्म्यप्राप्तिर्नास्तीति पूर्वार्द्धार्थः नन्वभयं सर्वभूतेभ्यो दत्वा नैष्कर्म्यमाचरेदिति केवलात्संन्यासादपि नैष्कर्म्यसिद्धिः
स्मर्यते तत्कथमुच्यते न कर्मणामनारंभान्नैष्कर्म्यमश्नुत इति न चेति कर्मजचित्तशुध्यभावे कृतादपि संन्यासान्मोक्षसिद्धिः उदाहृत
स्मृतिस्तु चित्तशुद्धिपूर्वकसंन्यासाभिप्राया नहि रागादिग्रस्तः सर्वभूतेभ्यः सर्वात्मना अभयं दातुमीष्टे तो पुत्रमुत्रं च संन्यसना

एतदेवप्रपंचयति नहीति अवशः कर्मजन्यशुद्ध्यभावात् अजितचित्तः कश्चिदपि जातु कदाचित्समाधिकालेपि क्षणमपि अकर्मकृत् कर्माणि कर्म
नेत्रस्पंदादीनि अकुर्वन् नहि प्रसिद्धं न तिष्ठति हि यस्मात्सर्वोपि लोकः प्रकृतिजैः गुणैः सत्त्वरजस्तमोभिः स्वभावप्रभवैः रागद्वेषादिभिर्वा कर्म
कायिकं वाचिकं मानसिकं वा कार्यते अवशः संतत्र प्रवर्त्यते ५ ननु एवं ध्यानेनैव चित्तशुद्धिमपि संपादयिष्यामीति किं कर्मभिरित्याशंक्या
ह कर्मेंद्रियाणीति यो विमूढात्मा रागाद्याक्रांतचित्तः कर्मेन्द्रियाणि वागादीनि संयम्य निगृह्य आस्ते एकांते ध्यानापदेशेनोपविश्य तिष्ठति स
मिथ्याचारः तस्य तदासनादिकं आचरणं मिथ्या अलीकं एव निःफलत्वात् तत्र हेतुः इंद्रियार्थान्मनसा स्मरन्निति यत् इन्द्रियार्थान्
शब्दादीन् श्रोत्रादिभिर्ग्राह्यान् मनसा च स्मरति अतो मिथ्याचारः स विषयानेव चिंतयन् योगनिष्ठमात्मनो लोके मिथ्यैव नटति अतः कपटी
त्यर्थः तस्मात्कर्मव्यतिरिक्तः चित्तशुद्ध्युपायो नास्तीति भावः ६ यस्तु सर्वस्मात् मिथ्याचारात् विलक्षणः पुरुषधौरेयः इंद्रियाणि मनसा स

नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ५ कर्मेंद्रियाणि संयम्य य आस्ते
मनसा स्मरन् इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ६ यस्त्विंद्रियाणि मनसा नियम्यारभतेर्जुन कर्मेंद्रियैः क
र्मयोगमसक्तः स विशिष्यते ७ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ८

हानियम्य रागद्वेषवियुक्तानि कृत्वा कर्मेंद्रियैः कर्मयोगमारभते हे अर्जुन सः कर्मफले स्वर्गादौ ऐहिके शब्दादौ असक्तः नासक्तो विशिष्यते
सर्वस्मादधिको भवतीत्यर्थः ७ नियतमिति यस्मादेवं तस्मात्त्वं नियतं संध्योपासनादि कर्मैव कुरु यद्वा नियतं नियमेन स्वकर्म नित्यका
म्यसाधारणं यत्पापविनिवर्तकस्वभावं तदेव कुरु हि यस्मात् अकर्मणः सकलकर्मेन्द्रियनिग्रहेण तद्द्वारेण चित्तजयस्य स्या
त्कर्मैव ज्यायः प्रशस्ततरं अपि च ते तव क्षत्रियस्य अकर्मणः सन्यासमपि चित्तशुद्धो सर्वकर्मत्यागिनः शरीरयात्रा देहव्यवहारः न प्रसिध्ये
त् भैक्ष्यचर्यायामनधिकारात् ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीति संन्यासविधायके वाक्ये राजा
ज राजसूयेन स्वाराज्यकामो यजेतेत्यत्र राजपदवत् ब्राह्मणपदस्य विवक्षितत्वाद्यर्थत्वात् चत्वार आश्रमा ब्राह्मणस्य त्रयो राजन्यस्य द्व
यो वैश्यस्येति स्मृतेश्च अन्यत्राप्युक्तं प्राज्यं राज्यमुखजानामयं धर्मो वै स्मृतं लिंगधारणं वा हुजानां नायं धर्मो विधीयते इति ८

रुजाना

ननु कर्मणा बध्यते जंतुरिति कर्मणां बंधकत्वस्मृतेः कथं मुमुक्षोः तत्र नियोजयसीत्याशंक्याह यज्ञार्थादिति यज्ञः परमेश्वराराधनं यज देव
पूजायामिति धात्वर्थानुगमात् तदर्थं यज्ञो वै विष्णुरिति श्रुतेर्विष्णुर्वा तदाराधनार्थं यत्कर्म ततोन्यत्र कर्मणि त्स्वर्गाद्यर्थे प्रवृत्तो यं लोकः कर्म
बंधनः कर्मणा बध्यते न त्वीश्वराराधनार्थेन अतस्तदर्थं ईश्वराराधनार्थं कर्म वर्णाश्रमोचितं हे कौंतेय मुक्तसंगः फलाभिलाषशून्यः
सन् समाचर सम्यक् कुरु ९ एतदेवार्थवादेन द्रढयति सहेति यज्ञैः सहेति सह यज्ञा वोपसर्जनस्येति पक्षे सादेशाभावः कर्माधिकृ
ताः इति यावत् प्रजास्त्रैवर्णिकाः अनेन यज्ञेन प्रसविष्यध्वं प्रसवो वृद्धिस्तां लभध्वं एष यज्ञः युष्माकं इष्टकामधुक् इष्टार्थप्रदकोस्तु
१० इष्टार्थप्रदकत्वमेवाह देवानिति भावयत तर्पयत अनेन देवताराधनरूपेण वः युष्मान् भावयंतु वृष्ट्यादिदानेन परस्परं भावयं
तो देवाश्च यूयं च श्रेयः परं प्राप्स्यथ ११ किंच इष्टानिति पश्वादींश्च वः युष्मभ्यं एभ्यो देवेभ्यस्तद्दत्तानेव व्रीहिपश्वाज्यादीन् अप्रदाय

यज्ञार्थात्कर्मणोन्यत्र लोकोयं कर्मबंधनः तदर्थं कर्म कौंतेय मुक्तसंगः समाचर ९ सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः अने
न प्रसविष्यध्वमेष वोस्त्विष्टकामधुक् १० देवान्भावयतानेन ते देवा भावयंतु वः परस्परं भावयंतः श्रेयः परमवाप्स्यथ ११
इष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः १२ यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्वि
षैः भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् १३

अकृत्वा देवतोद्देशेन द्रव्यत्यागात्मकं यागं नित्यनैमित्तिकरूपं वैश्वदेवाग्निहोत्रमातेष्ट्यादिरूपमकृत्वैत्यर्थः अदत्त्वा यो भुंक्ते स स्तेन एव १२ ये
तु यज्ञशिष्टाशिनः वैश्वदेवादिशेषान्नभोजनशीलाः संतः पंचसूनापाकरणेन ते मुच्यंते सर्वकिल्विषैः प्रमादकृतैः विहिताकरणनिमित्तैः ये
त्वात्मकारणात्स्वार्थमेव पचंति न तु पंचमहायज्ञार्थं ते पापाः स्वयंपापरूपा एव संतः पापमेव भुंजते तथा च स्मृतिः कंडनी पेषणी चुल्ली उ
दकुंभी च मार्जनी पंचसूना गृहस्थस्य ताभिः स्वर्गं न विंदतीति पंचसूनाकृतं पापं पंचयज्ञैर्व्यपोहतीति च श्रुतिश्च इदमेवास्यान्नस्याधार
णामन्नं यदि द्वाभ्यघते स य एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्रं ह्येतदिति मंत्रवर्णोपि मोघमन्नं विंदते अप्रचेताः सत्यं ब्रवीमि वध इत्स
तस्य नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादीति १३

जगच्चक्रप्रवृत्तिहेतुत्वादपि कर्मकर्तव्यमित्याह अन्नादिति अन्नात्रेतोरूपेण परिणतात् भूतानि प्राणिशरीराणि भवंति अन्नं च पर्जन्यात् एतत्प्रसिद्धमेव यज्ञाद्भवति पर्जन्यः अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः इति स्मृतेः यज्ञो देवताराधनत्यागात्मा धर्मः कर्मभ्यो यागहोमदानादिभ्यः समुद्भवतीति कर्मसमुद्भवः १४ कर्म ब्रह्मोद्भवं वेदोद्भवं वेदादेव धर्मप्रमाणं न तु पाखंडादिप्रणीतागमः ब्रह्म वेदोपि अक्षरसमुद्भवं अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेद इत्यादिश्रुतेः साक्षात्परमेश्वरादेवोत्पन्नः अतो न तत्र भ्रमविप्रलंभत्वादिदोषाक्रांतपाखंडादिवाक्यवत् प्रामाण्यशंकास्तीति भावः यस्मादेवं तस्मात्सर्वस्मिन् देशे काले चेवर्तमानं ब्रह्म वेदः एतेन वेदस्यानित्यत्वशंकाद्यस्य विमुक्तत्वं च दर्शितं नित्यं नियमेन यज्ञे प्रतिष्ठितं तात्पर्येण पर्यवसन्नं १५ भवत्वेवं ततः किं फ

अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः १४ कर्म ब्रह्मोद्भवं
विद्धि ब्रह्माक्षरसमुद्भवं तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं १५ एवं प्रवर्तितं चक्रं नानुवर्त
यतीह यः अघायुरिंद्रियारामो मोघं पार्थ स जीवति १६

लितमित्यत आह एवमिति भूतानामादौ वेदाधिगमस्ततः कर्मज्ञानं ततः कर्मानुष्ठानं ततो देवानां तृप्तिस्ततो वृष्टिस्ततोन्नं ततो भूतानि तेषां वेदाधिगम इत्येवंरूपं चक्रमिव चक्रं निरंतरमावर्तमानं जगद्यात्रानिर्वाहकं नानुवर्तयति नानुतिष्ठति सः अघायुः पापजीवनः इंद्रियारामो न तु धर्मश्रमः आत्मारामो वा मोघं व्यर्थं हे शमकादिवत् जीवति यस्त्विदं नानुवर्तयति स जगदुपकारको धन्य इति भावः तथा च श्रुतिः अथो अयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोको यदनुब्रूते तेन ऋषीणामथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छति तेन पितृणामथ यन्मनुष्यान् वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विंदति तेन पशूनां यदस्य गृहेषु श्वापदा वयांस्यापिपीलिकाभ्य उपजीवंति तेषां लोक इति १६ ॥ ॥ ॥

स्त्र्यादिष्वपि प्रीतिर्भवती स्यत उक्तं आत्मतृप्तश्चेति आत्मनैव परमानंदस्वरूपेण तृप्तो न तु मिष्टान्नादिना ननु मंदाग्निरपि २

एवमीश्वरेण वेदयज्ञपूर्वकं जगच्चक्रं प्रवर्तितम् तेनाधिकृतेनानुवर्तितव्यमित्युक्तं अस्याननुवर्तनेन च महान् प्रत्यवाय उक्तः सत्ववृत्तिविदस्तु अविस्त
श्रेदिति संभावनामाशंक्य परिहरति यस्त्विति आत्मन्येव रतिः प्रीतिर्यस्य न तु स्त्र्यादौ स्वतः तथात्मन्येवात्मनि प्रीतिः प्राप्तिमात्रस्यानोपाधिकस्यास्ति से
प्रत्युत तदर्थत्वेनैव स्त्र्यादेरन्नमतेनापि मिष्टान्नेन तृप्यति अत उक्तं आत्मन्येव च संतुष्ट इति महानग्निर्हि धातुवृद्धिजाठरोद्दीपनेन च कामयमा
नः सोपि यथाप्यमितस्ततो धावति न त्वात्मन्येव तुष्यति विद्वांस्तु रतितृप्तितुष्टीरात्मनैवानुभवति न स्त्र्यन्नधनादिभिरिति तस्य कार्यं कर्तव्यं
किमपि नास्ति क्रियाप्राप्यस्य कस्यचिदप्यर्थस्याभावात् १७ एतदेवाह नैवेति तस्यात्मरतेः कृतेन कर्मणा अर्थः प्रयोजनं नास्ति स्वर्गादे
लिप्साभावात् नो दृश्यचाक्रियासाध्यत्वात् नास्य कृतः कृतेनेति श्रुतेः अकृतो मोक्षः कृतेन कर्मणा नास्तीति श्रुतेरित्यर्थः अकृतेन वि

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते १७ नैव तस्य कृतेनार्थो नाकृते
नेह कश्चन न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः १८ तस्मादसक्तः सततं कार्यं कर्म समाचर असक्तो ह्या
चरन्कर्म परमाप्नोति पूरुषः १९ १९

कृतेन कर्मणापि अर्थो नरकादिरस्य कोऽस्ति अत्र कृताकृतशब्दौ मित्रामित्रपदवत् परस्परविरुद्धार्थवाचितया पुण्यपापवचने ये तु अकृतेने
तिभावे निष्ठां नित्याकरणात् गर्हितत्वरूपो वा प्रत्यवायप्राप्तिरूपो वा कश्चनार्थो विदुषो नास्तीति र्णयं वदंते तेषामप्यभावाद्वा कोऽपतेरप्युप
गमात् नित्यानां काले यदन्यद विहितं क्रियते ननु एवं प्रत्यवायोत्पादो वक्तव्य इति घटकुट्यां प्रभातं वृत्तांत आपद्यते अत्रोपपत्तिमाह
न चेति चो हेतौ यस्मात् अस्य आत्मरतेः सर्वभूतेषु चेतनाचेतनेषु उत्तममध्यमाधमेषु कश्चिदपि अर्थव्यपाश्रयः सुखभोगात्मकप्रयो
जनाभिसंबंधो नास्ति आत्मरतित्वादेव निष्कामत्वाद् दुःखपुण्यपापफलसंबंधो नास्तीत्यर्थः १९ यस्मान्निष्कामस्य कर्मलेपो नास्ति
तस्मात्त्वमपि असक्तः फलासक्तिशून्यः सततं सर्वदा कार्यमवश्यं कर्तव्यं कर्म नित्यनैमित्तिकं समाचर हि यस्मात् असक्तः कर्माचरन्
परं मोक्षं सत्त्वशुद्धिद्वारेणाप्नोति १९ ॥

म॰ भा॰
भी॰ प॰
॰ २३
गी॰ टी॰

अत्र शिष्टाचारं प्रमाणयति कर्मणैवेति कर्मणैव सह संसिद्धिं श्रवणादिसाध्यां ज्ञाननिष्ठां गंतुं आस्थिताः प्रवृत्ताः जनकादयस्ते हि श्रेष्ठाः
क्षत्रियाः न तु संन्यासेन ननु शुद्धचित्तस्य नास्ति कर्मापेक्षेत्याशंक्याह लोकेति लोकस्य संग्रहः स्वधर्मे प्रवर्तनं न तु स्वप्रयोजनाभा
वेपि केवल लोकसंग्रहार्थं चेत्कर्म कर्तव्यं तदा विदुषां ब्राह्मणानामपि संन्यासो न स्यात् यतीनेव संन्यासधर्मान् ग्राहयितुं तेषां
संन्यास इति चेत् अर्जुनेपि न तद्दण्डधारणमस्ति ननु क्षत्रियस्य संन्यासाधिकारो नास्तीति चेत् लिंगधारणेधिकाराभावेपि अ
रतस्य विभागादिवत् क्षेपक कर्मत्यागमात्रेऽधिकारात् वार्तिके सर्वाधिकारविच्छेदि ज्ञानं चेदभ्युपेयते कुतोधिकारनियमोत्था
पनं क्रियते बलादिति विद्वत्संन्यासे क्षत्रियादेरपि अधिकारस्य साधितत्वात् अतो लोकसंग्रहेण मुख्यं कर्म प्रयोजनमि

कर्मणैव हि संसिद्धिमास्थिता जनकादयः लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि २० यद्यदाचरति श्रेष्ठस्त
त्तदेवेतरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते २१ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन नानवाप्त
मवाप्तव्यं वर्त एव च कर्मणि २२ यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः मम वर्त्मानुवर्तंते मनुष्याः पार्थ
सर्वशः २३ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः २४ राम॥

ति चेत्सत्यं न मे पार्थास्ति कर्तव्यमिति स्वदृष्टांतेन अधिकारिकत्वादर्जुनस्यैवं नियोज्यतेन क्षत्रियमात्रमिति न तुष्यतु भवान् २०
२१ कर्मणि वर्त एव अहं कर्म करोम्येवेत्यर्थः २२ यद्यहं कर्मणि न वर्तेयं तर्हि मनुष्याः मम वर्त्म अनुवर्तेरन् अनुवर्तेरन् कर्म न कुर्वीरन्नि
त्यर्थः अतंद्रितः अनलसः सर्वशः सर्वप्रकारैः २३ ततः किमित्यत आह उत्सीदेयुरिति यद्यदाचरतीत्यादेरपरा योजना केवलं
लोकसंग्रहं पश्यन् न कर्तुमर्हसि अपितु श्रेष्ठाचारत्वादपीत्याह यद्यदिति तथा च मम श्रेष्ठस्य यादृश आचारस्तादृश एव मद
नुवर्तिना त्वया अनुष्ठेयः न स्वोत्कर्षेणान्यदित्यर्थः कीदृशस्तव आचारो यो मयानुवर्तनीय इत्याशंक्याह न मे पार्थेत्यादि त्रि
भिः श्लोकैः स्पष्टार्थं न मिति मधुसूदनश्रीपादाः २४

सो
शिव॰
२३

यदिमद्दृशा एवं त्वं कृतार्थोसि तथापि परानुग्रहार्थं कर्माणि कुर्वित्याह सक्ताइति कर्मणि कर्मफले कुर्वन्ति कर्माणि निर्दोषः असक्त इति
छेदः विद्वान् अज्ञानां कर्मस्वासक्तानां बुद्धिभेदं बुद्धेश्चालनं न जनयेत् नोत्पादयेत् किंतु तान् सर्वाणि जोषयेत् सेवयेत् कथं युक्तोऽप्र
द्यो भूत्वा समाचरन् २६ अविद्वान् कथं कर्मसु सज्जत इत्यत आह प्रकृतेरिति प्रकृतेः पारमेश्वर्याः सत्त्वरजस्तमोगुणात्मिकायाः देवात्म
शक्तिं स्वगुणैर्निगूढामिति श्रुतिप्रसिद्धायाः शक्तेर्गुणैः कार्यकारणसंघातात्मकैः क्रियमाणानि कर्माणि अहंकारेण स्वस्मिन्नध्या
५ सेन मूढस्तदीयान् कर्तृत्वादीनात्मकर्मत्वेन पश्यन् आत्मनश्च असंगानंदसंविद्रूपमपश्यन् आत्मा अस्यैव कारणे विमूढश्चासावात्मे
ति विग्रहः अहं कर्माणि कर्मणां कर्तेति मन्यते कर्तृत्वाध्यासेन कर्ताहमिति निश्चितप्रत्ययः तेन न लेपकाद्यपनिष्ठात्वे लर्यन्तु नामि

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं २५ न बुद्धिभेदं जनयेदज्ञा
नां कर्मसंगिनां जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् २६ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः
अहंकारविमूढात्मा कर्ताहमिति मन्यते २७ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा गुणेषु वर्तन्त इ
ति मत्वा न सज्जते २८ प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत् २९

तिषष्ठनिषेधः अन्यथात्वप्रत्यये कर्मणः कर्ताहमिति षष्ठ्याभावं २७ एवं सक्तस्य कर्माचरणं प्रदर्श्यासक्तस्य तद्दर्शयति तत्त्वविदिति गुण
कर्मविभागयोः गुणविभागस्य कर्मविभागस्य च तत्त्वविदिति भाष्यं नाहं गुणात्मक इति गुणेभ्य आत्मनो विभागः नाहं कर्मात्मक इति
कर्मभ्यश्चात्मनो विभागस्तयोस्तत्त्वं वेत्तीति श्रीधरः मधुसूदनस्तु गुणा देहेंद्रियांतःकरणादीनि अहंकारास्पदानि कर्माणि तु तेषां
व्यापारभूतानि ममकारास्पदानि गुणकर्मेति द्वंद्वैकवद्भावः विभज्यन्ते सर्वेषां जडानां भासकत्वेन पृथग्भवतीति विभागः स्वप्रकाश
ज्ञानरूपोऽसंग आत्मा गुणकर्मविभागश्चेति द्वंद्वः तयोर्जडाजडयोस्तत्त्वं यो वेत्ति स गुणाः करणात्मकाः गुणेषु विषयेषु वर्तं
त इति मत्वा न सज्जते कर्तृत्वाभिनिवेशं न करोति न्यायार्थः गुणविभागस्य कर्मविभागस्य च तत्त्वविदिति पक्षे गुणकर्मणोरित्येव सिद्धे वि
भागपदं व्यर्थमिति यद्यपि तत्त्ववित् सगुणागुणेषु वर्तन्त इति मत्वा गुणविभागे कर्मविभागे च न सज्जत इति योजनागुणानां

म.भा.
भी.प.
गी.टी.
२४

सत्वरजस्तमसां विभागः बुध्यहंकारमनांसीन्द्रियविषयरूपेण विभक्तावस्थानं तस्मिन्न सज्जते इदमहमिति न मन्यते तथा हि शरीरे हं गौरो
स्मि हस्ताभ्यामाददे मयेदमात्तमिति चक्षुषा दृष्टमपेदं दृष्टमिति अहंकारेणाभिमतेममेदमित्यभिमन्यते बुद्धौ विक्रियमाणायामहं सु
खीति च सर्वेषु बुद्ध्यादिषु विभज्य गृह्यमाणेष्वन्येष्वपि प्रत्येकं प्रत्यक्कमेकमध्यस्याहमिदमिति ममेदं कर्मेति च मन्यते एतेन कर्मविभागो
प्याविरपके त्वेन व्याख्यातः अन्यथा चिदात्मन्येवग्रादानादिकर्तृत्वं दुःखादिमत्वं चापतति अयं च कर्मविभागः स्फुटमपि दर्शितः अं
धो मणिमविंदत्तमनंगुलिरावयत् अग्रीवः प्रत्यमुंचत्तमजिह्वो असश्चतेति अंधः स्वयं प्रकाशहीनोपि चक्षुरादिर्मणिं रूपादिकं विषयं अ
विंदत् प्रकाशयति अंगुलिः काष्ठकोष्ठादिवत् जडत्वात्स्वयं कर्म कर्तुमशक्तोपि पाण्यादिः आवयत् आसीव्यत विषये उपाधत्ते
अग्रीवश्छिन्नशिरस्कवन्निर्जीवोहंकारस्तं प्रत्यमुंचत ग्रीवायां धारयतिमयेदं लब्धमिति मन्यते अजिह्वो धीधातुः जडत्वात्स्वग
तसुखदुःखयोः घटद्रवस्वगतरूपादेः प्रकाशने असमर्थोपि अहं सुखी दुःखीति चानुभवति तथा च अस्मानात्मवर्णो नो
र्पिधात्मयन्तः स्या हन्तेष्वहंकारादिषु तत्कर्मसु चाभिमानादिषु कुसुमेषु सूत्रमिवानुवर्तमानं आत्मानं तेभ्यः पृथग्भूतं
ज्ञानं गुणाधीश्वरत्वादयः गुणेषु दुःखरूपादिषु वर्तते न तत्वात्मेति मत्वा न सज्जते हमेव हस्तादिसंघातरू
पो ममैवेदमादानादिकं कर्मेति न शक्तो भवतीत्यर्थः २८ एवं सक्तासक्तरूपांल्लिकर्माणि अविभज्य स
क्तकर्मानुवादपूर्वकं न बुद्धिभेदं जनयेदज्ञानामित्युपक्रांतमुपसंहरति प्रकृतेरिति गुणैरहं
कारादिभिः स्वस्मिन्नध्यस्तैः संमूढाः एकीभावेनाभेदाध्यासेन मूढास्तु प्रकृतेः प्रकृ
तिसंबंधिषु गुणेषु देहादिषु कर्मसु गमनादिषु च सज्जंते अहमपवृत्तौ णो म
मैवेदं यज्ञादिकं कर्मेति सज्जंते सक्ता भवंति तानात्मतत्वादकृत्स्नविदः आ
त्मतत्वमहानात् आत्मविदिकृत्स्नवित् आत्मनो वा अरे दर्शनेन
श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमिति श्रुतेः मंदान
शास्त्रार्थग्रहणासमर्थान कृत्स्नविदात्मवित्तु वि
चालयेत् कर्मनिष्ठातोन प्रच्यावयेत् तेषां उभयभ्रष्टत्वापत्तेः प्रकृतेर्गुणैः संमूढा गुणानां कर्मसु सज्जंते इति प्राचां मो

शिव
२४

अस्तीति त्वं तु अस्मान्मुमुक्षुस्त्वं मयि सर्वान्तर्यामिणि सर्वाणि कर्माणि संन्यस्य समर्प्य अध्यात्मचेतसा आत्मन्यधिष्ठानस्य प्रवर्तकं शास्त्रं च अध्या
त्मं तत्र प्रवणेन चेतसा साक्षात्पार्थिवादिवन्मध्यमपदलोपी समासः आत्मानात्मविवेकवतेत्यर्थः ईश्वरप्रेरितोऽहं करोमीत्यनया बुद्ध्या नि
राशीः फलमनिच्छन्निर्ममो ममत्वाभिमानशून्यश्च भूत्वा युद्धस्व विगतज्वरो विशोकः सन् ३० ये म इति ये मे पित्त्वा(?) ... ममममं
तं अस्मत्याकर्मानुष्ठानमनुतिष्ठंति अनुवर्तन्ते मानवाः श्रद्धावंतः अनुसूयन्तो अत्र दोषमपश्यन्तः तेऽपि स्वकर्मभिर्धर्माधर्मैः मुच्यं
ते ३१ विपक्षे दोषमाह ये त्विति सर्वशब्दः ईश्वरवाची सर्वं समाप्नोषि ततोऽसि सर्व इति निर्वचनात् तस्य ज्ञाने विषये विशेषेण मूढान्
पारे हेलयापि तेईश्वरस्य ज्ञानेनो देहमात्रनिष्ठांस्तान् नष्टान्स्वर्गापवर्गभ्रष्टान् अचेतसः विवेकशून्यान् ३२ ननु ते चेत्तव मतं ना
नुतिष्ठन्ति तर्हि कथं तव नियंतृत्वमित्यत आह सदृशमिति स्वस्याः प्रकृतेः स्वकीयस्य प्राग्भवीयधर्माधर्मसंस्कारस्य सदृशमनुरूपं

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ३० ये मे मतमिदं नित्यमनुतिष्ठंति
मानवाः श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि कर्मभिः ३१ ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतं सर्वज्ञानविमूढांस्तान्विद्धि
नष्टानचेतसः ३२ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति ३३ इंद्रियस्ये
ंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ३४ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठि
तात् स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ३५ अर्जुन उवाच अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः अनिच्छन्नपि वार्ष्णे
य बलादिव नियोजितः ३६ श्रीभगवानुवाच काम एष क्रोध एष रजोगुणसमुद्भवः महाशनो महापाप्मा विद्ध्येनमिह वैरिणं ३७

ज्ञानवानपि चेष्टते किमुत मूर्खः पश्वादिभिश्चाविशेषादिति न्यायात् तस्मात् प्रकृतिं यांति अनुसरंति भूतानि प्राणिनः तत्र मम वान्यस्य वा निग्रहः
किं करिष्यति न किमपि अहमपि पूर्वकर्मापेक्षयैव तान्प्रवर्तयामीति भावः ३३ एवं तर्हि पुरुषस्य स्वातंत्र्याभावाद्विधिनिषेधशास्त्रवैय
र्थ्यमित्याशंक्याह इंद्रियस्येति द्विर्वचनं वीप्सायां प्रतींद्रियं सर्वेष्वर्थेष्वित्यादो वचनाद्दोव विषये रागद्वेषौ अनुकूले रागः प्रतिकूले द्वेषश्च
व्यवस्थितौ नियतौ सर्वं द्योतत् तत्र तयोर्वशं न गच्छेदिति शास्त्रेणैवानुक्तापुरुषस्य च तदनुष्ठाने स्वातंत्र्यमस्तीत्यर्थः तौ रागद्वेषावेवास्य
प्राणिनः परिपंथिनौ इष्टद्वारेण प्रवर्तकत्वात् ननु ईश्वरस्य परिपंथित्वात् तस्य वैषम्यादिदोषापत्तेः अयं भावः यथा दुष्टेन स्वाज्ञो
ल्लंघनेनापराधेन कुपितो राजापराधिनं हि निगडादिना गृहीत्वा तं स्वापराधानुरूपं अनिष्टान्प्रवर्तयति स एव वा यथा तेनेन दमानेन प्रसादित

भा॰गी॰
भी॰प॰
२५

एवंतेषामेवमष्टानामाधिपत्ये नियुक्ते एवं पूर्वकर्मानुसारी ईश्वरो रागादिद्वारा पुरुषं बाधमानोपि विधिप्रतिषेधशास्त्रानुसारिणा
तेनैव भक्तिप्रधानप्रणिधानेनावर्जितः एतद्रागादिनये नियुक्तो तस्माद्विधिप्रतिषेधशास्त्रस्यानर्थकं पुरुषस्य स्वातंत्र्यसत्वात्
नापीश्वरे वैषम्यादिकं प्राप्तिकर्मापत्यत्वाद् इति ३४ यस्मादेवं तस्मात् श्रेयात् प्रशस्ततरः स्वस्ववृत्त्यनुरूपेण ईश्वरेण विहितत्वा
त् विगुणो हिंसादिमिश्रोपि किंचिदंगहीनोपि परधर्मात् हिंसादोषरहितपरधर्मापेक्षया स्वनुष्ठितात् सर्वांगोपसंहारेण सम्यगनु
ष्ठितादपि स एव श्रेयान् स्वधर्मे युद्धादौ निधनं मरणमपि श्रेयः विहितत्वात्परस्य धर्मो भैक्षचर्यादि भयावहः स्वविधेयस्य तव
निषिद्धत्वात् तस्मात्स्वजनत्रेणात्वया स्वधर्म एवानुष्ठेय इति भावः ३५ ईश्वरो धर्माधर्मौ रागद्वेषौ वा पुरुषस्य प्रवर्तको भवतद्
ति श्रुत्वा तन्मते स्वातंत्र्यं मन्वानो अर्जुन उवाच अथ केनेति केन ईश्वरादीनामन्यतमेनान्येन वा प्रयुक्तः प्रवर्तितः सन्नयं पुरुषः पापम
निच्छन्नपि चरति करोति अनिच्छन्नपि अनेन रागद्वेषयोः प्रवर्तकत्वं निरस्तं सति हि रागे इच्छा भवति अतः इच्छाया अभावाद्रागाभावः
रागस्याप्रवर्तकत्वे तन्मूलस्य तत्संस्कारहेतोर्धर्माधर्मयोः प्रवर्तकत्वं तत् अन्यतत्सापेक्षस्य ईश्वरस्यापीति सर्वेषामाक्षेपः त
तस्मान्मुख्यं प्रवर्तकं यत्तद्वाच्यमित्यर्थः बलादिव नियोजितः विष्टिगृहीत इवेत्यर्थः ३६ अत्रोत्तरं काममय एवायं पुरुष इत्यादि
श्रुतिसिद्धे श्रीभगवानुवाच काम एष इति एष प्रसिद्धः कामः सोकामः यत जायामे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कु
र्वीयेति स्वकेनेदं मे भूयादिति तोषाभिलाषहेतुरजःप्रतनवच्छिन्नत्वापादकोतिविशेषः स च चेतोरूप एव कामः संकल्प
इत्युपक्रम्य एतत्सर्वं मन इत्युपसंहारात् स एष कामः केनचिन्निमित्तेन प्रतिहतः क्रोधरूपेण परिणमते ततः क्रोधोभिज्व
लेनात्मापेष एव तमेनं मिहशत्रीतः स्थितं वैरिणं विद्धि कुतो वैरी यतः रजोगुणसमुद्भवः रजोरंजनात्मकः प्राकृतो गुणः त
स्य गुणो कार्यभूतो नस्मात्संगोत्ताद्वेवउद्भवोपस्य सरजः कार्यत्वाद्दुःखैकफलोपनतो वैरीयद्वा रजोगुणस्य लोभप्रकृ
त्यादित्वगणस्य समुद्भवो यस्मात् ननु विषयाभिलाषात्मकः कामः काम्यविषयार्पणेन शाम्यति विषयस्य तोर्जन्यनिश्चयेस्व
तएवं वा निवर्तते अर्थं धद्देवत्स्परं मामिषादित्याकांक्षाह महाशनो महापाप्मेति महत्तदनुमपारणीयं अशनमस्य सत
याचयोक्तं न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः
वः स्त्रियः नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेदिति तथा महापाप्मा अत्युग्रः स हि सहसा प्रबोधितो विनेति वर्तते तद्व

अस्य वैरित्वमेव विवृणोति धूमेनेत्यादिना उल्बेन गर्भवेष्टनेन जरायुणा तेन कामेन वृत्यमाणं ज्ञानं आवृतं आवरणीयस्य प्रविधानात् तदनु
गुणं दृष्टान्तत्रयं ज्ञेयं ३८ आवृतमिति ज्ञानं अन्तःकरणसत्वं हि धीधारित्येतत्स्वं मन एवेति स्मृतेः एतेन कामेन रजोगुणात्मकेन आवृ
तं ज्ञानिनः अन्तःकरणविशिष्टस्य प्रमातुर्नित्यवैरिणा कामरूपेण दुःपूरेण पूरयितुमयोग्येन अपि हि पूर्यमाणेन अनर्थायैव प्रसवेत्
अनलेन अग्नाविव शिर्यते वेत् अनलः नास्य अलं पर्याप्तिर्यस्य स तथा तेन अनलेन न ह्यनलः काष्ठैस्तर्पयितुं शक्यः किंतु वर्द्धत एव तद्वदयम
पीत्यर्थः अयं भावः अन्तःकरणसत्वं हि प्रकाशात्मकं तत् सहजेन कामेन वह्निरिव धूमेन आवृतं चेत् प्रमातारं अनर्थे पातयति अस्यापा
तदेव स्वभावशुद्धत्वात् विवेकवैराग्योपगमंभ त्यातमुद्धरेत् अतोयं कामो ज्ञानिनो नित्यवैरीति ३९ किंच इन्द्रियाणीति अयमर्थः
इन्द्रियमनोबुद्धयो हि कामेनाधिष्ठिताः बाह्यार्थप्रवणा भवंतीति तैस्त्रितयात्मभूतैरयं कामः ज्ञानं चिदाकाशरूपं आदर्शनेल प्रस्वं पत्रयो

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतं ३८ आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवै
रिणा कामरूपेण कौन्तेय दुःपूरेणानलेन च ३९ इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनं ४०
तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनं ४१ ४१

गिनो व्यवहितं विप्रकृष्टमतीतमनागतं वा पश्यन्ति यथोक्तमाचार्यैः विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं पश्यन्नात्मनी
ति निजान्तर्गतमात्मनि हार्द्दाकाशस्थे ब्रह्मणि गतं मलेन आदर्शमिव आवृत्य देहिनं देहाभिमानिनं विशेषेण मोहयति विशब्दात्
देहाभिमानशून्यं योगिनमपि विभुस्यानावस्थायां किंचिन्मोहयतीति गम्यत इति अस्त्ययोजना स्पष्टा ४० तस्मादिति यस्मादिन्द्रिया
एयष्टास्याधिष्ठानं सामंतस्येव गिरिदुर्गादिकं तस्मात्तान्येव नियम्य वशीकृत्य एनं कामं हि निश्चयेन प्रजहि प्रकर्षेण नाशय रिपु
दुर्गादीन् स्वायत्तीकृत्येव तत्रस्थं सामंतं घ्नति राजानस्तद्वत् हंतव्यत्वे हेतुः पाप्मानं अत्युग्रं तत्रापि हेतुः ज्ञानविज्ञानना
शनमिति ज्ञानस्य शास्त्राचार्योपदेशजस्य परोक्षस्य निदिध्यासनपरिपाकजस्यापरोक्षस्य च नाशनं ४१ ४१

न केवलं बाह्येंद्रियगणजयेनैव कृतार्थत्वं किंतु मनोबुद्ध्योरपि जयः कर्तव्यः कामस्य समूलोच्छेदाय त्रिप्राकारकदुर्गस्थस्य सामंतस्येव बाह्यांत
रप्राकारद्वयजयेनैवेत्याशयेन मनोबुद्ध्योर्जयं पार्थाय योगं दर्शयिष्यति इंद्रियाणीति अत्र परत्वं कारणत्वेन सूक्ष्मत्वेन च बोध्यं इंद्रियाणि चक्षुरादी
नि पराणि स्वविषयेभ्यः पृथिव्यादिस्वाश्रयसहितेभ्यो गंधादिभ्यो वित्तपुत्रशरीरेभ्यश्च तेषां तत्कारणत्वात् तथा च कौषीतकिनः समा
मनंति प्राणेभ्यो देवा देवेभ्यो लोका इति यत्र सुप्तः स्वप्नं न कंचन पश्यति प्राणेभ्यो देवास्तदधिष्ठानीदेशो देवताः उत्पद्यंते देवेभ्यश्च लोका भूतभौति
का उत्पद्यंते इति श्रुत्यर्थः इंद्रियेभ्यः परं मनः मनसा ह्येव पश्यति मनसा शृणोतीति श्रुतेरिंद्रियाणां मनोविकारत्वात् तेन बाह्यार्थयुक्तमिं
द्रियाण्यपि क्रमेण मनसि प्रविलापनीयानीति दर्शितं केवलं परत्वमात्रप्रतिपादने प्रयोजनाभावात् मनसस्तु परा बुद्धिस्तस्माद्वा एत
स्मान्मनोमयात् अन्योंतर आत्मा विज्ञानमय इति श्रुतेः मनसः प्रविलापनं तत्कारणे बुद्धौ कर्तव्यमित्यर्थः समष्टिबुद्धिरप्यत्रै
वांतर्भाव्या यो बुद्धेः परतस्तु सः यस्तु बुद्धेरात्मा भास्यवर्गात् बुद्ध्यादेर्भासकत्वात् स्वप्रकाशत्वेन लक्षणया गमयति यो बुद्धेरपि परतः स त्वा
त्मपदाभिधेयः कामेन आवृतः इति व्यवहितेन संबंधः तथा च श्रुतिः यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ज्ञानमात्मनि महति

इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ४२ एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मान
मात्मना जहि शत्रुं महाबाहो कामरूपं दुरासदं ४३ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्री
कृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः ३"

नियच्छेच्छांत आत्मनीति एतदुक्तं भवति वागादिबाह्येंद्रियव्यापारमनुत्सृज्य मनोमात्रेणावतिष्ठेत मनोऽपि विषयविकल्पाभिमुखं ज्ञा
नात्मशब्दोदितायां बुद्धौ धारयेत् तामपि महत्यात्मनि समष्टिबुद्धौ धारयेत् उक्तं महांतमात्मानं शांते निष्कलेपरस्मिन्ज्योतिषि प्रत्यगात्मनि धार
येदिति योगफलमाह एवमिति आत्मानं मनः दार्ढ्यकारि वित्तधानिसंपन्ने कामान्कामयमाने श्रूयते हि वृत्रस्य विषयोऽयां हार्दाकाशप्रभायस्य
स्य हार्दाः स्त्रियश्च नास्ति सर्वतिद्व्यागत्वा विदत इति तत्र सानां कामानां ते षां च तद्भसतया कामादिति ते आत्मानं मनः आत्मानां मनसैव बुद्ध्यैव वा
संस्तभ्य निश्चलं कृत्वा बुद्धेः परं परमात्मानं बुद्ध्वा समूलघातं कामरूपं शत्रुमात्मवैरिणं जहि नाशय हे महाबाहो इति संबोधयन् तन्नाशे तव सामर्थ्य
र्थ्यमस्तीति दर्शयति अयमर्थः यावत्कामसमूलस्याज्ञानस्योच्छेदः आत्मतत्त्वज्ञानेन न क्रियते तावत्सर्वथा तं कामस्य निर्मूलोच्छेदो न भवती
ति बुद्धेः परं बुद्ध्वा कामो नाशनीयः तन्निर्मूलने हेतुः संसारानर्थोच्छेदो भवतीति दुरासदं परबोधनं विना दुःखेनापि नाशयितुमशक्यं उ
पायः कर्मनिष्ठा न प्राधान्येनोपसंहृता उपेयाज्ञाननिष्ठा तु तेजुगुणत्वेन कीर्तिता ४३ इति नीलकंठीये भारतभावदीपे भीष्मपर्वार्थप्रका शि

शिं

अध्यायद्वयोक्तेर्थे प्रामाण्यशंका माभूदिति विद्यावंशसंप्रदायं आत्मनश्च भ्रमविप्रलंभकत्वादिनिरासायेश्वरत्वं सर्वज्ञत्वं च दर्शयति इममित्यादि
ना इमं सांख्ययोगे कर्मयोगरूपोपायसहितं संन्यासमिति भाष्यं इमं संध्योपासनादि निर्विकल्पकसमाध्यनुष्ठानांतं कर्मयोगं ज्ञाननिष्ठोपस
र्जने पारिव्राज्यानधिकारिणं राज्ञामेव योग्यं विवस्वते सूर्याय मंडलाभिमानिने सूर्यवंशानां क्षत्रियाणामादिभूताय अहं आदित्यांतर्यामीय एषों
तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुः हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी तस्यो
दिति नामेत्यादिश्रुतिभ्यः प्रोक्तवान् पुरा अव्ययं अविछिन्नसंप्रदायत्वेनानादित्वमपि मनवे स्वपुत्राय विवस्वान् प्रादात् इक्ष्वाकवे मनुः स्व

श्रीभगवानुवाच इमं विवस्वते योगं प्रोक्तवानहमव्ययं विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् १ एवं परंपराप्रा
प्तमिमं राजर्षयो विदुः स कालेनेह महता योगो नष्टः परंतप २ स एवायं मया तेद्य योगः प्रोक्तः पुरातनः भक्तोसि मे स
खा चेति रहस्यं ह्येतदुत्तमं ३ अर्जुन उवाच अपरं भवतो जन्म परं जन्म विवस्वतः कथमेतद्विजानीयां त्वमादौ प्रोक्तवा
निति ४ श्रीभगवानुवाच बहूनि मे व्यतीतानि जन्मानि तव चार्जुन तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ५ ॥ राम

पुत्रायाब्रवीत् २ एवमिति एवं परंपराप्राप्तं इक्ष्वाकोर्निम्यादिक्रमेण राजर्षयः जनकाजातशत्रुकेकयप्रभृतयो राजानः ऋषयस्तु सन
कवसिष्ठाद्याः सूक्ष्मार्थदर्शिनस्ते राजान एव ऋषयश्च निवा अपि दुर्लभत्वेन तेः सिजभ्यस्त विदिन्यस्त्रेति लडि उस नष्टः अदर्शनं गतः २
सत्वमसंशयास इति अद्य संप्रदायविच्छेदे सति भक्तः शरणागतः सखा प्रीतिविषयः रहस्यं गोप्यं अभक्तादिभ्यो न देयं अन्यथा निर्वीर्या
विद्या भवेदित्यर्थः तथा च मंत्रवर्णः । विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेहमस्मि असूयकायानृजवेऽयताय न मा ब्रूया
वीर्यवती तथा स्यामिति ३ भगवद्देहस्य वसुदेवादुत्पत्तिं मत्वार्जुन उवाच अपरमिति अपरं अर्वाक्कालिकं परं बहुकालिकं जानी
यां यद्यपीश्वरोदयमर्थो ज्ञातः तथापि विरुद्धार्थस्य वाक्यस्याबोधकत्वात् कथमेतद्विजानीयामित्युक्तं पदयोजना स्पष्टा ४ स्वदेहस्याजत्वं
साधयितुं स्वस्य सर्वज्ञत्वं तावदाह बहूनीति स्पष्टश्च श्लोकः ५ ५ ५ ५ ५ ५ ॥

किंतर्हि योगिनां सर्वज्ञत्वप्रसिद्धेः त्वं जानासि स्मरो जीवोसीत्याशंक्याह अजइति देहानिर्वृत्तस्याजत्वाव्ययत्वेन लिवाहं च्छ्रोतुनासमित्यत्र सा
धितेदृष्टदेहविशिष्टस्यैव तेईश्वरोपीत्यनेन देहानिर्वृत्तस्यास्मदादेरपीश्वरत्वेतल्लमस्यहब्रह्मास्मीत्यादिश्रुतिसिद्धमतोदेहवि शि
ष्टस्यैवाजत्वनित्यत्वे दृष्टां क्रियेते अन्यथानीश्वरत्वप्रसंगात नब्रह्मादित्यां तर्यामिणः परमेश्वरस्य हिरण्यगर्भस्योत्वादिविशिष्टोदे
हो जन्मव्ययवानितिवक्तुंशक्यं अकर्मजत्वात् कर्मफलस्यहि परा काष्ठा हिरण्यगर्भशरीरप्राप्तिः नचपुरुषोहवैनारायणोका
मयत अत्यतिष्ठेयं सर्वाणिभूतानि अहमेवेदं सर्वस्यामिति स एनं पुरुषमेधं पंचरात्रं यज्ञक्रतुमपश्यदित्यादिनाश्रातपद्यो
नारायणाख्यस्य परमात्मनः सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलमिति
पादोस्य सर्वाभूतानि त्रिपादस्यामृतं दिवीति च पुरुषसूक्तप्रतिपाद्यस्य सर्वाणिभूतानि अतिक्रम्यास्थितस्येश्वरस्यापि श

अजोपिसन्नव्ययात्माभूतानामीश्वरोपिसन् प्रकृतिंस्वामधिष्ठाय संभवाम्यात्ममायया ६ यदायदाहि धर्मस्य
ग्लानिर्भवतिभारत अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं ७ परित्राणाय साधूनां विनाशाय च दुष्कृतां धर्म
संस्थापनार्थाय संभवामि युगे युगे ८ वीतरागभयक्रोधा मन्मया मामुपाश्रिताः बहवो ज्ञानतपसा पूता मद्भावमागताः १० ॥ ॥

रीरं पंचरात्राख्यकर्मविशेषफलमितिश्रूयते इतिवाच्यं तत्र नारायणशब्देन हिरण्यगर्भस्यैव विवक्षितत्वात् नहि परमेश्वर
पूर्णकामस्य सर्वानतिक्रम्यास्थितस्य पुनरत्यतिष्ठेयं सर्वाणिभूतानीति कामना भवति ननु परमेश्वरेपि कामना दृष्टा सोका
मयत बहुस्यां प्रजायेयेतीति चेत् श्लाघनीयप्रवृत्तो देवानां प्रयोजनः आप्तकामस्य का स्पृहेति श्रुतेर्लोकवत्तु लीलाकैवल्या
मिति न्यायाच्च निस्पृहलीलयैव ब्रह्माण्डकोटीः सृजतो भगवतो राजगोपालस्य सर्वकिंकरेण सर्वकर्मणा सर्वात्म्यं प्रार्थयात्म
अजोपिसन्निति ननु तर्हि भगवच्छरीरं एतन्न एवं न भौतिकं विराट्सूत्रात्मातिरिक्तस्य भौतिकस्याभावात् तस्माद्यत्कं
ष्टनत्वापत्तेः चिन्मात्रं चेतन्न चितः साकारत्वायोगात् तथा तस्यानीदियत्वापत्तिः तस्मात्किमालंबनो यं भगवद्देहो देवकीगर्भ

प्रवेशश्च नन वाल्यकौमारयौवनादिप्रतीतिविषय इति चेत् शृणु प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममाययेति अयमर्थः जी
वात्मनो हि अनात्मभूतां प्रकृतिं तेजोबन्नात्मिकां पंचभूतात्मिकां वा अधिष्ठाय संभवंति जन्मादीन् लभंते अहं तु स्वां प्रत्यगनन्यां प्रकृ
तिं प्रत्यक्चैतन्यमेवेत्यर्थः तदेवाधिष्ठायनत्तूपादानांतरं आत्ममायया स्वीयया मायया संभवामि यथा कश्चिन्मायावी स्वयं स्वस्था
नादप्रच्युत स्वाभाविकोऽपि अदृश्यो भूत्वा स्वदेहलसूत्रं भूतान्यनुपादायैव केवलया मायया द्वितीयं मायाविनं स्वसदृशमेव सूत्र
मार्गेण गगनमारोहंतं सृजति एवमहं कूटस्थचिन्मात्रोऽप्यहं स्वमायया चिन्मयात्मनः शरीरं सृजामि तस्य बाल्याद्यवस्था
श्च सूत्रारोहणवद्दर्शयामि रामावास्तु विशेषः लौकिकमायावी मायामुपसंहरन् द्वितीयं मायाविनमप्युपसंहरति अहं तु ता
मनुपसंहरन् स्वविग्रहमपि नोपसंहरामीति एवं हि सति हिरण्यश्मश्रुत्वादिविलक्षणविग्रहयोगिनः श्चेतनस्य असंसृष्टकर्मो
६ पदेशादित्यादिन्यायसिद्धं वीर्यहेतुपादानस्वलक्षणं सर्वेश्वरत्वं युज्यते नान्यथेति तस्मात् सिद्धं परमेश्वरस्य मायाविन शरीरं
नित्यमिति एकेनैव देहेन विवस्वंतमुपदिश्य त्वामप्युपदिशामीति अन्यत्रापि नित्यैवसा जगन्मूर्तिरिति सावधारणं प्रतिज्ञायते दे
वानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा उत्पन्नेति तदा लोके सा नित्याप्यभिधीयत इति नित्याया अप्याविर्भावापेक्षया सर्गसै
व बाल्यादिकं उत्पत्त्याद्युपगम्यते भाष्ये तु स्वां प्रकृतिं वैष्णवीं त्रिगुणात्मिकां मायामधिष्ठाय वशीकृत्य आत्ममायया सं
भवामि देहवानिव जात इवात्मनो मायया न परमार्थतो लोकवदिति व्याख्यातं ६ कदा संभवतीत्यपेक्षायामाह यदा यदेति ग्लानिर्ह्रासः अ
भ्युत्थानं वृद्धिः ७ किमर्थं मायया सृजसि तत्राह परित्राणायेति दुष्कृतां दुष्टकर्मकृतां पापिनां नाशाय च संभवामि आविर्भवामि
८ तन्मायामयं कर्म साधुत्राणं अप्राकृतं दिव्यं यो वेत्ति स त्यक्त्वा देहं पुनः जन्म न प्राप्नोति किंतु मामेति मामेव प्राप्नोति एते न भगवतो ज
न्मानि कर्माणि च भगवत्प्राप्तिकामेन ज्ञेयानीति दर्शितं ९ एतस्यापि भगवत्प्राप्तेर्धर्ममाह वीतेति रागो विषयेषु प्रीतिः भयं त्रासो छे
दशंका क्रोधः स्वपरपीडाहेतुरभिज्वलनं ते त्रयो वीताः येभ्यस्ते वीतरागभयक्रोधाः अत एव मन्मया मदेकप्रधानाः किं ज्ञानिनो
यथा जारमपि भर्तारं वाश्रिता योगक्षेमार्थं तद्दत्त्याह मामुपाश्रिताः ज्ञानतपसा ज्ञानमयं तपः अलोचनं मम जन्मकर्मणोः स्वरू
पस्य चानिरंतरं चिंतनं यस्य ज्ञानमयं तपः इति प्रसिद्धं ज्ञानतपः तेन पूताः संतो मद्भावं मत्तादात्म्यं प्राप्ता इत्यर्थः १० १० १० १०

भा॰भा॰
भी॰प॰
गी॰टी॰
२८

ननु साध्वसाध्वोस्त्राणविनाशौ कुर्वतस्तव वैषम्यनैर्घृण्ये स्तोतः किं न वास्मदादितुल्यस्य जन्मकर्मस्पर्शनां तु स्वस्वरूपाणां विचिंतनेनेत्या
शंक्याह ये यथा ये मनुष्याः मां सर्वशरीरस्थं यथा येन प्रकारेण शत्रुत्वेन मित्रत्वेन वा प्रपद्यंते प्राप्नुवंति तान् तेनैव प्रकारेण अहमपि भ
जामि अनुसरामि ये तु मम वर्त्म भक्तिध्यानप्रणिधानात्मकमनुवर्तंते तान् ममात्मभूतान् तथैव सर्वशः सर्वैः प्रकारैरनुवर्तेऽहमिति
योजना तत्र स्वच्छे बिंबभूते प्राणिजाते यो यथा प्रीतिं द्वेषं वा करोति तस्मिन् प्रतिबिंबभूतेऽहमपि तथैव प्रीतिं द्वेषं च करोमि बिंब
स्थानापन्नत्वात् प्रतिबिंबे संक्रामतो न मम वैषम्यनैर्घृण्ये स्तस्तस्मात् श्रेयोऽर्थिना सर्वस्य कल्याणमेव एष्टव्यमिति भावः भा
ष्ये तु ये यथा येन प्रकारेण येन प्रयोजनेन आर्ता जिज्ञासवोऽर्थार्थिनो ज्ञानिनो वा प्रतिपद्यंते तांस्तथैव पीडापरिहारेण ज्ञा

ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहं मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ११ कांक्षंतः कर्मणां
सिद्धिं यजंत इह देवताः क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा १२ चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययं १३ न मां कर्माणि लिंपंति न मे कर्मफले स्पृहा इति मां योऽभिजानाति कर्मभि
र्न स बध्यते १४ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतं १५

नदानेन धनदानेन मोक्षदानेन वाऽनुगृह्णामि सर्वथापि ममैव वर्त्मानुवर्तंत इति अन्यदेवताभक्तोऽपि ममैव भक्त इति चे
द्याचक्षते ११ कांक्षंत इति हि यस्मात् मानुषे लोके कर्मजा सिद्धिः काम्यकर्मफलं पुत्रपश्वादिकं क्षिप्रं भवति न तु निष्कामकर्मजा चि
त्तशुद्धिः वक्ष्यंति अतो ये कर्मणां सिद्धिं फलं इहैव शीघ्रं कांक्षंतः कांक्षमाणाः देवता इंद्रादीन् यजंते तेऽपि ममैव वर्त्मानुवर्तंत
इति पूर्वेणान्वयः वक्ष्यति च येऽप्यन्यदेवताभक्ता इत्यादि १२ अन्यदेवताभक्ता अपि कस्मात् पुनः कारणात् तवैव वर्त्मानुवर्तं
ते नान्यस्येत्यत आह चातुर्वर्ण्यमिति चतुर्णां वर्णानां चातुर्वर्ण्यं गुणाश्च कर्माणि चेति गुणकर्मणी द्वंद्वैकवद्भावः कर्माणि
अग्निहोत्रादीनि गुणाश्च द्रव्यदेवतादिरूपाः विभागशः साधारणासाधारणविभागेन तथा हि दानजपादिकं सर्वसाधार

श्री व
२८

णं अग्निहोत्रादिकं त्रैवर्णिकस्यैवनेकस्य मद्रूपस्य राजसूयादिकं राज्ञ एवनेन रीत्या विति विभागो दृश्यते य तच्चातुर्वर्ण्यं गुणकर्म मया
सृष्टं ततोऽन्यदेवतानामपि मद्रूपत्वात् पुत्रप्रीत्या पितुरिव देवप्रीत्या मह्येव तदस्तीत्यर्थः यद्वा गुणविभागशः कर्मवि
भागशः इति योज्यं तथा हि सत्वप्रधाना ब्राह्मणाः तेषां कर्म शमदमादिकं सत्वोपसर्जनरजःप्रधानाः क्षत्रियाः तेषां कर्म शौर्या
दि तमउपसर्जनरजःप्रधानाः वैश्याः तेषां कर्म कृष्यादि रजउपसर्जनतमःप्रधानाः शूद्रास्तेषां कर्म शुश्रूषणं चेति
गुणकर्मविभागो दृश्यते तथा चातुर्वर्ण्यमिति स्वार्थे ष्यञ् चत्वारो वर्णाः गुणकर्मविभागशो
मया सृष्टा इत्यर्थः अन्यदेवताभक्तोऽपि वदुक्तं कर्मकारित्वात् मद्भक्त एवेति भा
वः ननु यद्येवं कस्त्वमं नतितत्फलेन स्वकृताकरणेऽभ्युपायसे तदर्थं
च त्वया चातुर्वर्ण्यं सृष्टमिति हि निर्दयं संसारी त्वमसी
त्याशंक्याह तस्येति कर्तारं मायायोगात्
वस्तुतोऽकर्तारं अत एवाव्य
यमविकारिणं १३ न
नु कर्तुरपि ध्य
केमकं
र्तृत्वमाशंक्य न मामिति कर्मलेपोऽपि प्रसक्तो नास्तीत्यत आह न मे इति यः कर्तृत्वाभिमानाभावान्न लिप्यते यं च फलेच्छः स एवात्मनः कर्तृत्वं
मन्यते इति फलेच्छाभावात् अकर्तारं कर्तृत्वाचैव न लिप्यते य इति मां यो भिजानाति स कर्मफलस्पृहात्यागात् कर्मभिर्न निबध्यते १४ एतदेव
शिष्टाचारप्रदर्शनपूर्वकं आह एवं ज्ञात्वेति पूर्वैरपरं तरोऽत्मत्वात् नत्वधुना केन कल्पितमित्यर्थः पूर्वतरं प्रथमतरं कृतं अत्या

आवश्यकत्वेपिकर्मणोनगतानुगतिकतयानुष्ठानंकर्तव्यंकिंतुज्ञात्वाकर्माणिकुर्वंतीतिवचनात्कर्माद्यित्रंकिंचिद्विशेषज्ञापयितुंउ
पोद्घातंवपाकिंकर्मेतियतः कर्माकर्मणीकवीनामपिदुर्निरूपेतनतस्मात्तेतुभ्यंकर्मअकर्मवाकारप्रश्नेयेषणग्रहीतेउभेप्रवक्ष्यामि
यद्ज्ञात्वामोक्ष्यसेऽशुभात्संसारात्मोक्ष्यसे १६ तत्रनेतानमावश्यकमित्याह कर्मणइति तत्त्वंबोद्धव्यमस्तीतिस्थलत्रयेपि
तत्वमस्तीतिपदद्वयाध्याहारः कर्मणः शास्त्रविहितस्यविकर्मणः प्रतिषिद्धस्यअकर्मणस्तूष्णींभावस्यगहनाकर्मणइतित
थारूपत्वात्कर्मविकर्माकर्मणांगतिर्याथात्म्यतत्वंगहनं १७ मत्कर्मादेस्तत्त्वंबद्धमीति प्रतिज्ञातंतदाह कर्मणीतिकर्माणिकर्म
विकर्मात्मकेदेहेंद्रियव्यापारे आविद्ययाध्यस्तमात्मनिआरोपितेसतितत्रअकर्म कर्माभावंनौस्थेनतीरतरोचलनेआरोपितेस
तितत्त्वबुध्यातत्रचलनाभावमिवयःपश्येत्तथाचलंगुणहंतामितिन्यायेनत्रिगुणात्मकेषुदेहेंद्रियादिषुनित्यंकर्मवत्सुय

किंकर्मकिमकर्मेतिकवयोप्यत्रमोहिताः तत्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामोक्ष्यसेऽशुभात् १६ कर्मणोह्यपि
बोद्धव्यंबोद्धव्यंचविकर्मणः अकर्मणश्चबोद्धव्यंगहनाकर्मणोगतिः १७ कर्मण्यकर्मयःपश्येदक
र्मणिचकर्मयः सबुद्धिमान्मनुष्येषुसयुक्तःकृत्स्नकर्मकृत् १८

चंद्रतारकादेगत्यभावमिवतत्साक्षीभूतोहमस्मिनकिंचित्करोमीत्यध्यस्तेकर्माणिकर्माभावेकर्माख्यंचयःपश्येत्समनुष्येषुबुद्धिमा
नतत्त्वदर्शीआत्मनिर्भोक्तिजनितव्यापारस्यअनात्मनिवर्तादृशस्यनिर्व्यापारत्वस्यवाधात् सएवचयुक्तोयोगीकृत्स्नकर्मकृच्चकर्म
योगफलतत्वज्ञानस्यप्राप्तत्वादितिस्तुतिमात्रं आत्मनोकर्तृत्वेसंघातस्यैवकर्तृत्वमितिभावयताकर्माणिकर्तव्यानीत्यर्थः य
द्यप्येतद्बहुधाप्रपंचितंअव्यक्तोयमित्यादौतथापितत्त्वस्यदुर्ज्ञेयत्वात्पुनःपुनरुच्यतइतिप्राञ्चः यत्तुकर्माणिनित्यपरमेश्वरा
र्थेनुष्ठीयमानेबंधहेतुत्वाभावादकर्मेदमितियःपश्येत् तथाअकर्मणिनित्यकर्माकरणेप्रत्यवायहेतुत्वेनकर्मेदमितियः
पश्येत्सबुद्धिमानितितदसंवादितमेवनित्यकर्माणिअकर्मेदमितिज्ञानस्याशुभमोक्षहेतुत्वाभावात् मिथ्याज्ञानत्वे
नतस्यैवाशुभत्वाच्चनचैतादृशंमिथ्याज्ञानंबोधव्यतत्वेनाप्येतादृशज्ञानेबुद्धिमत्वाद्युपपपत्तिरित्यादिक् यत्तुकर्माणि

दृश्येजडेसद्रूपेणस्फुरणरूपेणवानुस्यूतंसर्वभ्रमाधिष्ठानमकर्मप्रवेघंस्वप्रकाशंचेतन्यंपरमार्थदृष्ट्यायःपश्येत्तथात्रकर्मणिस्वप्र
काशेदृग्वस्तुनिकल्पितंकर्मदृश्यंमायामयंनपरमार्थसदितियःपश्यतिसबुद्धिमानितिपरमार्थदर्शित्वाद्वास्तवेरेवगुणेःस्तूयते
इत्यपिव्याचख्युः तदप्यसंगतमेवकर्मकुरुकर्मण्येवाधिकारस्तेमानिःसंगःकर्मण्यभिप्रवृत्तोपिनैवकिंचित्करोतिसःयत्स्यात्
तिपरिभाषितकर्मसंज्ञयादृश्यस्यकर्मत्वव्यवहारःशास्त्रीयत्वेनगृहीतःस्यात्तदा...तस्याःपुष्टिनादिसिंद्धानामिवगम्याद्यनिलयानहल्ला
दितिसंक्षेपः यद्वाकर्माकर्मणीवक्तव्यत्वेनबोधव्यत्वेनचोपक्षिप्यचतयोर्लक्षणप्रदर्शनमुचितं अतोयदकर्मणाविधे
योचितंतदेवकर्मनान्यदितिकर्मलक्षणंयच्चकर्मणाविरोधितंतदेवाकर्मेतिअकर्मलक्षणमितिव्याख्येयं अत्रतात्पर्यन्तुक
र्मयज्ञादिकंसंसाधनंतत् अकर्मस्वंदृश्यंकूटस्थंब्रह्मयःपश्येत्कर्मतदंगेषुब्रह्मदृष्टिमध्यासेत अहंक्रतुरहंयज्ञः
स्वधाहमहमौषधंमंत्रोहमहमेवाज्यमहमग्निरहंहुतमित्युक्तं अन्यथायत्कृतंतद्द्याचेष्टारूपमेवातोगहना
कर्मणोगतिः किंतदकर्मयत्कर्मत्वध्यस्यतइत्याकांक्षायामाह यद्वैतत्कर्मपुण्यपापात्मकंदृश्यतेपुण्ये
वेपुण्येनकर्मणाभवतिपापःपापेनेतितत्फलंचसुखदुःखादिकंअहंसुखीअहंदुःखीति
सप्रत्ययश्चेतनोऽकर्मतत्रैवेदंकर्मअस्यादेस्यंदात्मकंसर्परज्जुवदध्यस्तमितियःपश्ये
दिति अयंभावः यथारज्ज्वामध्यस्तःसर्पःपश्यन्नापसर्पोरज्जुरपि
मितितिवाक्यांतरादस्यरज्जुत्वंविक्षेपप्राबल्यादप्रतिपद्यमानेन
रःसर्पमिमंरज्जुंदृष्ट्वोपास्वेतिनियोज्यतेसचोपासन
दार्ढ्येसर्पविस्मृत्यारज्जुतत्वमेवविंदतियस्तुवा
क्याद्देवरज्जुतत्वंविंदतितस्यप्रत्ययावृत्तिलक्षणयाउपास्त्याप्रयोजनमस्तिएवमकर्मण्यध्यस्तंकर्तृत्वादितत्वमसीतिवाक्
याद्बोधित्वाकर्मप्रतिपत्तिर्भवतिसुद्धसत्वस्यअन्यस्यतुकर्त्रीदानेवाकर्मदृष्ट्याउपासीनेस्याभ्यासादार्ढ्यात्कर्त्रादिरूपतिरोधानेनाकर्मतत्वप्रतिपत्तिरिति १८ १८

म॰भा॰
भी॰प॰
गी॰टी॰
३०

॥ अविदुषां कर्मण्यभावनां दर्शयित्वा विदुषां कर्मादर्शनं स्तौति यस्येति यस्य सर्वे समारंभा इत्यादिभिः यस्य विदुषः सर्वे समारभ्यंत इति समारंभाः
कर्माणि कामेन फलेच्छया संकल्पेन अहमिदं करोमीत्यभिमानेन वर्जिताः ज्ञानाग्निना कर्मादावकर्मादिदर्शनेन दग्धानि अं-
कुराभावात् ब्रचितानि कर्माणि शुभाशुभानि येन तं पंडितं बुधा आहुः १९ ननु प्रायश्चित्तेनेव ज्ञानाग्निना पूर्वकर्मदाहेपि क्रियमाणं
तत्फलाय भवेदित्याशंक्याह त्यक्त्वेति आत्मलाभेन नित्यतृप्तत्वात् फलासंगं त्यक्त्वा कर्मणि लौकिके निराश्रयत्वात् अहंकाराद्या-
श्रयेण हि कर्म क्रियते निराश्रयो निरहंकारो यस्मात्ततो कर्मासंगं अहं करोमीत्यभिमानं च त्यक्त्वा कर्मणि लौकिके वैदिके
वाभ्यमितः सर्वांगोपसंहारेण प्रवृत्तोपि स नैव किंचित्करोति अतोस्य क्रियमाणमपि कर्म न फलाय भवतीत्यर्थः २० नन्वेत

यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः १९ त्यक्त्वा कर्म-
फलासंगं नित्यतृप्तो निराश्रयः कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः २० निराशीर्यतचित्तात्मा त्यक्त
सर्वपरिग्रहः शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषं २१ ॥

स्माद्दोषात्कर्माकरणादकरणं मुख्यमेव तन्न वरमित्याशंक्याह गृहस्थस्य तत्प्रत्यवायावहमिति व्यतिरेकमुखेनाह निराशी-
रिति यो निष्परिग्रहः स्त्र्यादिपरिग्रहरहितः संन्यासी स चेत् निराशीः यो प्यर्थमप्यनिच्छन् यतं चित्तं बुद्धिः आत्मा च देहें-
द्रियसंघातो येन स यतचित्तात्मा समाधिकाले निरुद्धबाह्याभ्यंतरवृत्तिरित्यर्थः स व्युत्थानकाले शारीरं शरीरस्थिति-
मात्रप्रयोजनं भिक्षाटनादि केवलं तदपि संगं अकुर्वन्नपि किल्बिषं पापं यावज्जीवमग्निहोत्रं जुहुयादिति यावज्जीवा-
धिकारचोदिताग्निहोत्राद्यकरणजं प्रत्यवायं नाप्नोति विधितस्तेषां त्यागात् यस्तु सपरिग्रहः स निराशीरपि यतचित्ता-
त्मापि केवलमपि शारीरं कर्म कुर्वन् विहिताकरणात् किल्बिषं प्राप्नोत्येवेत्यर्थः २१

श्रीव
३०

ननुसपरिग्रहस्य कुटुंबभरणार्थं तथा कथं वित्तव्ययायाससाध्यान्यग्निहोत्रादीन्यनुतिष्ठेदित्याशंक्याह यदृछेति यदृछयाऽप्रार्थितोपनतो लाभो यदृछालाभस्तेन संतुष्टः तथाहि अतोऽप्यतालाभप्राप्तो वनं ब्राह्मणस्येति विधाय व्याख्यातं अतमुंछशीलेषु कं समर्थनस्यादयाचितमिति द्वंद्वातीतः बहुलाभेऽलाभे वा सुखदुःखातीतः विमत्सरः परस्य लाभं दृष्ट्वा संतापहीनः समः सदृछालाभेनैव दृष्टपशुचातुर्मास्यादेर्नित्यात् कर्मणः सिद्धौ असिद्धौ सर्वो मे निर्विकार एवंभूत यदृष्ठ्यादीनि कृत्वापि तन्मूले न स्वर्गादिना न निबध्यते अपिशब्दो पितज्ञे न प्रत्यवायेन न निबध्यते बंधहेतोः कर्मणस्तत्वज्ञानेनैव दाहात् तथा च स्मृतिः न्यायागतधनस्तत्वज्ञाननिष्ठोतिथिप्रियः श्राद्धकृत्सत्यवादी च गृहस्थोपि विमुच्यत इति भाष्ये त्वयं श्लोकः संन्यासिपरत्वेनैव व्याख्यातः २३ त्यक्त्वा कर्मफलासंगमित्यादिना श्लोकत्रयेण विद्वान् कर्माणि कुर्वन्नपि न करोति अतो न लिप्यते लेपाभावाच्च न बध्यत इत्युक्तं न तु किं कर्मणां फलदानशक्तिप्रतिबंधो वा ज्ञानेन क्रियत उत निरन्वयोच्छेद एवेत्याशंक्याह मुक्तस्यापि पुनः संसारप्रसक्तिं परिहरन्

यदृछालाभसंतुष्टो द्वंद्वातीतो विमत्सरः समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते २२ गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः यज्ञायाचरतः कर्म समग्रं प्रविलीयते २३

द्वितीयमध्युपगच्छती गतसंगस्येति यतः विद्वान् गतसंगतः कर्तृत्वाभिमानशून्योऽतो न करोतीत्युक्तं यतो मुक्तः फलकामतः अतो न लिप्यत इत्युक्तं यतो यज्ञायेव यज्ञार्थमेवाचरति न फलार्थं तदर्थप्राप्त्यभावात् अतस्तमेवोपाध्य कृते कर्मभिर्न बध्यत इत्युक्तं यतो यज्ञाने सम्यग्दर्शनेनावस्थितचेताः प्रतिष्ठितप्रज्ञः अत ईश्वरप्राप्तिफलस्य ज्ञाननिष्ठस्वरूपस्य लाभात् गतसंगस्य मुक्तस्य यज्ञाय कर्माचरतो ज्ञानावस्थितस्य सर्वकर्म क्रियादिकं सर्वप्रकारेण निष्प्रयोजनं समग्रेण फलेन वासनया सह समग्रं प्रकर्षेण निःशेषं विलीयते नस्यत्यतो न कदाचिदपि प्रादुर्भवति अयं च क्रियमाणकर्मप्रलयो विद्वदृष्टो वस्त्वाभाविकस्य तेषां फलजननसामर्थ्यस्य वह्निसोम्यवदप्रत्याख्येयत्वात् अतएव ज्ञानेन पूर्वकर्मणां दाहः उत्तरेषामश्लेषश्च श्रूयते तत्तरेषामपि देहो तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वपाप्मानः प्रदूयंत इति ते विदित्वा न कर्मणा लिप्यते पापकेनेति च तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति विदुषो धनस्येव कर्मणामप्यन्यत्र गमनदर्शनात् न तेषां वस्तुतः प्रलयोस्तीति ध्येयं २३

म.भा. भी.प. गी.टी. ३१

ने

कुतोविदुषांकर्माणिप्रविलीयंतइत्याशंक्याह ब्रह्मार्पणमितियतस्तेविद्वांसः सविकल्पसमाधौसर्वंजगत्प्रपंचकाग्निशक्तिनिमित्तंपश्यंति
तथाचश्रुतिः किंकारणमित्युपक्रम्यकालः स्वभावइतिकालादीनिलोकदृष्ट्यौकानिकारणान्युपदिश्यकारणानिनिलीयतेध्यानयोगानु
गताअपश्यंदेवात्मशक्तिंस्वगुणैर्निगूढामितिसमाधिनादर्शयति तथाचसमाधिनासर्वस्यब्रह्मणिकल्पितत्वंपश्यतांतेषांयद
अ. र्पणमर्पणसाधनंस्रुवादितद्ब्रह्मैवएवशब्दः सर्वत्रानुषंजनीयः यदर्पणीयंहविस्तदपिब्रह्मैवयत्हुतं हवनक्रियाहुतंतदपितदे
वब्राह्मणादिवातदपिब्रह्मैवयदग्नौहुतंतदपिब्रह्मैवहुतंअत्रब्रह्मणेतिपदमध्याहर्तव्यं प्रधानमानेनहुतंतत् ब्रह्मणैवहुतंय

ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतं ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिना २४

तेनकर्मणागंतव्यंप्राप्तव्यंफलंतदपिब्रह्मैवकिंबहुनायत्किंचित्तस्यकर्मस्नानासनादिकंतत्सर्वंब्रह्मैवतत्रकारणंसमाधि
नासमाधिजेनात्मसाक्षात्कारेणयतः सर्वमस्यब्रह्मात्मकंब्रह्मचप्रत्यगनन्यत् अतःप्रदेयस्यफलस्याभावात् कर्माणि
प्रविलीयंतेदग्धाभावाद्दहनइवेतिभावः यत्तुकर्मणितदंगेषुचनामादिष्विव ब्रह्मदृष्टिरत्रविधीयतइतिव्याख्यातंतदु
पक्रमादिविरोधात् ब्रह्मविद्याप्रकरणत्वाच्चासंगतमितिभाष्यएवनिरस्तं पाहिब्रह्मविदांकर्मांगेषुतात्विकीदृष्टिः
कीर्त्यतेसास्थितप्रज्ञलक्षणवद्ब्रह्मविदामनुष्ठानायेवफलतोभवतीतिनतत्रतस्यास्तात्पर्यंवर्णनीयमितिदिक् २४ श्रीवं. ३१

एवं सम्यग्दर्शनस्य यज्ञत्वं संपाद्य तस्य स्तुत्यर्थं यज्ञान्तराण्युपक्षिपति दैवमेवेत्यादिना दैवं देवताप्रधानमेव दर्शपूर्णमासादियज्ञं
नान्यं एके योगिनः कर्मयोगिनः पर्युपासते अपरे तु ब्रह्मैव सत्यज्ञानानन्दात्मकमखंडैकरसं वस्तु तदेव ज्ञानात् सर्वकर्मदग्धृत्वा
दग्निरिवाग्निर्ब्रह्माग्निस्तत्र यज्ञं जीवं यज्ञशब्दस्यात्मनामसु पाठात् सोपाधिं यज्ञेनैव आत्मनैव निरुपाधिकेन रूपेण जुहुति यथा
काशमिव महाकाशे उपाधिप्रलयेन प्रविलापयंति सोयं यज्ञो मुख्यः २५ यज्ञान्तरमाह श्रोत्रादीनिति तत्र केवाह्यं प्रथमं
तत्त्वाविशेषमुपादाय तत्र चेतसो नियमनं क्रियते ते त्वत्र संयमाः अनेकविषयत्वादनेके पृथक्फलाश्च तथा च योगसूत्रं के
ताप्रत्ययं भुवनज्ञानं सूर्ये संयमात् चंद्रे ताराव्यूहज्ञानं कंठकूपे क्षुत्पिपासानिवृत्तिरित्यादि त एवाग्नयः इंद्रियेंधनसंहारहेतुत्वा

दैवमेवापरे यज्ञं योगिनः पर्युपासते ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुहूति २५
श्रोत्रादीनिंद्रियाण्यन्ये संयमाग्निषु जुहूति शब्दादीन्विषयानन्य इंद्रियाग्निषु जुहूति २६

रे तेषु संयमाग्निषु श्रोत्रादीनि जुहूति प्रक्षिपंति तत्र श्रोत्रं अनाहतध्वनौ संनियम्य हंसोपनिषदुक्तरीत्या घंटानादादीन् दशनादाननु
भवति न हि तत्र संनियते चेतसि शब्दांतरग्रहणं तदा भवति सोयं श्रोत्रस्य संयमाग्नौ होमो बोध्यः एवमन्यत्रापि तद्वाराच्चानिष्फ
लं तत्त्वप्रतिपद्यंते तथान्ये विषयेभ्यः प्रत्याहृत्य करणैः धारणाध्यानसमाध्यात्मकं मनसः संयमं एकत्र मूलाधारा
द्यन्यतमचक्रे कर्तुं असक्ताः समनस्केंद्रियेषु विषयवियोगाद्दग्धेंधनानलवत्स्वयं विलीनेषु येषां समाधिबुद्धिस्ते
षु इंद्रियेषु विषयानेवोपसंहरंतः न त्विंद्रियादीनि मनआदिषु प्रत्वीकरीत्या उपसंहरंत्यन्ये तानींद्रियचिंतकान्य
कृत्यात्मं वायवीये दशामन्येतराणि हति इष्टे इंद्रियचिंतका इति २६

इतो विशिष्टयोगांतरमाह सर्वाणीति इंद्रियाणां कर्माणि शब्दादिग्रहणानि आकुंचनप्रसारणश्वासनिश्वासादीनि अपरे यो
गिनः आत्मनि शुद्धे संयमः स एव योगोऽग्निस्तस्मिन् ज्ञानेन देहेंद्रियप्राणमनोव्यतिरिक्तोऽयमात्मा ज्ञानेन दीपिते प्रकाशिते जुहु
ति प्रविलापयंति इंद्रिययोगिनां हि सुप्ताविव प्राणेऽनुपसंहृते एवाक्षेत्तत सहचरस्य मनसोऽनुपसंहारात् बुद्धियोगिनां तु मन
सोऽप्युपसंहारात्तत्रयत्नस्य प्राणस्याप्युपसंहारो भवतीति विशेषः एतेषामपि शुद्धौ वाऽव्याभावात् पूर्ववल्लीनामाः समाधि
वुधिरस्ति नत्वेतैर्बुद्धेरन्यत्वेन आत्मा ज्ञातो नापि तस्मिन्स्वबुद्धिरूपसंहृता अत एवैतान्प्रकृत्योक्तं वायवीये बौद्धा दशसह
स्राणि तिष्ठंति विगतज्वरा इति बौद्धाः बुद्धौ लीनाः दशसहस्राणि मन्वंतराणि तत्पनुषंगात् २७ एवं यज्ञपंचकमुक्त्वा कं
येणोक्तं अथ केनैवमुक्तो केन पंचयज्ञानाह द्रव्येति द्रव्यसाध्याः वापीकूपारामाः तीर्थवाहि वेदीकायां दानं श्रोत्रयज्ञानां प्रा
णानां प्रा

सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते २७
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः २८

णेव ग्रहणात् तत एव ज्ञायेषां ते द्रव्ययज्ञाः तथा तपः कृच्छ्रचांद्रायणमासोपवासादि तदेव यज्ञस्थानीयं येषां ते तपोयज्ञाः
तथा योगयज्ञाः संगफलत्यागपूर्वकं संध्योपासनादि निर्विकल्पसमाधौ तानां कर्मणामनुष्ठानं तत्र तीयाध्यायोक्तो यो
गः स एव यज्ञो एषां ते योगयज्ञाः यद्वा यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपोऽष्टांगो येन योगः
श्चित्तवृत्तिनिरोध इति लक्षितो योगः एव यज्ञो येषां त इति तथा स्वाध्याययज्ञाः ज्ञानयज्ञाश्चेति स्वाध्याययज्ञा ज्ञानयज्ञा इति
समासः यत्नशीलाः संशितव्रताः ते नित्यवेदाध्ययनरतास्ते स्वाध्याययज्ञाः ज्ञानं स्वाध्यायार्थस्य पूर्वोत्तरमीमांसाविचा
रः स एव यज्ञो येषां स्वाध्याययज्ञाः ज्ञानयज्ञाश्चेति स्वाध्याय ज्ञानयज्ञा इति समासः यत्नशीलाः संशितव्रताः सम्यक्
शितं तीक्ष्णीकृतं व्रतं अहिंसादिकं येषां ते इति सर्वेषां विशेषणं २८

एकादशं यज्ञमाह अपाने इति अपरे अपाने अपानवृत्तौ जुह्वति प्रक्षिपंति प्राणं प्राणवृत्तिं पूरकाख्यं प्राणायामं कुर्वंतीत्यर्थः तथा प्राणेऽपा
नं प्रक्षिपंति रेचकाख्यं प्राणायामं कुर्वंतीत्यर्थः प्राणापानगती रुद्ध्वा मुखनासिकाभ्यां वायोर्निर्गमनं प्राणस्य गतिः तद्विपर्ययेणाधो
गमनं अपानस्य गतिः ते प्राणापानगती रुद्ध्वा प्राणायामपरायणाः प्राणायामतत्पराः कुंभकाख्यं प्राणायामं कुर्वंतीत्यर्थः २९ द्वा
दशं यज्ञमाह अपरे इति नियतो निगृहीतः आहारो विषयभोगो यैस्ते नियताहारा वैराग्यादिमंतः प्राणेष्विति मनःश्रितानहंमा रा
ख्यां तत्ररिंद्रियाणि प्राणशब्देन गृह्यंते द्वितीयांतप्राणशब्देन श्रोत्रादीनि वागादीनि च गृह्यंते तान् प्राणान् प्राणेषु मनःश्रि

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे प्राणापानगती रुद्ध्वा प्राणायामपरायणाः
२९ अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ३०

तोहं कामादिवृत्तिः करणवृत्तिभेदेषु बुद्धेः प्राक् गृहीतत्वात् अग्रहणं जुह्वति प्रविलापयंतीति इंद्रियाणि संकल्पात्मके मनसि सं
हृत्य मनोपि स्मरणात्मके चित्ते संहृत्य तदपि अहंकारे संहरंति स चाभिमानरूपोऽहंकारो भिमंतव्याभावात् स्वयमेव दग्धेंधनानल
वद्विलीयते तेन ज्ञानेवांसमाधिबुद्धिरस्ति ते आभिमानिका बुद्धिर्बोधरूपः पर्वतस्याभ्योनिः कृष्टाञ्चतत्त्वतत्त्वानप्रकृत्या संनापवी
वेसहसंत्वाभिमानिका इति सहस्रमन्वंतराणीत्यनुश्रुतः भोति कल्पयोगोत्रिनोक्तः पदनुष्टात त्वप्रकृत्य तत्र्यैवोर्क्षमो
निकाऽनुशतं सूर्यमिति अत्रापि शातं मन्वंतराणीत्यनुबंजनीयं सर्वेऽप्येते यज्ञविदो यज्ञलक्षणाः यज्ञेन क्षपितं क
ल्मषं येषां ते तथाविधा भवंतीति सर्वे यज्ञाः कल्मषक्षयपापाये वै भवंतीति न पुनः साक्षान्मोक्षायेत्यर्थः ३० ॥ ॥

सर्वेषांमेतेषांमध्येअन्यतममप्यनुष्ठातुमशक्तो नं प्रतिपादयन्नेति यज्ञाः पंचैते यज्ञाः तेभ्यः शिष्टमवशिष्टममृतमित्याख्यं
यत्तद्ये भुंजते तेपि चित्तशुद्धिद्वारा सनातनं ब्रह्म यांति प्राप्नुवंति अयज्ञस्य पूर्वोक्तेषु यज्ञेष्वन्यतमो वा नित्याः पंचैव वा य
स्य यज्ञा न संति स अयज्ञः तस्यायमपि लोको नास्ति अन्यः परलोकः आत्म लोको वा कुतो भवेत् कुत्सितत्वादित्यर्थः ३१
एवमिति ब्रह्मणो वेदस्य मुखे द्वारे एवं वितता विस्तारिता गुरुभिरुपदिष्टा इत्यर्थः कर्मजान कायिक वाचिक मानसि
क कर्मजान् न तु नैष्कर्म्यरूपान् एवं ज्ञात्वा अस्मादशुभान्मोक्षसे तत्त्वज्ञानोत्पत्तिद्वारेणेत्यर्थः ३२ यदर्थमेते यज्ञाउ

यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनं नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ३१ एवं बहुविधा
यज्ञा वितता ब्रह्मणो मुखे कर्मजान विद्धि तान् सर्वान् एवं ज्ञात्वा विमोक्षसे ३२ श्रेयान् द्रव्यमयाद्यज्ञात्
ज्ञानयज्ञः परंतप सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ३३ तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया उपदे
क्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ३४

पर्यस्तास्तेज्ञानयज्ञस्तेभ्यः श्रेयानिति द्रव्यं बाह्याभ्यंतरं च देहेंद्रियादि तत्साध्यात् द्रव्यमयात् यज्ञात् ज्ञानयज्ञः निरोधवाङ्मनः
कायप्रवृत्त्युपरमात्मकः श्रेयान् प्रशस्ततरः ये इमे तं प्रति न तेषामपि प्रशस्तत्वं द्योतते तत्र हेतुः सर्वमिति कर्माकर्मफलं सर्वमख
खिलं सर्वांगोपसंहाराद्युक्तं ज्ञाने परिसमाप्यते अंतर्भवति यथा कृताय विजितायाधरेयाः संयंत्येवं सर्वं तमभिसमे
ति यत्किंचित्प्रजाः साधु कुर्वंति यस्तद्वेद यत्स वेदेति ३३ तद्विद्धीति ज्ञानिनः गुं यज्ञाः तत्त्वदर्शिनः अनुभववंतः ज्ञानं
ब्रह्मस्पष्टार्थः श्लोकः ३४

यत्ज्ञात्वेति यत् चिन्मात्रस्वरूपं ब्रह्मज्ञात्वा एवं इदानीमिव पुनर्मोहं न यास्यसि अपि च येन ज्ञानेन भूतानि पित्रादिस्तं
बपर्यंतानि आत्मनि मयि त्वंपदलक्ष्यार्थे तदनंतरं परमेश्वरे प्रतिबिंद्रक्ष्यसि नान्योस्तीति द्रक्ष्यसि प्रतीत्योत्यस्य द्रष्टा निर्विशेषात्मा
भाष्येतु साक्षादात्मस्थानि भूतानि मानीति द्रक्ष्यसि अथो अपि मयि वासुदेवे परमेश्वरे च इमानीति क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिष
त्प्रसिद्धं द्रक्ष्यसीत्यर्थ इति ३५ अपिचेति वृजिनं वृजिनार्णवं धर्मोपि मुमुक्षोः पापमित्युच्यते ३६ यथेति एधांसि का

यत्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव। येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ३५ अपि चेदसि पापेभ्यः सर्वे
भ्यः पापकृत्तमः सर्वज्ञानप्लवेनैव वृजिनं संतरिष्यसि ३६ यथैधांसि समिद्धोग्निर्भस्मसात् कुरुतेर्जुन ज्ञाना
ग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ३७ न हि ज्ञानेन सदृशं पवित्रमिह विद्यते तत्स्वयं योगसंसिद्धः का
लेनात्मनि विंदति ३८ श्रद्धावान् लभते ज्ञानं तत्परः संयतेंद्रियः ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति
३९

ष्टानि कर्माणि प्रारब्धान्यपि ३७ न हीति योगेन निष्कामकर्मानुष्ठानेन समाधियोगेन वा संसिद्धः संस्कृतः योग्यतां प्राप्तः काले
नेति चिरप्रयत्नसाध्यत्वं ज्ञानस्योच्यते ३८ श्रद्धावान् ज्ञानं लभते श्रद्धावानपि मंदप्रयत्नो माभूदित्याह तत्पर इति
तत्परोप्यजितेंद्रियो माभूदित्याह संयतेंद्रियः स शांतिं विदेहकैवल्यं अचिरेण प्रारब्धकर्मसमाप्तौ सत्यां ३९

अज्ञ इति अज्ञः सुखेन चिकित्सितुं शक्यः अश्रद्दधानो यत्नेन संशयात्मा त्वसाध्य एव यतः मित्रादिष्वपि संशयं कुर्वतोस्य
अयं लोकोपि नास्ति नापि परः वेदवाक्येपि संशयात् अत एव सर्वदा संशयाकुलत्वात्॰ सुखमपि तस्य नास्ति तस्मा
त्संशयो न कर्त्तव्यः ४॰ किंच योगेति योगेन कर्मयोगेन कर्मदर्शिनात्मकेन संन्यस्तानि फलतः स्वरूपतो वा त्यक्तानि क
र्माणि येन तं योगसंन्यस्तकर्माणं ज्ञानेन सम्यग्दर्शनेन सम्यक् छिन्नाः संशया आत्मा देहोन्यो वा अन्योपि विभुर विभु

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति नायं लोकोस्ति न परो न सुखं संशयात्मनः ४॰ योग
संन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं आत्मवंतं न कर्माणि निबध्नंति धनंजय ४१ तस्माद
ज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः छित्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ४२ इ
ति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ब्रह्मयोगो
नाम चतुर्थोध्यायः ४

वि वाॅपि भुरपि कर्ता अकर्ता वा अकर्तव्य एको ऽनेको वा एकोपि सगुणो निर्गुणो वेत्येवमादयः यस्य यज्ञानसंछिन्नसंशयस्तं आत्म
वंतं शमदमादिपरं कर्माणि कृतानि न निबध्नंति हे धनंजय ४१ तस्मादिति हृत्स्थं बुद्धिस्थं ज्ञानासिना ज्ञानखड्गे
न योगं सम्यग्दर्शनोपायं निष्कामकर्म आतिष्ठ कुरु उत्तिष्ठ युद्धायेति शेषः ४२ चतुर्थोध्यायः ४ ॥ त्रिव ३४

तृतीयेध्यायेलोकेस्मिन्द्विविधानिष्टेतिविभिन्नाधिकारिकं प्रस्तुत्य न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोश्नुते इत्यादिनाकर्मनिष्टाया
ज्ञाननिष्टांगत्वेनमुमुक्षुणानिर्वंधेनानुष्टेयत्वमुक्तं कर्मण्येवाधिकारस्ते इत्यादिनाउत्पन्नेसम्यग्दर्शनेनकृतमपिकर्माकृतमे
वभवतिज्ञानेनकर्मदग्धत्वादिवाधात् अतस्तेतृष्याचेष्टावत्कर्मवाकर्तव्यंसंन्यासोवाकर्तव्यइत्यनास्तिप्राप्तोक्तं अथेदानींपं
चमेष्टेयोज्ञानार्थिनावैराग्योत्पन्नेः ज्ञानकृतेनैवानुष्टेयसंपन्नेतुवैराग्येदृष्टविक्षेपनिवृत्त्यर्थंकर्मसंन्यासंकृत्वाज्ञानोत्पत्त्य
र्थंयोगोनुष्टेयइत्युच्यतेतत्रतुर्थेत्यक्तसर्वपरिग्रहइति संन्यासः योगमातिष्ठोत्तिष्ठेतिकर्मयोगश्चेकंमांप्रतिविहितः नचैत
योस्थितिगतिवद्युगपदेकेनसमयानुष्टानंकर्तुंशक्यतेपरस्परविरुद्धत्वादितिमन्वानोर्जुनउवाचसंन्यासमितिहेकृष्णपा

अर्जुनउवाच संन्यासंकर्मणांकृष्णपुनर्योगंचशंससि यच्छ्रेयएतयोरेकंतन्मेब्रूहिसुनिश्चितं १
श्रीभगवानुवाच संन्यासःकर्मयोगश्चनिःश्रेयसकरावुभौ तयोस्तुकर्मसंन्यासात्कर्मयोगोविशिष्यते २

४

पकर्मणांमेमहं ज्ञानार्थिनेसंन्यासंकर्मयोगंचद्वयंपरस्परविरुद्धंकथंशंससिकथयसिपुनरित्यनेनप्रागपिलयावेदकर्तीर्
ददयंविहितमस्तीतिगम्यतेयथाचश्रुतिर्भवतः एतमेवप्रव्राजिनोलोकमिच्छंतः प्रव्रजेतिसंसारमेवनिःसारंदृष्ट्वा
सारदिदृक्षयप्राव्रजंत्यकृतोद्वाहाः परंवैराग्यमास्थिताइतिचतथातमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेन
दानेनतपसानाशकेनेतिमहायज्ञैश्च यश्चोग्नवृत्तीयंक्रियतेतनुरितिचर्व्रह्मात्वप्रत्नदर्शनयोग्याअतएतयोः श्रुतिवि
हितत्वेनप्रशस्ततयोर्मध्येएकंश्रेयः प्रशस्ततरंयत्तन्मेसुनिश्चितं ब्रूहीतिप्रश्नः अस्योत्तरंभगवानुवाचसंन्यासइति
निःश्रेयसकरौज्ञानोत्पत्तिहेतुत्वात् तथापिकर्मसंन्यासात् अविरक्तकृतात्कर्मयोगएवविशिष्यतेचित्तशुद्धिद्वा

ननु प्रत्यक्षः कर्मयोगिनां विक्षेपः संन्यासिनां तु सन्नास्तीति कथमुच्यते कर्मयोगो विशिष्यत इत्याशंक्याह ज्ञेय इति योरा
गद्वेषरहितः स कर्म सुखरूपं तस्य तं कैषुवा नित्यसंन्यास्येव एतेन साधनभूतयोः सांख्ययोगयोः रागद्वेषराहित्य
कृतं साम्यमुक्तं फलभूतयोस्तु सर्वविकल्पराहित्यरूपं साम्यं अनंतरश्लोकाभ्यामुच्यते तथापि चित्तस्याभाव्यात्
कदाचित्संन्यासिनां रागो द्वयेपातासंकास्तिनेतरस्येति सारावश्च यानि तिमावः पशुश्चैवं तथापि हि प्रसिद्धं निर्द्वंद्वः द्वंद्वः सत्त्वा
नृतयो रात्मानात्म[illegible]नो र्मिथुनं परस्पराध्यासस्तद्रहितः सांख्यः रागाद्युदयहेतोरज्ञानस्यात्यंतोच्छेदात्सुखं कर्मकरणा

ज्ञेयः स नित्यसंन्यासी येन द्वेष्टि न कांक्षति
निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ३

प्यासं विनापि बंधात्संसारात् केवलेन ज्ञानेनैव मुच्यते न कर्माण्यपेक्षते यद्वा निर्द्वंद्वो द्वंद्वं द्वे वे मिथुनं त
स्मात् द्वंद्वात् मिथुनं प्रजापतेरिति श्रुते द्वंद्वस्त्रीपुंसयोर्मिथुनं तद्रहितः स्त्र्यादि त्यागी संन्यासी अप्रनाया
सेन मुच्यते रण्यादिलयस्याभयत्र तुल्यत्वात् अत्र च कुटुंबभरणवैयग्र्याभावात् सुखं मुच्यत इत्यर्थः ३

नन्वेकत्र पाताशंका एकत्र कर्मस्त्रमस्तु तदनयोः पथ्योः कतरः श्रेयानित्याशंक्य द्वयोरपि फलतः साम्यमित्याह सांख्ययोगावि
ति सांख्यत्वमित्येकीभावः इतियास्कः एकीभावेनात्मानन्यत्वेन ख्यायते प्रकाश्यते वस्तुस्वरूपमनयेति संख्या स्थूल
सूक्ष्मकारणप्रपंचस्य निर्विकल्पे प्रत्यगात्मनि प्रविलापनेन उदिता चित्तवृत्तिः तत्साधनभूतो यः सांख्यः संन्यासः सच
दा दारादिबुद्ध्यंतानां पर्यायेनात्मन्येकीभावेनन्यसनं त्यागः प्रविलापनं तथा यागो पि अग्निहोत्रसंध्योपासनादिर्निर्विक
ल्पसमाधिपर्यंतमनुष्ठानं तत्र मुख्यस्य योगस्य लक्षणं योगश्चित्तवृत्तिनिरोधः इति वृत्तयश्च प्रमाणविपर्ययविकल्पनिद्रास्मृ वि
तयः तत्र प्रत्यक्षानुमानागमाः प्रमाणानि तेषु प्रत्यक्षं इंद्रियं तज्जा वृत्तिः रूपादिविषयं पयार्थेन ज्ञानं विपर्य

सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः
एकमप्यास्थितः सम्यगुभयोर्विंदते फलं ४ १०

यस्तु तत्रैव रजतादिविषयं भ्रांतिरूपं ज्ञानं संशयो पि द्वयं शुक्तिर्वा रजतं वेति अनिर्धारितान्यतरकं ज्ञानं स विपर्यय
एवांतर्भवति विकल्पस्तु शब्दज्ञानानुपाती वस्तुशून्यः यथा पुरुषस्य चैतन्यं न हि पुरुषश्चैतन्यं च तत्संबंधानां पृथ
क्त्वमस्ति किंतु चैतन्यमेव हि स्वाव्दत्तेयेणोच्यते नापि बंध्यासुतस्य स्वरूपमस्ति अथापि शब्देनाभिलप्यते सोयं वि
कल्पः शब्दज्ञानानुपाती वस्तुशून्यः एकस्मिन्नानेतिबुद्धिरसति वसबुद्धिरिति निद्रास्मृती लोकप्रसिद्धे एतासां
निरोधश्च निर्विकल्पः प्रत्यगात्मेवाविशिष्यते तावतो फलभूतो सांख्ययोगौ तत्साधनभूतो संन्यासकर्मयोगाख्यो
तत्रोत्पयोः साम्यज्ञेयः स नित्यसंन्यासीत्यनेन सूचितं प्राग्योस्त्वे क्रम उच्यते आस्थितः अनुतिष्ठति फलं निर्वि

योगैः योगिभिः अर्थं प्राप्यं च प्रत्ययांतो यं योगशब्दः स्थानं मोक्षाख्यं एकं अभिन्नं स्पष्टा योजना श्लोकद्वयस्य ५ नन्वेवं
निर्विकल्पस्थानप्राप्तये वै युक्तो स्यात्तां तत्तेन नान्यः पंथा विद्यतेऽयनायेति श्रुतिविरुद्धमित्याशंक्याह संन्यासस्त्विति
संन्यासो नैष्कर्म्यं अयोगतो यं योगं विना आप्तुं दुःखं हे महाबाहो अयमर्थः निर्विकल्पसमाधिरपि तत्त्वमसीत्येतद्वा
क्यार्थप्रतिपत्त्युपायभूत एव न स्वतः पुरुषार्थ इति द्वितीयमार्गस्याभावान्नेयं श्रुतिविरोधः शांतो दांत उपरतस्ति
तिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीति श्रुत्येव समाधिवत्समाधिरप्यात्मदर्शनार्थत्वस्य दर्शितत्वात् तथा च स

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते एकं सांख्यं च योगं च यः पश्यति स पश्यति ५
संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ६

समाहितपदं वार्त्तिककारैर्व्याख्यातं स्वातंत्र्यं येषु कर्तुः स्यात्करणं करणं प्रति तान्येव तु निक्षिप्तानि कर्माणीह समादि
भिः अस्वातंत्र्यं तु येषु स्यात्करणं करणं प्रति समाहितो न्यायेऽदनीतान्निरोधो विधीयते अस्वातंत्र्यं गुरूपदेशाये स
त्वं येषु मानमेव व्यवहारनिरोधेषु पिंडीकृत्येंद्रियग्रामं बुद्धावारोप्य निश्चलं विपर्यासं तत्स्मरणं तत्कालिके क्वचिदनुरो
धतः एषोऽप्युपायः सर्वत्र वेदांतेषु प्रतिष्ठितः न त्वमस्याद्विवाक्यार्थज्ञानोत्पत्त्यर्थं मादरादिति एवं व्यतिरेकमुक्त्वा
न्वयमाह योगयुक्त इति मुनिः संन्यासी न चिरेण शीघ्रमेव ब्रह्माधिगच्छति वाक्यश्रवणमात्रेण न तु केवलसंन्या
सी यथोक्तेन च संन्यसनादेवासिद्धिं समधिगच्छतीति ६

योगेति योगेन निर्विकल्पसमाधिना युक्तो योगयुक्तः अत एव विशुद्धो वृत्तिसारूप्यदोषेण हीनः आत्मा प्रत्यक्चेतनरू
पो यस्य निर्विकल्पावस्थायां केवल एव चेतनोऽस्ति नान्य वेद्यतं तदा द्रष्टुः स्वरूपेऽवस्थानं वृत्तिसारूप्यमितरत्रेति तदाहे
त्यभावेऽन्तरत्र वृत्तिकाले इति सो त्वंपदलक्ष्यार्थः अत्र हेतुर्यतो यं विजितचित्तो जितेन्द्रियश्च एवं शुद्धत्वंपदार्थ उक्तः तस्या
तत्पदार्थाभेदमाह सर्वभूतात्मभूतात्मेति सर्वेषां भूतानां ब्रह्मादिस्तम्बपर्यन्तानां चेतनाचेतनानां आत्मभूतः कनक
मिव कुण्डलादीनां स्वरूपभूतः कारणानन्यत्वात्कार्यस्य सर्वभूतात्मभूतश्चात्मा प्रत्यक्चेतनो यस्य येन तु सर्वेषां भूता
नां आत्मभूत कनकमिव कुण्डलादीनां आत्मभूतश्चात्मा यस्येति भाष्ये सर्वभूतात्मेत्येतावतैवार्थलाभात्मभूतद

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ७

त्यधिकमिवेति द्वाविंशतं स्वयं च सर्वभूतात्मभूतश्चात्मा यस्येति विग्रहो दर्शितः तन्न तत्र संकोचे कारणाभावात्सर्व ? पं
पदेनैवाचिज्जडयोर्ग्रहे परस्यापि आत्मभूतेत्यधिकमेव सर्वभूतश्चेतनाचेतनप्रपंचभूतः आत्मा यस्येति तत्रापीष्टा र
र्थलाभात् सर्वेषु आत्मा न स्वतन्त्र भूतः आत्मा यस्येति विग्रहे सर्वात्मभूतात्मेत्येतावतैवासिद्धप्रपंचभूतपरस्य वैय्य
र्थ्यं च नाप्यमते ब्रह्मादीनां प्रत्यग्भूतश्चात्मा यस्येति श्रुत्येव जीवब्रह्माभेदे उच्यते परस्यं तु उपादानत्वलिंगेन जडसाधा
रणेन जीवस्य ब्रह्माभेदोऽगम्यत इति विद्वद्भिरवधेयः तेन च यतो यं सर्वेषां प्रत्यगात्माऽतो लोकमिव सोऽपि कुर्व
न्नपि न लिप्यतेऽप्रसंगात्मज्ञानात् कर्मादेर्वाधितत्वात्त्वंपदार्थेन तत्पदार्थतीतावपि दुःखत्वात् दृष्ट्वा रागद्वेषाधकत्वाच्चे

नलिप्यतेनदुपपादयति नैवेति द्वाभ्यां तत्त्ववित् अहं नैव किंचित्करोमीति मन्येत मन्येत तत्र हेतुः इंद्रियाणीत्युपलक्षणमिदं
प्राणादेरपि इंद्रियाद्य इंद्रियार्थेषु विषयेषु वर्तंत इति धारयन् निश्चिन्वन् अहं विषयेषु न वर्ते इति मन्यते धारयन्नि
ति हेतोः शतृप्रत्ययः अत्र दर्शनादयः पंच ज्ञानेंद्रियाणां व्यापाराः गमन विसर्ग प्रलपन ग्रहणानि कर्मेंद्रियाणां तानि
च मनस उपलक्षणानि श्वसन्निति प्राणस्य स्वपन्निति बुद्धेः उन्मेषणनिमेषणे तु कूर्माख्य प्राणस्येति विभागः क्रमस्त्व

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् पश्यन्शृण्वन्स्पृशंजिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् ८
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् ९ ब्रह्मण्या
धाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते न स पापेन पद्मपत्रमिवांभसा १० कायेन म
नसा बुद्ध्या केवलैरिंद्रियैरपि योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये ११ ॥ ॥

विवक्षितः एतानि कुर्वन्नपि न लिप्यत इत्यर्थः ८।९ ब्रह्मणीति यतो विद्वान्न लिप्यते तस्मादविद्वानपि ब्रह्मणि सर्वाणि तयी
मिति आधाय अयमेव कारयिता न त्वहं कर्तेति समर्प्य यः कर्माणि करोति सः पापेन न लिप्यते अंभसा पद्मपत्रमिव
१० कायेनेति केवलैरिति विपरिणामेन सर्वत्र संबंधनीयं केवलेन कायेन अहमयं ब्राह्मणो युवेत्याध्यासशून्ये
न एवं मनसा बुद्ध्यापि संगं त्यक्त्वा देहादिभ्यो विविक्तेपि आत्मनि नित्तां किं कादिरहं करोमीत्यभिनिवेशं त्यक्त्वा योगिनः क
र्म कुर्वंति आत्मशुद्धये चित्तशुद्ध्यर्थं तस्मात्त्वमपि तत्रैवाधिकारोसीति तदेव त्वं कुरु ११

किंच युक्त इति युक्तो ब्रह्मण्याधाय कर्माणीत्यादिना उक्तलक्षणः कर्मणां फलं त्यक्त्वा ईश्वरे समर्प्य शांतिं कैवल्यं नैष्ठि
कीं सत्वशुद्ध्यादिक्रमप्राप्तब्रह्मनिष्ठाफलभूतां प्राप्नोति अयुक्तः तद्विपरीतः कामकारेण स्वेच्छया फले सक्तः सन्
नितरां बध्यते ॥१२॥ एवमद्विवान् फलत्यासत्तेपा नानाक्रियावशात्कर्मभिर्बध्यते चेत्युक्तं विद्वांस्तु तद्विपरीत इत्याह स
र्वकर्माणीति वशी जितचित्तः समाधिस्थो योगी नवद्वारेन वैव पंचज्ञानेंद्रियाणि षष्ठः प्राणस्तेनैव तत्तत्प्रवर्त्तनानां
कर्मेंद्रियाणां संग्रहः बुद्ध्यहंकारचित्तानीति नव एतानि द्वाराणि पुरप्राप्ते जीवस्य भोगार्थं विषयप्रवेश्यानानियामि
न्नवद्वारे शरीराख्ये पुरे विचित्रवासनाकल्पितानंतविषयप्रवेतिश्यनेकैः सर्वकर्मसचिवैराधिष्ठिते सुखदुःखादिना

युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं अयुक्तः कामकामकारेण फले सक्तो निबध्यते ॥१२॥ सर्व
कर्माणि मनसा संन्यस्यास्ते सुखं वशी नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥१३॥

नायएयवतिष्ठन्मनसा सर्वद्वारे द्वारेन कुंचिकपास सर्वाणि पुरपतिरिव राजकार्याणि संन्यस्य सुखं निर्विकल्पसच्चिन्मात्रस्व
रूपेणास्ते कर्मक्षेत्रस्यैव धर्मः नत्वात्मन इति क्षेत्रे त्यक्तं शरीरान्येव तथा च श्रुतिः शरीरे पापफलेनो हित्वेति सर्वहार्दः सुकृतो म
दंतेविरोगं तत्व स्वापामि ति [redacted] च देही सन् देहाभिमानकाले बुद्ध्यानेयात्पर्यः तदापि नैव कुर्वन्नास्ते न कारयन्ना
स्तो राजेवामात्येषु निहितभारः समाधौ देहेंद्रियेण सहात्मनः संबंधाभावदर्शनात्त्यद्वा नवद्वाराणि च सस्रोत्र नासाविलद्वया
नि षट् सप्तमं मुखं अधस्तने द्वे इति अस्मिन्पक्षे इंद्रियाणि परिच्छादिका बुद्धिरमात्यः अहंकारो युवराजा इत्या
दि विदुषः कर्मसंबंध एव नास्ति दूरे तत्फलासक्तिरिति भावः ॥१३॥

म.भा.
भी.प.
गी.टी.
पी.३८

नन्वेवंभूतकर्तृत्वंस्वामित्वंकारयितृत्वंवास्यमास्तु अयस्कांतवदविकारस्यैवसतः कर्तृत्वादिधर्माहंकारादिप्रवर्त
कत्वमस्त्वित्याशंक्याह नकर्तृत्वमितिनकर्तृत्वमहंकारस्यकर्माणिइंद्रियाणांवचनादानादीनिश्रवणादानादी
निलोकस्य लोक्यतेप्रकाश्यतइतिलोकोजडवर्गः प्रभुश्चिदात्मासूर्यइवास्मदादीनांप्रकाशकोपिनकर्मादेप्र

नकर्तृत्वंनकर्माणिलोकस्यसृजति
प्रभुः नकर्मफलसंयोगंस्वभावस्तुप्रवर्तते १४

वर्तकस्तुभवत्ऽस्यकर्मफलसंयोगंवानसृजतिकिंत्वयोपादकयस्यस्वभावःसतथाप्रवर्ततेयथासूर्योभ्यु
दितेःकमलानांप्रकाशकोपिनकर्मादौप्रवर्तकस्तुभवत्एवमात्मनिप्रकाशमानेघटादयोनचेष्टंतेमनुष्या
दयस्तुचेष्टंतेनत्वात्मकस्यचित्प्रवर्तकोनिवर्तकोवालोहायस्कांतयोरिवसत्यान्तयोरात्मानात्मनोःसंबं

४८

ननु एष एव साधु कर्म कारयति तं यमुन्निनीषते एष उ एव असाधु कर्म कारयति तं यमधो निनीषत इति श्रुत्या परमेश्वरे कार
यितृत्वं बोध्यते तत्कथमुच्यते स्वभावस्तु प्रवर्तत इति तत्राह नादत्त इति कस्यचित्कर्तुः पापं अयं नादत्ते नापि सुकृतं
आदत्ते कारयितृत्वाभावात् यतो विभुर्व्यापको निष्क्रिय इति यावत् सा क्रिया ह्यत्र प्रवर्तयंस्तदीयं पापं पुण्यं वा लभते
अयं तेन तथा किंतु सूर्यवत् प्रकाशत एव न तु स्वप्रकाश्यानां कृष्यादीनां कर्मणा संबध्यत इति भावः कारयितृत्वम
प्यस्य सत्तामात्रेण सूर्यवत् यथा पटः प्रकाशते सविता प्रकाशयतीति बोधः कथं तर्हि ईश्वराराधनार्थं कर्माणि कुर्वं
ति तदकरणाच्च बिभ्यतीत्याशंक्याह अज्ञानेनेति यथाहि महाराजस्य सार्वभौमस्याहं सर्वेश्वरो निवृत्तोऽस्मीति ज्ञानं

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जंतवः १५ ज्ञानेन तु तद
ज्ञानं येषां नाशितमात्मनः तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं १६

अज्ञानेन मोहेनावृतं चेतस्तत्र विविधानि चक्रादीनि महान्ति संकटस्थानानि पश्यति अहो अहं दीनोऽस्मि दुःखोऽस्मीति च
मुह्यति तद्वदेते जंतवः स्वस्याहं ब्रह्मास्मीति प्रमाणेन ब्रह्मभावमजानन्त ईश्वरादात्मानं पृथक् मन्यमाना द्वैतात्मनोः स
व्यसेवकभावं च पश्यन्तो मुह्यन्ति तथा च श्रुतिः अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स
देवानामिति एष ह्येवेति श्रुतिरपि भ्रान्तजनव्यवहारविषयैवेति भावः १५ ततश्चात्मनः आवरकमज्ञानं येषां ज्ञाने
न ब्रह्मास्मीति प्रमाणजेन नाशितं तेषां तज्ज्ञानं कर्तृ आदित्यवत् आदित्यो यथा कृत्स्नं दृश्यं प्रकाशयति तद्वत्
परं परमात्मतत्त्वं परमार्थवस्तु प्रकाशयति अज्ञाननिवृत्त्यर्थं ज्ञानमेष्टव्यमिति भावः १६

तद्बुद्धयः इति यत्परं ब्रह्म प्रकाशितं तत्रैव बुद्धिरस्ति ब्रह्मैवेति निश्चयो येषामापाततः श्रुत्यर्थविदां तेन तद्बुद्धयः तदे वात्मा प्रत्यक्त्वं येषां श्रवणमननात्मकविचारेण प्रमाणप्रमेयगतासंभावनाविहीना नो तेन तदात्मानः तत्रैव निष्ठा विजातीयवृत्तिप्रवाहो येषां न देहादावनात्मनि आत्मबोधरूपविज्ञानेन निर्धूतं कल्मषं मूलाज्ञानं संसारबीजभूतं येषां ते ज्ञाननिर्धूतकल्मषाः १७ एतेषां जगति दृष्टिमाह विद्येति उत्तमे ब्राह्मणे चंडालादौ दुष्टे वा समं ब्रह्मैव सद्रूपेण स्फुरणरूपेणाभासमानं दृष्टं शीलं येषां ते समदर्शिनः यथोक्तं अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकं आद्यं त्रयं ब्रह्मरूपं

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः १७ विद्या॥
विनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शिनः १८ इहैव तैर्जि
तः सर्गो येषां साम्ये स्थितं मनः निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः १९

जगद्रूपं ततो द्वयमिति चराचरं जगद्ब्रह्मदृष्ट्यैव पश्यंतीत्यर्थः १८ ननु समासमाभ्यां विषमसमे पूजातः इति तुल्यश्रुतशीलाय ब्राह्मणद्वयाय विषमां पूजां प्रयुक्तवतः तथा अतुल्यश्रुतशीलाय ब्राह्मणद्वयाय च समां पूजां प्रयुक्तवतः आभोज्यान्नत्वं गौतमेन स्मर्यते तत्कथं ब्राह्मणचंडालयोः समदर्शित्वं युक्तमित्याशंक्याह इहैवेति येषां मनः सर्वभूतेषु साम्ये ब्रह्मभावे स्थितं निश्चलं तैरिहैव जीवद्भिरेव सर्गो जन्म जितो वशीकृतो हि यस्मात् निर्दोषं समं सर्वत्राविषमं ब्रह्मास्ति यथा हिरण्मयो देवतानतस्य पीडयोः स्वर्ण इव साम्यं पश्यति पूजकस्तु आकारद्वयकृततारतम्यं पश्यतीति तद्वते पूजा स्मृतिभिर्निंदिता कृततारतम्या विषयासाम्यदृष्टिस्तु तत्त्वविषयेति भावः यस्मादेवं ते साम्यं पश्यंति तस्माद्ब्रह्मणि ते प्र

ऐं ब्रह्मकारसेद्रष्टारः स्थितानामकौशलेन समं संज्ञिगताः १९

गी०टी
४०

ननुसषुप्तितुल्यस्यमोक्षसुखस्यार्थेकिमितिप्राप्तमेवायंदिव्यस्त्र्यन्नपानगीतवाद्यादिसुखंत्यजेदित्याशंक्यबाह्यसुखंअनित्यत्वा
त्वोत्तरंनिंदतियेहीतिसंस्पर्शजाविषयसंबंधजादुःखयोनित्वेहेतुःआद्यंतवंतइतिजातेपुत्रेयत्सुखंतस्मिन्नष्टेनश्यतिदुःखंचम
हत्प्रयच्छतीतितेषुभोगेषुबुधःपरिपाकदर्शीनरमते २२ कःपुनर्मुख्यःसुखीत्याहशक्नोतीतिइहैवजीवन्नेवदेहेप्राक्शरीर
विमोक्षणात्यावद्देहपातंमयाकामक्रोधौजितावितिविस्रंभोनकर्तव्यइत्यर्थःस्मृतेदृष्टेअनुमितेवाविषयेयोरागस्तृ
ष्णारूपाअत्यभिलाषःसकामःक्रोधस्तुद्वेषःएवंविषयेद्वेष्यस्तौकामक्रोधौउद्भवोयस्यवेगस्यसरोमांचसतृष्णनेत्रव
क्त्रलिंगोंतःकरणप्रक्षोभरूपःकामोद्भवोवेगोगात्रप्रकंपस्वेदसंदष्टोष्टपुटरक्तनेत्रादिलिंगःक्रोधोद्भवोवेगस्तंकाम

येहिसंस्पर्शजाभोगादुःखयोनयएवते आद्यंतवंतःकौंतेयनतेषुरमतेबुधाः २२ शक्नोती
हैवयःसोढुंप्राक्शरीरविमोक्षणात् कामक्रोधोद्भवंवेगंसयुक्तःससुखीनरः २३ योंतःसुखों
तरारामस्तथांतर्ज्योतिरेवयः सयोगीब्रह्मनिर्वाणंब्रह्मभूतोधिगच्छति २४ लभंतेब्रह्मनिर्वाणमृष
यःक्षीणकल्मषाः छिन्नद्वैधायतात्मानःसर्वभूतहितेरताः कामक्रोधवियुक्तानांयतीनांयतचेतसां
अभितोब्रह्मनिर्वाणंवर्ततेविदितात्मनां २६

क्रोधोद्भवंवेगंसोढुंयःशक्नोतिसएवयुक्तोयोगीमुख्यःससुखीत्युक्तंतत्राहयइतिसुखंविषयसंगजाप्रीतिरारामःप्रीतिहेतु
स्त्र्यादिभिःसहक्रीडाज्योतिःक्रीडोपकरणानांप्रकाशस्त्वेतेत्रयंयस्यअंतरेवसोंतःसुखोंतरारामोंतर्ज्योतिश्चनबहिर्विषयै
रकइतिएवंशब्दार्थःयःएवंभूतःसयोगीकिमतोयथोक्तंब्रह्मनिर्वाणंपरमानंदंब्रह्मैवइहैवाधिगच्छतीयतोब्रह्मभूतोजी
वन्नेवब्रह्मदर्शनेनब्रह्मभावंगतः लभंतइतिऋषयःसम्यग्दर्शिनःछिन्नद्वैधाःछिन्नसंशयाःयतात्मानोजितचित्ताः
२५ किंतुकामेतिअभितोजीवतांमृतानांचज्ञातात्मतत्वानां २६ श्री
४०

एवं सम्यग्दर्शननिष्ठानां सद्यो मुक्तिमुक्त्वा कर्मयोगश्च संगफलत्यागेनेश्वरप्रीत्यर्थमनुतिष्ठतः सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण मोक्षो
य भवतीत्युक्तं अथेदानीं सम्यग्दर्शनस्यांतरंगसाधनं ध्यानयोगं विस्तरेण वक्ष्यामीति तत्सूत्रभूतान् त्रीन् श्लोकानुपदिशति
स्पर्शानिति अत्र उत्तरार्धेन प्राणायाम उक्तः स्पर्शान्कृत्वा बहिर्बाह्यानिति प्रत्याहार उक्तः भ्रुवोरंतरे चक्षुषी कृत्वेति धारणा
उक्ता विगतेच्छाभयक्रोध इति साधनभूताः फलभूताश्च द्विविधा यमा उक्ताः यतेंद्रियेति वितर्कख्यापतमनायतीति वि
चाराख्यापतवुद्धिरित्यानंदास्मिताख्यो मोक्षपरायण इत्यसंप्रज्ञात उक्तः श्लोकेन योगफलमिति विभागः पाठक्रम
मनतुरुध्यार्थः क्रमेण सूत्रार्थः स्पष्टीक्रियते तत्र विगतेच्छो विगतभयो विगतक्रोध इति संवंधः यो हि शरीर इच्छावान्

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ २७

स इष्टसिद्ध्यर्थं हिंसानृतस्तेयस्त्रीपरिग्रहानिच्छेत् अतो विगतेच्छपदेन तद्विपर्ययान् अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा
यमा इति सूत्रोक्तान् यमान् लक्षयति तथा भयं छेदसंकानपाद्युद्विग्नो न शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा
इति सूत्रोक्तान्नियमान् स्त्रीकर्तुमीष्टे अतो विगतभय इत्यनेन तेषां ग्रहणं तथा क्रोधाक्रांतो मैत्र्यादीन्भावयितुमसक्ते
श्चित्तप्रसादनं कर्तुं न शक्नोतीति ताश्च मैत्रीकरुणामुदितोपेक्षाः तत्र विगतक्रोधः प्रांतिप्रकाशितत्वात् सुखितेषु मैत्री पर
स्पष्टमिदं मम वेष्टं जातमिति भावयेत् तथा दुःखितेषु करुणां पुण्यवत्सु मुदितां पापवत्सूपेक्षां च भावयेत् न चैते
न प्रसादनेन विना चित्तदर्शनस्य नैर्मल्यं भवति सर्वसाधनास्ववस्थायां यमनियमचित्तप्रसादनानां सिद्ध्यर्थं विगतेच्छा

भयक्रोधत्वमीप्सितं तत्त्वं फलावस्थायामपि तदीप्सितं तथा हि संप्रज्ञातसमाधिफलभूतमधुमत्यां योगभूमौ स्थितं यो
गिनं प्रति दिव्याः कामा उपतिष्ठंते तत्रापि विगतेच्छत्वमिष्टं तथा ह्युस्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसंगादिति सू
त्रितं स्थानिनो देवास्ते रूपनिमंत्रणे इहास्यतां इमे रम्यावस्या मा रम्या इमे रा इमा निजरामरणहरा लिरसायनानि इमेव
यं किंकराः स्वपुण्योपार्जितमिदं स्थानं त्वया भुज्यतामिति प्रार्थनायां क्रियमाणायां संगोलिप्सा तत्र न कर्तव्या नापि तल्लाभेनात्मनो महा
भागत्वं देवप्रार्थ्यत्वं मत्वा गर्वोपि कर्तव्यस्तयोः संगस्मययोर्भ्रंशहेतुत्वादिति सूत्रार्थः तेषां भयमपि द्विविधं योगांतरायजं
वितर्कजं च तत्राद्यं व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्ते
तेंतरायः दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासा विक्षेपसहभुव इति सूत्राभ्यामुक्तं स्थानेग्रकर्मण्यपतांऽप्रविरत्ति वैरा
ग्यं अंगमेजयत्वं श्वासैकंपवायु वितर्का हिंसादयस्तज्जं च भयं अस्य निवारणं ईश्वरप्रणिधानेन तथाभ्यस्तत्रितं वितर्क
बाधने प्रतिपक्षभावनमिति वितर्का हिंसादयः कृतकारितानुमोदितभेदेन त्रिविधाः तेपि मृदुमध्याधिमात्र
भेदेन प्रत्येकं त्रिविधास्ते मूलभूता वितर्काः त्रयश्चत्वारः पंचग्रथिकाविंशतिस्त्रिगुणिता एकाशीतिरष्टोत्तरशतं पंच
त्रिंशदधिकं शतं त्र्यधिका वा भवंति शाखाभेदेनानंताश्च दुःखरूपं चानंतं फलं येषां ते दुःखाज्ञानानंतफला इत्य
नया प्रतिपक्षभावनया ते निवर्तनीया इति एवं यमनियमचित्तप्रसादनप्रतिपक्षभावनैर्निरंतराभ्यासैर्वशीकृतचित्तो
योगी विविक्ते देशे प्राशीनः संभवादिति न्यायेन स्थिरसुखमासनमध्यासेत तत्तत्र देशासनेषु ये ते समे शुचौ शर्करा
वह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः मनोनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेत त्रिरुन्न
तं स्थाप्य समं शरीरं हृदींद्रियाणि मनसा संनिरुध्य ब्रह्मोडुपेन प्रतरेत विद्वान् स्रोतांसि सर्वाणि भयावहानीति
वक्षःरित्यत्र विसर्गलोपश्छंदसा निरुन्नतं कटि च वहृत्तः कंदराप्रदेशोष्ठन्नतं ततो जितासनः प्राणायामं समभ्य

द्वे

सेतनेनहिमंदगतेप्राणेसतितदनुसारिमनोपिचांचल्यंत्यजतिनोचेद्वायुविक्षेपेणविक्षिप्यतेतत्रप्राणजयेप्रमाणंप्राणान्
प्रयोज्येहसयुक्तश्चेष्टः नीरोगप्राणेनासिकयोश्चसितेतिश्किस्तुक्तमेवसंगृह्णातिप्राणापानौसमौकृत्वानासाभ्यंतरचारिणौ
इति प्राणापानौसमौतत्स्योर्ध्वाधोगतिविछेदेननासाभ्यंतरचारिणौकुंभकेनकृत्वाततोवाह्यान्वहिर्भवा
न्स्पर्शान्विषयसम्भवान्संवंधान्इंद्रियद्वारान्नित्यंप्रंतर्वेक्रियमाणान्योगीद्रियाणांप्रत्याह
रणेन तानवहिरेवकुर्यात् ततोविषयेभ्योव्यावृत्तेषु करणेषुस्वप्रकालेईवांतर्मनोमा
त्रेणावतिष्टतेत्यर्थः इमंप्रत्याहारंकर्तुमशक्तस्यकागतिरित्यतआहचक्षुश्चैवां
तरेभ्रुवोरितिचाशब्दोवार्थेचक्षुरेववाभ्रुवोरंतरेकुर्यात्खेचरीमुद्रा
मभ्यसेदित्यर्थः साचोक्तायोगसारेतलंविकोर्ध्वस्थितेगर्ते
जिह्वांव्याहत्यधारयेत् दृढासनेस्थिरंतिष्टेन्मुद्रे
षाखेचरीमताभ्रुमध्याहष्टिरप्येषामहा
देवेनकीर्तितेतिग्रयंसर्वोपि
वाह्ये[illegible]विषयेस्वर्यादे
संयमोयथोक्तंप्र
त्याहारमनुष्टातु
मशक्तोभ्रुतेवोप
दिश्यतइतिशेयं २७

जितेंद्रियइतियस्मिन्कस्मिंश्चित्स्थूलेविषयेसूर्येंद्रसिंधुवाविष्णुप्रतिमायांवानाहतध्वनौवान्यत्रवाचक्षुरादीन्यतम
द्वारामनोधारयेत्ततस्तद्विषयाकारतांप्राप्तंतत्रैवचिराभ्यासेनविस्मृतंस्वदेहमपिनपश्यतिसेयंमहाविदेहानामधारणा
अस्यांसिद्धायामिंद्रियगणःस्वंस्वंविषयंनगृह्णातिसोयंबहिर्विषयप्रत्याहारः पूर्वोक्तस्त्वांतरइतिभेदः अंतराबहिर्योस्तुल्य
त्वंसूचितंततःक्षीयतेप्रकाशावरणमितितत्तः अभ्यंतरप्रत्याहारात् तथाबहिरकल्पितावृत्तिर्महाविदेहातत्संयमात्प्रका
शावरणक्षयंइतिपदार्थवित्तेदेहमविस्मृत्यदृढेनपुनःपुनःस्थितस्सूर्यादिध्येयाकारमात्रंक्रियतेतदासावित्तस्यमूर्त्याकारता
रूपावृत्तिः कल्पितायद्यातुनिःशेषेणदेहविस्मृत्यचेतः केवलंध्येयाकारमात्रंभवतितदासामहाविदेहानामधारणा

जितेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः विगतेच्छाभयक्रोधोयःसदामुक्तएवसः २८

तस्याअपिफलंतेनदेवतत्संयमात् तस्यांचेतसोनिग्रहात्प्रकाशावरणक्षयोभवतिसोयंबाह्यविषयःसमाधिर्वितर्का
ख्योद्विविधःसवितर्कोनिर्वितर्कश्चेदाततत्राद्यस्थूलदृश्यसूचितंशब्दार्थज्ञानविकल्पैःसंकीर्णासवितर्केति [redacted]
[redacted] सवितर्कानामसमापत्तिःसमाधिरित्यर्थः यदाविष्णुप्रतिमादौपूर्वापरानुसंधानेनशब्दार्थोल्लेखेनचभावनाप्र
वर्त्ततेतदासवितर्कासमापत्तिः अस्मिन्नेवालंबनेपूर्वापराननुसंधानेनशब्दार्थोल्लेखमंतरेणभावनाप्रव
र्त्ततेतदानिर्वितर्कानामस्फूर्ति परिशुद्धोस्वरूपशून्येवार्थमात्रनिर्भासानिर्वितर्कास्मृतेः शब्दार्थस्मरण
स्यपरिशुद्धोवर्जनेसतिभावयितुःस्वरूपेणशून्यात्तदाहमिदंभावयामीत्येवमाकारवृत्तिरपिभावयितु

नास्त्येवेतियतोर्थमात्रनिर्भासा ध्येयार्थमात्रभासा भासते तेन त्वन्यदिति सूत्रार्थः अस्यां सिद्धायां योगी जितेंद्रिय उ
च्यते जितमना इति अभ्यंतरप्रत्याहारपूर्वकं यदा मनः कल्पिते स्थूले विषये पूर्ववद्देशकालार्थोल्लेखपूर्वकं त
द्वर्जं च मनसो भावनाप्रवर्तते तदा ते उभे समापत्ती सविचारा निर्विचाराख्ये भवतः तथा च सूत्रं एतयैव सविचारा
निर्विचारा च सूक्ष्मविषया व्याख्याता इति अत्र सूक्ष्मविषयेति गृह्यमाणात्पूर्वस्यां स्थूलविषयत्वं गम्यते एतयैव द्विवि
धवितर्कसमापत्त्यैव निर्विचारसमापत्तौ दृष्टायां योगी जितमना इत्युच्यते यदा पुनश्चेतसो मूर्त्याकारतां परि
त्यज्य सत्वादिकैः अहमेवेदं सर्वमित्येवं सकाराभावनाप्रवर्तते सोयं सानंदः समाधिः यदा तु तामपि भावनां परि
त्यज्य विषयवेदनमंतरेण अस्मीत्येतावन्मात्राकाराभावनाप्रवर्तते स सास्मितः यस्मिताहंकारयोर्भेदस्तु क्रमेण
विषयवैमुख्यतदाभिमुख्यमात्रकृतः यथैकएव पूर्वाभिमुखः पश्चिमाभिमुखश्चेति तद्वत् अस्यामवस्थायां यो
गी बुद्धितो विविक्तस्वरूपदर्शनसाक्षात्कारात् जितबुद्धिरित्युच्यते तदेतदुक्तं जितेंद्रियमनोबुद्धिरिति एतान्येव स
माधानानि गुणपर्वाण्युच्यंते तथा च सूत्रं विशेषाविशेषलिंगमात्रालिंगानि गुणपर्वाणीति तत्र विशेषाः स्थू
लभूतानि एकादशेंद्रियाणि च अविशेषाः पंचतन्मात्राणि अहंकारश्च लिंगमात्रं महत्तत्वं अलिंगं प्रधानं
तत्र विशेषादविशेषं प्रविविक्तं त्वतो योगिनो दिने दिने लयाभ्यासात् तस्मिन् स्थूलानींद्रियाणि लीयंते स लयः वहिर्मु
खान्येव वा भवंति स विक्षेपः एवं अविशेषेभ्यो लिंगमात्रं प्रविविक्तितोपि लयविक्षेपौ स्तः लिंगमात्रात्परं पुरुषं
प्रविविक्तितोपि तौ स्तः तावेतौ लयविक्षेपौ अस्य योगबीजं यतो लयविक्षेपरहितं मनः कृत्वा सुनिश्चयं परायात्ममनी
भावं न यात तत्परमं पदमिति एतेषु त्रिषु लीनेष्वाद्यः सुप्तएव द्वितीयो विगलितदेहाहंकारत्वाद्विदेहसंज्ञः तृती
यः प्रकृतिलय इति एतयोः समाधिर्योगः अतएव सूत्रं भवप्रत्ययो विदेहप्रकृतिलयानां भवप्रत्ययो जन्मो

स.भा.
भी.प
गी.टी.
४३

तरहेतरेषांसमाधिर्भवति यद्वाजन्मांतरेषुतेषांजन्मनैवसमाधिसिद्धिः पक्षिणामाका
शगमनसिद्धिवद्भवतीतिसूत्रार्थः सर्वथापितेषांसद्योमुक्तिर्नास्तीतिसिद्धिंयत्तु
ग्रसितानांतस्यापिनिर्विकल्पेचिन्मात्रेलयोभवतितदयंविद्वान्कैवल्यं
धर्ममेघसमाध्याख्यमनुभवति यमधिकृत्यसूत्रयतेक्षणमेकं
क्रतुशतस्यचतुः सम्प्रत्यायत्फलंतदवाप्नोतीतिश्रय
मेवमोक्षाख्यः परंश्रयनंप्राप्यस्यानंयस्यसमु
निर्मोक्षपरायणइत्युच्यतेयतोस्यामेवा
वस्थायांयोगीजीवन्मुक्तइत्यु
च्यतेविगतेच्छाभयक्रोधइति
पादः प्रागेवव्याख्यातः यएवं
भूतः समुदामुक्तः बंधप्रतीति
कालेपिसमुक्तएवास्तिश्रद्धा
नमात्रव्यवधानान्मुक्तिः ए
तेनाहंकारादेर्बंधस्यकालत्रे
येप्यसत्वोन्नेयाभिप्रायात्वंद
र्शितं ३८

शिवं
४३

एवं समाहितचित्तेन किं विज्ञेयमित्युच्यते भोक्तारमिति सोपाधिकेन रूपेण यज्ञानां तपसां च कर्तृरूपेण देवतारू-
पेण च भोक्तारं तथा सर्वेषां भूतानां हिरण्यगर्भादीनामपि महान्तं व्यापिकं ईश्वरं ईशितारं अन्तर्यामिणं सुहृदं सर्वभूतानां
प्राणिनां प्रत्युपकारनिरपेक्षतया उपकारिणं सर्वप्रकारतया साक्षिणं नारायणं मां प्रत्यगभेदेन ज्ञात्वा साक्षात्कृत्य त-
द्भावं प्राप्य शान्तिमनुपाध्यवस्थां निरुपाख्यां कैवल्यसंज्ञां ऋच्छति प्राप्नोति एवं च सोपाधिब्रह्मभावप्राप्तिपूर्वकैवल्य-
निरुपाधिप्राप्तिरिति गम्यते यथोक्तं वार्तिकसारे सोपाधिनिरुपाधिश्च द्विधा ब्रह्मविदुच्यते सोपाधिकः जीवन्नरति
प्राप्नुरिति सोपाधिकस्य दृष्टदोषस्य सर्वकामाप्तिः सर्वस्यात्मत्वदृष्टमीरिता अहमन्नं तथान्नादश्लोककार्यस्य होऽग्र

ओंकारं यज्ञतपसां सर्वलोकमहेश्वरं सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति २९
इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे संन्यासयोगो ना-
म पंचमोऽध्यायः ५ श्रीभगवानुवाच अनाश्रितः कर्मफलं कार्यं कर्म करोति यः स संन्यासी च यो-
गी च न निरग्निर्न चाक्रियः १

हे इति तत्त्वविदः सामगाने सर्वात्मना स्तुता अत्रापि च रूढदृष्टान्तात्सोपाधिस्तत्र विश्रुतः अपूर्वोऽनपरादकः पान्थो-
ष्यते निरुपाधिक इति २९ इति नैलकंठे भारतभावदीपे भीष्मपर्वणि गीतार्थप्रकाशे पंचमोऽध्यायः ५ पूर्वाध्यायान्ते
सूचितं ध्यानयोगं विपरीतुमिच्छन् तत्राधिकारहेतुत्वात्कर्मत्यागो न तावत्स्तोतीति द्वाभ्यां अनाश्रितमिति यः कर्मणां फ-
फलमनाश्रितोऽपेक्षमाणः कार्यं अवश्यकर्तव्यं नित्यं कर्म करोति स एव फलसंकल्पत्यागात् संन्यासी च योगी च भ-
वति न तु निरग्निर्यो विधितः श्रौतस्मार्तकर्मत्यागी स एव संन्यासी नापि अक्रियस्त्यक्तवाङ्मनःकायक्रिय एव वा

केनसाम्येनायंसंन्यासीयोगीचेतिकथ्यते। तत्राह यमितियोहित्यक्तसर्वसंकल्पः ससंन्यासी तादृशश्चध्यानेनयो
गी। अतोनतयोर्भेदः। निःसंकल्पस्तटस्थस्तिष्ठेदेतन्मोक्षलक्षणमितिमैत्रायणीयोपनिषदुक्तस्यमोक्षलक्षणस्य
निःसंकल्पः त्वस्योभयत्रापितुल्यत्वात्। अतोऽयमपिकर्मयोगीफलसंकल्पत्यागात्। निःसंकल्पत्वसा
म्यात्संन्यासीयोगीचभवतीतितिस्तूयते इत्यर्थः योगाधिकारसिद्धयेनिष्कामकर्माण्यनुष्ठेयानीतिश्लो
कद्वयेनात्यर्थ २ तत्रकर्मानुष्ठानस्यावधिमाह आरुरुक्षोरितियावद्धियोगंयमनियमानुष्ठानोपेतम
त्मोत्कं पादारोढुमिच्छतितावत्कर्माण्यनुतिष्ठेत् तस्यप्रारुरुक्षोर्मुनेदारुरुक्षाकारणंप्रतिवैराग्योत्पादनद्वा
राकर्मभवतितस्यवैयोगारूढस्ययोगांगानुष्ठानेप्रवृत्तस्यविक्षेपासहयोगारोहेकर्मणांशमः संन्यासः

यंसंन्यासमितिप्राहुर्योगंतंविद्धिपांडव नह्यसंन्यस्तसंकल्पोयोगीभवतिकश्चनः २ आरुरुक्षो
र्मनेर्योगंकर्मकारणमुच्यते योगारूढस्यतस्यैवशमःकारणमुच्यते ३ यदाहिनेंद्रियार्थेषुनकर्म
स्वनुषज्जते सर्वसंकल्पसंन्यासीयोगारूढस्तदोच्यते। ४

कारणमुच्यतेनहिकर्मसुव्यापृतोऽसंचितःयोगमनुष्ठातुंक्षमः ३ ननुयोगपदेनमुख्ययावृत्त्यानिर्बीजःसमाधि
रुच्यतेतमारूढस्यकर्मणांत्यागः ननुसिद्धत्वाद्विषयइत्याशंक्यप्रकृतेयोगारूढपदस्यार्थमाह यदा
हीति इंद्रियार्थेषुशब्दादिषुरमणीयेषुकर्मसुचतत्प्राप्तिहेतुषुनमनसिजातेवैराग्यवशात्सक्तोनभवति
नापितत्साधनेभ्यपान् एतदर्थमहमिदंकर्मकुर्यामितिसंकल्पइतिधना दृशश्चसर्वसंकल्पसंन्यासी
तदाभवतितदायोगारूढइत्युच्यते यथातीव्रबुभुक्षयोपेतोऽन्यत्रनीरागोव्यासंगान्तरंसत्काभोजनारूढए
वभवति तथातीव्रारुरुक्षावान् सर्वत्रवीतरागस्त्यक्तसर्वकर्मायोगारूढएवभवतितावत्कर्माणिकर्त

[illegible]

उद्धरेदिति एवं क्रमेण कर्मद्वारा चित्तशुद्धिं संपाद्य योगारूढोऽभ्यासवैराग्यबलेन आत्मानं उद्धरेत् न हि यस्मात् आत्मैव
ह्यात्मनो बंधुः न पुत्रादयः उद्धर्तुं समर्थाः आत्मैव रिपुरात्मनः न त्वन्ये शत्रवः संसारमग्नापि तु मेनं तमाद इत्यर्थः आत्मा
मनः आत्मना मनसा अनात्मनः अजितचेतसः आत्मा मन एव शत्रुः ६ मनसो जये फलमाह जितात्मन इति
शीतोष्णादिषु प्राप्तेषु जितात्मनो निर्विकारचित्तस्य आत्मा चित्तं परं उत्कर्षेण समाहितः समाधिं प्राप्तो भवति
अतः समाधिसिद्ध्यर्थं मनो जेतव्यमेवेत्यर्थः ७ समाधिसिद्धेरपि किं फलमत आह ज्ञानेति ज्ञानं शास्त्रोप

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ५ बंधु
रात्मात्मनस्तस्य येनात्मैवात्मना जितः अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ६ जि
तात्मनः प्रशांतस्य परमात्मा समाहितः शीतोष्णसुखदुःखेषु तथा मानापमानयोः ७ ज्ञा
नविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ८
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ९

देशनाबुद्धिः विज्ञानं ध्यानाभ्यासार्थं ध्यानजन्यप्रमारूपोऽनुभवः ताभ्यां तृप्तः संजातालंप्रत्यय आत्मा चित्तं यस्य स ज्ञा
यतःत नविज्ञानतृप्तात्मा अत एव कूटस्थो निष्कंपः संसारतया नास्कंदितो भवतीति समाधिफलं अस्य लोकप्रसिद्ध
प्रामा२ लक्षणमाह जितेंद्रिय इति समलोष्टाश्मकांचन इति एवं विधो योगी स युक्तः प्राप्तयोग इत्युच्यते विद्वद्भिः ८
समत्वमेव स्तौति सुहृदिति सुहृत्स्वस्नेहं उपकारमनपेक्ष्य उपकर्ता मित्रं स्नेहवान् अरिः शत्रुः उदासीनः उभ
यत्रपक्षपातशून्यः मध्यस्थः उभयहितैषी द्वेष्य आत्मनोऽप्रियः बंधुः संबंधी तेषु पुण्यकृत्सु पापे
षु पापाचरणेषु केवलं चित्किं कर्मेत्यनालोचयन् तेषु सर्वेषु यः समबुद्धिः स विशिष्यते ९

योगीतियोगीयोगाभ्यासपरः रहसिएकांतेस्थितःसन्आत्मानंबुद्धिंयुंजीतसमादध्यात् सततमितिनैरंतर्यमुक्तं निराशीयोग
सिद्धेरन्यद्प्रार्थमानः नहेकेनिष्टइतिपावत्तेतेनसत्कारउक्तः एकाकीअसहायःसंन्यासीत्यर्थः यतोस्थिरीकृतौचित्तंआ
त्मासेंद्रियंशरीरंयेनयतचित्तात्मातथाअपरिग्रहः एकाकीत्वेपिकंथापुस्तकादिबहुपरिग्रहसून्यः १० योगंयुंजीते
त्युक्तंतत्रयमनियमादींतरंगान्यासनादीन्याहशुचौदेशेइत्यादिनाशुचौस्वभावतःसंस्कारतोवापुण्येदेशेस्था
नेप्रतिष्ठाप्यसुस्थितंकृत्वास्थिरंनिश्चलंआसनंकिंचित्तिमासनंस्थंडिलंनिश्चलमितितेनमृन्मयमेवस्थंडिलंनतुका

तं
योगीयुंजीतसततमात्मानंरसिस्थितः एकाकीयतचित्तात्मानिराशीरपरिग्रहः १० शुचौ
देशेप्रतिष्टाप्यस्थिरमासनमात्मनः नात्युछ्रितंनातिनीचंचैलाजिनकुशोत्तरं ११ त
त्रैकाग्रंमनःकृत्वायतचित्तेंद्रियक्रियः उपविश्यासनेयुंज्याद्योगमात्मविशुद्धये १२

ष्ठमयंपीठंआत्मनइतिपरासनव्यावृत्त्यर्थंनात्युछ्रितंनात्युच्चंनातिनीचंचैलातिनकुशाः उत्तरेउपर्युपरियस्यतच्चैला
जिनकुशोत्तरंअजिनादुपरिचैलंकुशेभ्यस्तूपरिअजिनंस्थंडिलेस्योपरिकुशाइत्यर्थः ११ प्रतिष्टाप्यकिंकुर्यादिति
तत्राहतत्रेतितत्रासनेउपस्तस्वास्तिकाद्यन्यतमेनासनेनोपविश्ययताः निगृहीताश्चित्तस्यक्रियाःविषयाणां
स्मरणानिइंद्रियक्रियास्तेषांग्रहणंयेनासौयतचित्तेंद्रियक्रियः अतएवबाह्याभ्यंतरविषयानुपरक्ततया
एकंध्येयमेवप्रत्यक्त्वेनअग्रेयस्यस्फुरतिनान्यत् तदेकाग्रंवृत्त्यंतरानंतरितवृत्त्येकाकारवृत्तिप्रवाहंकृत्वाआ
त्मविशुद्धयेचित्तस्यशुद्ध्यर्थंयोगंवृत्तिप्रवाहस्यापिनिरोधंयुंज्यात् अनुतिष्ठेत्चित्तस्यस्थैर्यतापादनेन १२

आसनउपविश्येयत्कुर्यात्तत्कथयन्नित्याह समम् इति कायः शरीरमध्यं शिरः ग्रीवा च कायशिरोग्रीवं समम् अचलं अधो
मेरुम् अवक्रं अचलं निष्कंपं धारयन् स्थिरो भूत्वा संप्रेक्ष्य नासिकाग्रं स्वमिति नासिकाग्रावलोकनं न विधीयते
किंतु निमीलने लयभयं उन्मीलने विक्षेपभयमतो दिशोपि स्त्र्यादिविक्षेपकविषयदर्शनमपादनवलोकयन्न
र्धोन्मीलितनेत्र आसीतेति उत्तरेणान्वयः १३ एवमासने उपविष्टेन यत्कर्त्तव्यं तदाह प्रशांतात्मेति योगयुतो
योगे ब्रह्मचारिव्रते ब्रह्मचर्यायां स्थितः संन्यासी त्यर्थः मच्चित्तो मयि परमे चित्तं यस्य स एवंभूतो मय्येव मनः
संयम्य मत्पर आसीत स प्रशांतात्मा भूत्वा विगतभीर्भवतीति योजना भवति हि कश्चिद् आत्मनो योनिमीश्वरं

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् १३
प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः मनः संयम्य मच्चित्तो युक्त आसीत मत्परः १४

मत्वात् चित्तस्थम् तमेवाराध्यत्वेनाभिगतः तत्रैव च मनसः संयमं करोति न तु स तत्परः स्तमेव परम पुरुषार्थतया प्राप्यत्वे
न मन्यते किंतु तस्मात् ईश्वरादन्यदेव फलं कामयते अयं तु मच्चित्तो मय्येव मनः संयम्य मत्परो मामेव सर्वोत्तरं प्राप्य
गन्तव्यं कामयत इति यतो मत्परो अत एव प्रशांतात्मा प्रकर्षेण बाह्याभ्यंतरविषयत्यागेन समाधिसुखास्वा
दत्यागेन शांत उपरत आत्मा चित्तं यस्य सो स्मिता मात्रोवशेषो विगतभीर्भवति इयमेवावस्या सत्वपुरुषान्य
ताख्यातिरिति ब्रह्मसाक्षात्कार इति च विकल्प्यते सर्वथा त्वस्यां सिद्धायां पुरुषः परमपुरुषार्थभाग्भ
वति १४

मा.भा.
भी.प.
४६

अस्याफलमाह युंजन्निति एवमनेनप्रकारेण सदा निरंतरं दीर्घकालं च आत्मानं मनो युंजन् समादधानो योगी नि
यतं खीति फलादपि निगृहीतं मानसं येन स नियतमानसः शांतिं परवैराग्यबलात् ख्यातिमपि निरुध्य निर्विकल्पं
परं निर्वाणं मोक्षस्तदेव परमा निष्ठा यस्याः शांतेः तां मत्संस्थामप्येवं संस्थारूपीभावेनावस्थानं समाप्तिर्वा य
स्यास्तां अधिगच्छति प्राप्नोति ख्यातिफलं च सूत्रकृता दर्शितं प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्म
मेघः समाधिरिति तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति सत्वपुरुषान्यताख्यातिमात्रात् सर्वज्ञातृत्वं सर्वभावा

युंजन्नेवं सदात्मानं योगी नियतमानसः शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति १५ ना
त्यश्नतस्तु योगोस्ति न चैकांतमनश्नतः न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन १६ यु
क्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगो भवति दुःखहा १७

धिष्ठातृत्वं चेति सूत्रद्वयेन प्रसंख्यानेध्यानेकुसीदस्य वणिज इव फलानिच्छोः सर्वथा विवेकख्यातिरेव भव
तितस्याश्च फलं धर्ममेघः समाधिस्स च प्रागेव व्याख्यातः तत्र वैराग्यं परं परसंज्ञं पुरुषख्यातेः फलं तस्य लक्ष
णं लब्धकेषु दिव्यादिव्यविषयेषु वैतृष्ण्यं तस्यैव हि नांतरीयकं फलं कैवल्यमिति योगाभ्युदं इति तत्ताः पर
कोऽलं फलं सार्वज्ञादिकं नु अस्मिन्नेव स्मृयते कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति सर्वस्य वशी सर्व
स्येशानः सर्वस्याधिपतिरित्यादिकं १५ एवं योगाभ्यासनिष्ठस्याहारादिनियममाह द्वाभ्यां नात्यश्नतस्तु
ति एकांतं अतिशयेन अप्रतिजाग्रत इत्यत्राप्यतिशब्दो योज्यः १६ युक्तापरिमिता आहारादयो यस्य स तथा १७ ४६

निर्वाणपरमां शांतिं प्राप्तस्य लक्षणं स्याह यदेत्यादिभिः षड्भिः विनियतं विशेषेण एकाग्रतामापन्नम् अपि नियतं निरुद्धं आत्मनि प्रत्य
गात्मन्येवावतिष्ठते न त्वस्मितादिरूपेण उद्रिच्यते परायोगी सर्वेभ्यः जाग्रत्स्वप्नसबीजसमाधिरूपस्थितेभ्यः तद्योपेयं चेमेस
र्वात्मप्राप्येव ताभ्यः प्राप्तेषु निःस्पृहो भवति तदा युक्तो निर्विकल्प इत्युच्यते १८ एकाग्रतावस्थायां योगिचित्तस्योपमामाह
यथेति निवाते न चलति तद्वत् पत्येव तच्चित्तं एकाग्रतां प्राप्तं चित्तं तस्य एकाग्रतां प्राप्तं चित्तं निवातप्रदीपवन्न चलतीत्यर्थः
आत्मनो योगं समाधिं युंजितानुतिष्ठतः १९ यत्रेति षड्भिः एकाग्रीभूतं चित्तं सत् योगसेवया निरुद्धं यत्र यस्यामवस्थायां उ

यदा विनियतं चित्तमात्मन्येवावतिष्ठते निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा १८ यथा दीपो नि
वातस्थो नेंगते सोपमा स्मृता योगिनो यतचित्तस्य युंजतो योगमात्मनः १९ यत्रोपरमते चित्तं निरु
द्धं योगसेवया यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति २० सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यम
तींद्रियं वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः २१

परमते विलीनं भवति यत्र वा आत्मना चित्तेन आत्मानं निर्विकल्पं पश्यन्नात्मनि तुष्यति न वाह्यैर्विषयैस्तुष्टिं भजते २० किंच सुखमि
ति आत्यंतिकं अनंतं यत्सुखं तत्केवलं बुद्धिग्राह्यं सौषुप्तसुखवत् यतोऽतींद्रियं इंद्रियागोचरं यत्र सुखे स्थितो यन्न वेत्ति वे
द्याभावात्तत्र किंचिदनुभवति नापि तत्त्वतश्चलति बुद्धितात्म्याध्यासकाले चलतीवेति भाति परं तु तत्त्वतो न चलति तथा
च श्रुतिः ध्यायतीव लेलायतीवेति वृद्धश्चाहुः युंजानः ध्यानादेरस्तात्त्विकं दर्शयति बुद्धौ ध्यायंत्यां ध्यायतीवेति लेलायंत्यां
लेलायतीवेति श्रुत्यर्थः तत्सुखं यत्रायं वेत्ति अनुभवतीति संबंधः यत्रेत्यादि भिन्नं वाक्यं २१

म.भा.
भी.प.
(४)

दुःखेन शस्त्रपातादिलक्षणेन गुरुणा महता तमिति यत्रोपरमते चित्तमित्यादिनोक्तलक्षणं तं दुःखसंयोगस्यापि ग्रंतः
करणसंबंधस्य वियोगमेव संतं विरुद्धलक्षणया योगसंज्ञितं विद्यात् योगफलमुपसंहृत्य पुनर्निश्चयानुसाधनत्वविधा
नपूर्वकं तमेवशानकृतो वृश्यंव दितयमितिन्यायेन विधत्ते स इत्यादिना स योगः निश्चयेन अध्यवसायेन अनिर्विण्णे
निर्वेदरहितं चेतो यस्य तेन योक्तव्योऽभ्यसनीयः यद्वा यांतोहानउपरतस्ति निद्रः समाहितभूत्वात्मन्येवात्मानं पश्ये
दिति श्रुतिविहितं स्कृतनरसंस्त्रद्वाविन्नपदोपेतं शमादिषट्कमत्वेक्रमतो विधीयते तत्र निश्चयेनेति गुरुवेदवाक्योदोप

यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततः यस्मिंस्थितोनदुःखेनगुरुणापिविचाल्यते २२ तंविद्यादुःखसं
योगवियोगंयोगसंज्ञितं सनिश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसा २३ संकल्पप्रभवान्कामांस्त्यक्त्वा
सर्वानशेषतः मनसैवेंद्रियग्रामंविनियम्यसमंततः २४

निश्चलक्षण श्रद्धा ३ १

लावरूपं भावैनिश्चयपदेन गृह्यते तथा [illegible] निर्विण्णचेतसेति वैराग्येण द्वंद्वसहिष्णुत्वलक्षणा तितिक्षा विधीयते इति निज्ञेयं
२३ अथ शमदमोपरमसमाधानानि क्रमेणश्लोकद्वयेन विधत्ते संकल्पेति संकल्पं इदं मे भूयादिति चेतोवृत्तिनत्र दि
उद्भवो येषां तान कामान् विषयान् अशेषतो कामनो छेदपूर्वकं संकल्पनिरोधेन त्यक्त्वा एतेनांतरिंद्रियनिग्रह
लक्षणः शम उक्तः बाह्येंद्रियनिग्रहलक्षणं दममाह मनसैवेति विषयदोषदर्शिना मनसैव समंततः
सर्वप्रकारेण श्रोत्रादिकमिंद्रियग्राममनतः सर्वेभ्यो विषयेभ्योऽपरमेदित्युत्तरेणान्वयः २४ ॥ शिव

(४)

शनैः शनैरिति भूमिकाजयक्रमेण दिव्यदिव्यविषयेभ्य उपरमेत् आवृत्तो भवेत् कया धृतिगृहीतया धैर्येण निश्चलया बुद्ध्या धारयते
मनःप्राणेन्द्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी मुक्तेर्हलणया धृत्या गृहीतया वशीकृतया उपरमेत
तया एवमुपरतं मनः आत्मनि स्वस्वरूपे संस्थाप्य न तु दृश्ये दृष्टरि वा ततश्चात्मैकाकारमेकाग्रमित्यर्थः दृष्टृदृश्यो
म परक्तं चित्तं सर्वार्थं वा ॥ थैकाग्रतयोः क्षयोदयौ चित्तस्यैकाग्रता परिणाम इति सूत्रितमेकाग्र्यं प्रापयेत् सूत्रार्थस्तु अह
मिदं पश्यामीत्यनुभवे हि द्रष्टा दृश्येन रंजितो भासते तेन च दर्शिनि भानमप्रत्याख्येयमतो द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थमि
ति तिनन्तु दर्शनोपरक्तताषि सर्वार्थतायां गलितानन्दभावो चित्तस्य नाशप्राप्तेः दृष्टृदृश्योपरागाभावेनैकाग्र्यं तदुच्यते

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् २५

यथा स्वप्ने तादिह दृश्यं नास्तीति यामरात्रमनुभवात् आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः इव भोक्तृत्वस्येन्द्रियसंनियोगशिष्टत्वा
वा त् किंतु द्रष्टृदृश्यवासनावासितं चित्रपटसदृशमेकं मनएवास्ति तच्च स्वयं ज्योतिषा पुरुषेण साम्यमापन्नं जाग्रदन्स्वप्नेपि द्रष्टृद
श्योपरागं प्रकाशयति तथा सनावासितत्वात् एवं सति यद्विसर्वार्थतायाः क्षयः एकार्थतायाउदयश्च तदाचित्तस्यैका
ग्रतारूपः परिणामो भवतीति तदेवमात्मसंस्थं मनः कृत्वेति संप्रज्ञातसमाधिरुक्तः तत्रापि पूर्वाभ्यासवशात् चि
त्तस्य दृष्टृदृश्योपरागो वासनामयो भातीति तन्निवारणेन असंप्रज्ञातसमाधिमाह न किंचिदपि चिंतयेदिति ध्या
तृध्यानध्येयविभागमपि न स्मरेत् किंतु अखंडैकरससंवि● दात्मनासुप्तवत्तिष्ठेदित्यर्थः २५ ॥ ॥

ध्यानेरित्येतत्व्याचष्टेयतोयतइतित्रिभिः यतोयतोहेतोर्यंयंविषयंप्रतितुंमनोनिश्चरतिबहिर्गच्छतिततस्ततः तत्र तत्रदोषदर्शनेनततस्ततोविषयात्एतन्मनोनियम्यप्रत्याहृत्यआत्मन्येवस्वरूपेएववशंनयेतस्थिरीकुर्व्याख्यातं २६ एव मात्मवशेमनसिकिंस्यादित्याशंक्याहप्रशांतेतिहियस्मात्एवंप्रशांतमनसमिमानसानांचविषयाणांत्यागात्प्रशांतरजसं प्रक्षीणमोहादिक्लेशंप्रकर्षेणउपरतचेतसंयोगिनंएकाग्रभूतंब्रह्मभूतंउत्तमंसुखंसंप्रज्ञातसमाधिफलभूतंउपैतिभौतिकानांबाह्यानांमनोरथिकानांचनाशेनशांतरजसंब्रह्मभूतंसद्वस्तुरूपंअकल्मषंधर्मवर्जितंयथोक्तंयोगभाष्येयत्त्वे

यतोयतोनिश्चरतिमनश्चंचलमस्थिरं ततस्ततोनियम्यैतदात्मन्येववशंनयेत् २६ प्रशांतम नसंह्येनंयोगिनंसुखमुत्तमं उपैतिशांतरजसंब्रह्मभूतमकल्मषं २७ युंजन्नेवंसदात्मानंयोगीवि गतकल्मषः सुखेनब्रह्मसंस्पर्शमत्यंतंसुखमश्नुते २८

काग्रेचेतसिसद्भूतमार्थंप्रद्योतयतिकर्म[illegible]बंधनानिश्लथयतिनिरोधमभिमुखीकरोतिइत्यस्येतिचत्क्लेशान्तसस्प्र ज्ञातोयोगइत्याख्यायतइतिएतेनात्मसंस्थंमनःकृत्वेतिव्याख्यातं २७ अस्यफलमाहयुंजन्निति एवमनेनप्रकारे एयोगीआत्मानमनोयुंजन्समादधानः विगतकल्मषोनिरस्ताविद्यादिक्लेशः सुखेनअनायासेनब्रह्मसंस्पर्शं निर्विशेषब्रह्मणाएकत्वंत्रिविधोपाधिप्रविलयात्अश्नुतेप्राप्नोतिकीदृशंब्रह्मसंस्पर्शं अत्यंतंदेशकालवस्तुभा वेनपरिच्छेदः तमतिक्रांतंनिर्विशेषंसुखंपरमानंदैकरसंएतेनकिंचिदपिचिंतयेदितिचतुर्थपादो व्याख्यातः २८

द्विविधस्यापियोगस्यफलमाह सर्वेतिसोपाधिर्निरूपाधिश्चद्वेधाब्रह्मविदुच्यते सोपाधिः स्यात्सर्वात्मानिरूपाख्योनु
मात्रिक इतिवार्तिकोक्तरीत्यासंप्रज्ञाते आत्मनः सर्वात्म्यमनुभवन्योगी सर्वभूतेषु उपादानतयास्थितं आत्मानं ई
क्षतेपश्यति तथा असंप्रज्ञाते सर्वाणिभूतानिब्रह्मादिस्तंबपर्यंतानि आत्मन्येकतांगतानिस्वाप्निवाध्यस्तसर्पदंडधा
रादीनितेक्षतेपश्यतियोगयुक्तात्मायोगेनसमाहितेचित्तः अस्यव्युत्थानावस्थामाह सर्वत्रेति सर्वेषुब्रह्मादिस्थाव
रांतेषुविषमेषुभूतेषुसमंनिर्विशेषंब्रह्मात्मैकत्वविषयंदर्शनं यस्यससर्वत्रसमदर्शनः तथाचश्रुतयः य
स स्तुसर्वाणिभूतान्यात्मन्येवानुपश्यति सर्वभूतेषुचात्मानं ततोनविजुगुप्सते सर्वस्यात्माभवति ब्रह्मपसाब्रह्मैमेत

सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि ईक्षतेयोगयुक्तात्मासर्वत्रसमदर्शनः २९

वा अत्र इदं सर्वं यदयमात्मेत्याद्युक्तमर्थंप्रतिपादयंति यतु योयोगयुक्तात्मायोवासर्वत्रसमदर्शनः सआत्मानमी
क्षतइति योगीसमदर्शिनावात्मेक्षणाधिकारिणमुक्तोयथाहि चित्तवृत्तिनिरोधः साक्षिसाक्षात्कारहेतुः तथा
जडविवेकेनसर्वानुस्यूतचैतन्यपृथक्करणमपिनोवश्यंयोगएवापेक्षितइतितत्रसमाहितोभूत्वात्मन्येवात्मा
नंपश्यति ततःस्तुतंपश्यतिनिष्कलंध्यायमानः इत्यादिश्रुतिभिः समाधिध्यानापरपर्याययोगस्येवात्मदर्शनहेतु
त्वप्रतिपादनात् तत्कारणंसांख्ययोगाभिपन्नंविद्यामेतांयोगविधिंचकृत्स्नमितितिलिंगाच्चज्ञानयोगयोः समुच्चया

वगमात् तत्त्वश्रोतव्योक्तिकविवेकमात्रानुजडाजडयोर्देहात्मनोः पृथक्करणं भवति सोपाधिकस्य धर्मस्य उपाधिनि
वृत्तिमंतरेण निवृत्त्यसंभावात् आदर्शादिनिवृत्तावपि प्रतिबिंबादिभ्रमनिवृत्तिरीर्यते अत एवाधिष्ठानज्ञानस्य सद्भेस
नितत्रकल्पितस्याचिन्नस्य दृश्यस्य बाधदर्शनम् अनायासेनैवोपपद्यत इति निरस्तं योगं विनाधिष्ठानज्ञानस्यैवासंभ
वात् परा हृदुर्दैवः स्वसंवेद्यं हि तद्ब्रह्मविद्या कुमारी स्त्रीसुखं यथा अयोगी नैव जानाति जात्यंधो हि
यथा घटमिति यथा उक्तं भगवत्सूत्रपादैर्ब्रह्मविद्याः कुत्रापि योगोपेतान्न मुसादयाव
भूवुरिति तदयातो ब्रह्मजिज्ञासेत्यत्राथशब्दसूचितमुमुक्षुविशेषणीभूत
साधनचतुष्टयांतर्गतं समादुपेयं समाधिमदृष्टवोक्तमिति तिनदो
षः द्वेक्रमाविति विशिष्टवाक्यतत्पार्यतु परस्परनिपे
क्षमार्गद्वयोपगमे नान्यः पंथा इति श्रुति
वादापस्याप्रतिपत्तिक्रमभेदमात्रपरतं
याप्रागेव वर्णितमिति दिक् किंच योगप्रकर
णे योगानपेक्षमार्गांतरप्रतिपादनमसं
गतं न चैतस्य क्वचित्कश्चि●●वर्तते
संभवति वा उक्तयुक्तेरतेरतो योवासम
दर्शिन इति वापद्धयाहारोप्यसंगत इ
ति दिक् २५

अस्यात्मैकत्वदर्शिनस्यापि फलमाह योमामिति सर्वत्रास्मच्छब्दः प्रत्यगात्मपरः योयोगी आत्मानं सर्वत्रपरिपश्यति स
र्वं चात्मनि पश्यति तस्य योगिनः ज्ञानेनात्मानं प्रणश्यति अदर्शनं न गच्छति ज्ञानेनात्मान पुनस्तिरोभवति सक
न्निष्टस्य मूलाज्ञानस्य बीजाभावेन पुनरुदयासंभवादित्यर्थः ननु करणसंघाताभिमानिता शुक्तिरूप्यवद्ब्रह्म
ण्यध्यस्तेन तदभिमानत्यागपूर्वकं ज्ञानसाधनेन भूतब्रह्मणा तिरोधापि बुद्धेस्तत्त्वपक्षेपातित्वात् ब्रह्मदृष्टा तु
मुक्तजीवस्य निरत्ययोछेदो भवतीत्याशंक्याह स च मे न प्रणश्यतीति स च विद्वान् मे मम न प्रणश्यति न तिरोभवति मदभिन्न
त्वान्न भवेदेतदेवं यदि जीवो मत्पिण्ड्य घसंरावा मम विकारो भवेत् तदा निरन्वयोछेदं प्राप्नुयात् अहमेव तु सः तत्त्वमस्यादिव

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ३० सर्वभूत
स्थितं यो मां भजत्येकत्वमास्थितः सर्वथा वर्तमानोपि स योगी मयि वर्तते ३१

क्यात्स्मिस्वरूपमात्मा ब्रह्मेत्यादिशास्त्रात् तस्माद्युक्तं मुक्तः स च मे न प्रणश्यति यस्मात्सर्वात्मैकत्वदर्शी अहमेव अतो नास्य मो
क्षः प्रतिबध्यत इत्याह ३ः सर्वभूतेति सर्वोपादानतया सर्वभूतेषु सत्तारूपेण स्फुरणरूपेण च स्थितं मां परमात्मानं ए
कत्वं जीवब्रह्मणोरेकत्वमास्थितः सन् भजति निर्विकल्पेन समाधिना सेवते स योगी व्युत्थानदशायां प्रारब्धकर्मवशात् बाधि
तानुवृत्त्या देहमारूढः सर्वथा सर्वप्रकारेण यज्ञवल्क्यादिवत्कर्मत्यागेन वा वशिष्ठजनकादिवद्विहितकर्मणा वा दत्तात्रे
यादिवन्निषिद्धकर्मणा वा वर्तमानोपि व्यवहरन्नपि मय्येव वर्तते मत्तः प्रच्युतो न भवति यतो देवोप्यापि नास्य भयमिति श्रूय
ते न स्य हन्त देवाश्च नाभूत्या ईशत आत्मा ह्येषां स भवतीति हन्तेत्यव्ययमेषार्थे देवा अपि तस्य ब्रह्मविदः अभूत्यै अनै
श्वर्याय न ईशते न समर्थ भवति यतोयमेषामात्मेति श्रुत्यर्थः सन पुनः संसारी पूर्ववद्भवतीत्यर्थः ३१ ॥ ॥

म·भा·
गी·टी·
·५०

यद्यपि निषिद्धकर्मणापि आत्मवित्न बध्यते तथापि शीलवानेव योगिश्रेष्ठ इत्याह आत्मौपम्येनेति यथा मम स्वस्य सुखमिष्टं त
द्वत्परस्यापीति बुद्ध्या योन्यस्मै अपि दुःखं न प्रयच्छति असावहिंसकः परमो योगी मत इत्यर्थः सम्ययोगमशक्यं मत्वा तदुपा
यं तरबुभुत्सयार्जुन उवाच योयमिति योयं योगस्त्वया साम्येन प्रोक्तो हिंसाप्राधान्येन संन्यासपूर्वकत्वेन या वर्णित हे मधु
सूदन तस्य योगस्य सर्ववृत्तिनिरोधरूपस्य स्थितिं न पश्यामि मनसश्चंचलत्वादिति शेषः ३३ एतदेवोपपादयति चंचलं हीति प्रमाथि
बहुदस्सु वदेकस्य प्रमथनशीलं ३४ मनसो दुर्ग्रहत्वमभ्युपेति श्रीभगवानुवाच यद्यप्येवं तथापि अभ्यासवैराग्यसमुच्चयाभ्यां दु

आत्मौपम्येन सर्वत्र समं पश्यति योर्जुन सुखं वा यदि वा दुःखं स योगी परमो मतः ३२ अर्जुन उवाच यो
योयं योगस्त्वया प्रोक्तो साम्येन मधुसूदन एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिरां ३३ चंचलं हि मनः
कृष्ण प्रमाथि बलवद्दृढं तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं ३४ श्रीभगवानुवाच असंशयं महाबा
हो मनो दुर्निग्रहं चलं अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ३५ असंयतात्मनो योगो दुःप्राप इति मे
मतिः वश्यात्मना तु यतता शक्योवाप्तुमुपायः ३६

ग्रहमपि मनो निगृह्यते तत्र अभ्यासो नाम आयुं कस्यांचित्तभूमौ समानप्रत्ययावृत्तिः वैराग्यं तु दृष्टादृष्टेषु भोगेषु तत्साधनेषु दो
षदर्शनेन वैतृष्ण्यं तत्र यथा कैदारिकः केदारेषु कुल्यात्कुल्यं संचारयन् एकस्य द्वारं पिधाय परस्योद्घाटयति तद्वत् वैरा
ग्येण विषयस्रोतः खिलीक्रियते अभ्यासेन कल्याणस्रोत उद्घाट्यत इति द्वयोरपि आवश्यकत्वं तथा च सूत्रं अभ्यास
वैराग्याभ्यां तन्निरोध इति ३५ असंयतात्मना अजितचित्तेन वश्यात्मना जितचित्तेन उपायतो अभ्यासवैराग्यरूपा ३६
॥श्रीरामचंद्र की जै॥

शि·व·
५०

श्री

मनसोदुर्निग्रहत्वाद्योगासिद्धेर्विगुणपश्यन्नर्जुनउवाचहेकृष्णयोगात्कर्मयोगाच्चलितमानसस्सन्कर्मसंन्यासीसर्वथः श्रद्धयोपेतो
योगमार्गप्रविष्टोपिश्रद्धयापतिः अप्रयुषोल्पत्वाद्वावैराग्यदोर्वल्याद्वाअल्पप्रयत्नः अलब्धवल्लप्रवागस्मरिति वद्कल्पार्थेनन्नसकृदा
चितत्योगसंसिद्धिंयोगफलंसम्यग्दर्शनंमोक्षमप्राप्यतश्चेत्कांगतिंगच्छति ३७ कच्चिदितिकच्चिन्नोभयविभ्रष्टः कर्ममार्गाच्चयोग
मार्गाच्चविभ्रष्टः छिन्नाभ्रमिवपूर्वस्मिन्परंवाभ्रेद्युसंगमप्राप्यमध्येएवनश्यातितद्वत् अप्रतिष्ठोनिराश्रयः हेमहावाहोवि
मूढोब्रह्मणःपथिब्रह्मप्राप्तिमार्गे ३८ एतन्मेसंशयमित्यस्यार्थोत्तरंश्रीभगवानुवाचपार्थेतिहेपार्थतेतिवासल्यासंबो

अर्जुनउवाच अयतिःश्रद्धयोपेतोयोगाच्चलितमानसः अप्राप्ययोगसंसिद्धिंकांगतिंकृष्णगच्छति ३७ क
च्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिवनश्यति अप्रतिष्ठोमहावाहोविमूढोब्रह्मणःपथिः ३८ एतन्मेसंशयंकृ
ष्णछेत्तुमर्हस्यशेषतः त्वदन्यःसंशयस्यास्यछेत्तानह्युपपद्यते ३९ श्रीभगवानुवाच पार्थनैवे
हनामुत्रविनाशस्तस्यविद्यते नहिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छति ४० प्राप्यपुण्यकृतांलोकानु
षित्वाशाश्वतीःसमाः शुचीनांश्रीमतांगेहेयोगभ्रष्टोभिजायते ४१

धयपतितस्यइहविनाशोनैवयोगान्निष्प्राप्तिः अमुत्रविनाशोनरकप्राप्तिःस्ततउभयमपिनजायतेहियतःकल्याणकृत्शुभ
कृत्दुर्गतिंनैवप्राप्नोति ४० इहामुत्रवातस्यमहत्वमेवास्तीत्याहप्राप्येतिउषित्वावासंकृत्वाशाश्वतीः समाः नित्यानवत्स
रान्योगभ्रष्टोरागीचेत् अल्पकालाभ्यस्तयोगश्चेत्श्रीमतांगेहेजायतेतत्रापिश्रीमद्वतीत्याशावकस्मशुचीनामितिशुक्लं
शुचयोहिसत्कार्यश्चेवश्रियंजानापर्वेष्णद्वयामकृतरस्थानमासादयतीसर्वथः ४१

सयोगीविरक्तश्चिराभ्यस्तयोगश्चेत्तस्यगतिमाह अथवेति ४२ तत्रद्विविधेपिजन्मनिपूर्वदेहप्राप्तंवुद्धिसंयोगंयावतायोगभू
मिपर्यंतंजन्मनिजितातत्रचयावान्वुद्धिलाभोजातस्तावंतंवुद्धिसंयोगंपूर्वाभ्यासादल्पेनैवाभ्यासेनलभतेततः तस्मादपिभूय
स्तोवोहसंसिद्धोऊर्ध्वभूमिलाभार्थमित्यर्थः यततेयत्नंकरोति ४३ कुतोयततेशीघ्रितोयाशयतआहपूर्वेतिअवशो
पिप्रहादादिवत्पित्रादिभिरन्यथानीयमानोपितेनैवपूर्वाभ्यासेनवलवताह्रियते योगप्रवणःक्रियतेयतःयोग
स्यजिज्ञासुः ज्ञानमात्रमिच्छन्नपःभवतिशोपिशब्दब्रह्मकर्मकांडंवेदमपिअतिक्रम्यवर्तते किंपुनः । पित्राद्या

अथवायोगिनामेवकुलेभवतिधीमतां एतद्धिदुर्लभतरंलोकेजन्मयदीदृशं ४२ तत्रतंवुद्धि
संयोगंलभतेपौर्वदेहिकं यततेचततोभूयः संसिद्धौकुरुनंदन ४३ पूर्वाभ्यासेनतेनैव
ह्रियतेह्यवशोपिसः जिज्ञासुरपियोगस्यशब्दब्रह्मातिवर्तते ४४ प्रयत्नाद्यतमानस्तु
योगीसंशुद्धकिल्विषाः अनेकजन्मसंसिद्धस्ततोयातिपरांगतिं ४५ ॥ ॥

ज्ञाऽऽच्छतेः पूर्वाभ्यासवलंजन्महांतमपिपित्रादियत्नंव्यथाकरोतीत्यर्थः ४४ एवंयोगभ्रष्टगतिमुक्त्वायोविषयेंद्रि
यप्राणेणापियत्नेनयोगमेवाभ्यस्तितप्रवर्ततेतस्यगतिमाह प्रयत्नादितिप्रयत्नातप्रकृष्टातहठात्वायुनिरो
धादिरूपातत्तेचपीडितद्राविशेषाभ्यासात्तुयोयतमानः संशुद्धिकल्पितयोगात्तनिःपापोभवतिपरहृदमम
वरः प्राणायामेर्दहहेदेनइतिहठयोगानांसर्वेषांपापनिरस्तुपयोगित्वंनतत्वसाक्षात्कारेसाक्षात्साधनत्वमित्यर्थः अ
तएवसः अनेकैर्जन्मभिःसंसिद्धिः प्राप्तयोगाभ्यासात्ततः परांगतिंमोक्षंयातिएतेनचदृष्टांतरेभ्युवोरितिपंचमो

एवं योगिनं स्तौति तपस्विभ्य इति तपस्विनो नः कृच्छ्रचान्द्रायणमासोपवासादिकर्तारः ज्ञानिनः शास्त्रीयपाण्डित्यवन्तः
तपस्विनो ऽग्निहोत्राद्यनुष्ठातारः तेभ्यः सर्वेभ्यो योगी यतो ऽधिकस्तस्माद्योगी भवार्जुन ४६ समानाः कर्मप्रधानस्त्वंपदार्थ
विवेकः अतः परं उपासनाप्राधान्येन तत्पदार्थं निरूपयितुकामस्तदुपासनं महाफलत्वेन स्तौति योगिनामितिदेव

तपस्विभ्यो ऽधिको योगी ज्ञानिभ्यो ऽपि मतो ऽधिकः कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ४६
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ४७ इति श्रीभग
वद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ऽआत्मसंयमयोगो नाम ष
ष्ठो ऽध्यायः ६

मेवापरे यज्ञमित्यादिना पञ्चमाध्याये प्रोक्ताः द्वादश यज्ञास्तद्वन्तो योगिनां सर्वेषां मध्ये यो महत्तेन मयि वासुदे
वे समर्पितेन अन्तरात्मना चित्तेन श्रद्धावान्सन्मां भजते स मे मम युक्ततमो ऽतिशयेन युक्तः श्लाघ्यो मतो ऽभि
प्रेतस्तस्मात्मद्भक्तो भवेति भावः ४७ ॥ ॥ इति श्रीमहाभारते भावदीपे भीष्मपर्वणि भगवद्गीतासु नाम ष
ष्ठो ऽध्यायः ६

पूर्वाध्याये ते यो मां भजते स मे युक्ततमो मतः इत्युक्तं तत्र कीदृशो पूर्वोक्त निष्काम कर्मयोगापेक्षया विलक्षणं तव भजनं येन
योग[illegible] पूर्वमपेक्षया तस्य युक्ततमत्वमित्येतामर्जुनस्याशंकां स्वयमेव परिहरन् श्रीभगवानुवाच मय्यीति कश्चिद्द्वाज्ञास्त्र यो
धनमानासक्तमनो भवति अयं तु मामेव परमपुरुषार्थभूतं प्राप्तुमिच्छन्नित्यर्थः इदं रूपो योगं युंजन समाधिमनुतिष्ठन्
तत्त्वं पदार्थाविवेककाले यथापि सार्वज्ञमस्ति सर्वज्ञः तस्य मात्मानं निष्पादि वचोनात्तथा विश्वस्मादन्य ईश्वरोऽस्ति न
वेति पातंजलि कापिलयोर्विवादस्तार्किक मीमांसकयोर्वा सेश्वर निरीश्वरयोर्मतभेदात संशयः कारणज्ञानाच्च
समग्रं तत्सार्वज्ञमिति मत्वा असंशयं समग्रमिति मां तत्पदार्थमतीश्वरं यथा ज्ञास्यसि तेत्प्रकारं शृणु अत्र वदस

श्रीभगवानुवाच मय्यासक्तमनः पार्थ योगं युंजन्मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि
तच्छृणु १ ज्ञानं तेहं सविज्ञानमिदं वक्ष्याम्यशेषतः यज्ज्ञात्वा नेह भूयोन्यज्ज्ञातव्यमवशिष्यते २
मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ३

माश्रुत्य सर्वं ब्रह्म वासुदेवात्मकमिति भजने वैलक्षण्यं कारणं ज्ञानं च मस्य योगिनः पूर्वयोगापेक्षया धिगममिति भावः १
तदेवाह ज्ञानमिति ज्ञानं शुद्ध प्रज्ञानं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्मेति श्रुतेस्तुभ्यमहं वक्ष्यामि अशेषतः साध
नकलापसहितं दशमस्त्वमसीत्यादेः शब्दादपरोक्षज्ञानेन शब्दस्य स्वविषये परोक्षज्ञानजनकत्वनियमादित्याशं
क्याह सविज्ञानं अनुभवसहितं दशमस्त्वमसीत्यादेः शब्दादपरोक्षज्ञानोत्पत्तिदर्शनात्तां कस्मिंस्तु भगवर्त्म विज्ञाते स
र्वमिदं विज्ञातमिति एकविज्ञानात्सर्वविज्ञानप्रतिज्ञोपश्रुतिमेव दर्शयति यदिति ज्ञात्वेति यगत्कारणाधिष्ठानस्य ब्रह्म
स्वरूपस्य ब्रह्मणो ज्ञाने संशयोच्छेदात् सर्वस्यात्ममात्रत्वेन ज्ञातव्यानवशेषो मुक्तो इत्यर्थः एतदेव ज्ञानदौर्लभ्य

[illegible]

त्वमेकविज्ञानात्सर्वविज्ञानंप्रतिज्ञायतउपपत्तेर्थः सर्वस्यजडाजडप्रपंचस्यत्तानात्मकब्रह्मभावत्वमाहत्रिभिः भूमिरितिअप्र
भूम्यादिपदैस्तत्कारणान्येवगृह्यंतेप्रकृतिरित्यधिकारात्तस्यतंभूम्यादेस्त्वविकृतिमात्रत्वात् तथाचभूमिरितिगंधतन्मा
त्रंवायुरितिस्पर्शतन्मात्रंखमितिशब्दतन्मात्रंमनइतितत्कारणमहंकारः बुद्धिरितिसमष्टिबुद्धिर्महतत्वंअहंकारइत्य
नयेत्यहंकारोमूलप्रकृतिः करणेघजोदुर्लभत्वेपागत्याबाहुलकात्तत्तद्वोध्यंइयंमेममतः अभिन्नाप्रथक्सुस्थास्तुलि
ङ्गलनोद्दिवरजतंअष्टधाअ[blot]ष्टप्रकाराप्रकृतिः जडप्रपंचोपादानभूतायद्वानात्रोलोमहदहंकारपंचतन्मात्राण्येवा
ष्टौसांख्यानिमताएवप्रकृतयोग्राह्याइतिनियमोक्तिमननसा[blot]ह्यवपश्यतिमनसाश्रृणोतीतिमनसइंद्रियात्तरप्रक

भूमिरापोनलोवायुःखंमनोबुद्धिरेवच अहंकारइतीयंमेभिन्नाप्रकृतिरष्टधा ४ अपरेय
मितस्त्वन्यांप्रकृतिंविद्धिमेपरां जीवभूतांमहाबाहो ययेदंधार्यतेजगत् ५

तित्वस्मृवणेननवाप्तिप्रकृतयः तथाचैवंयोजनंइयंमेमदभिन्नाप्रकृतिरव्याकृताख्याभूम्यादिभेदेनाष्टधाइतिमूलप्रकृतेरव
भूम्यादिभिःसहपाठाजन्यत्वेमवगम्यतेनसांख्यानामिवाजन्यत्वेतस्मादव्याकृतमुत्पन्नंहिगुणोहिजसत्तमेतिअव्यक्तपु
रुषंब्रह्मनिष्कलेसंप्रलीयतइतिचतस्याःश्रुतिप्रभवप्रलयपपो ४ एवंतेनात्मिकाप्रकृतिमुक्त्वाचेतनात्मिकांतामाहअपरे
यमितिइयंप्रागुक्तासाअपराअश्रेष्ठाजडत्वात् इतस्तुविलक्षणामन्यांपरांचेतनत्वेनमदनन्यत्वात् उत्कृष्टांमेमत्स
बंधिनींप्रकृतिंजीवभूतांप्राणधारणनिमित्तभूतांक्षेत्रज्ञरूपांविद्धिजानीहि हेमहाबाहो ययाप्रकृत्याअसं
तःप्रतिष्ठयाइदंजगत्स्थावरजंगमशरीरात्मकंधार्यते ५

भ.गी.
टी.
५

एतदितिएतेपरापरेद्वेक्षेत्रक्षेत्रज्ञरूपेप्रकृतीयोनिः उत्पत्तिलयस्थानंयेषांभूतानांतानिएतद्योनीनिचतुर्विधा
नित्येतदुपधारयसम्यग्जानीहि किंघटगतंजलमिवएतेप्रकृतीईश्वरादन्येइत्याशंक्याहाहमितिकृत्स्नस्यस्व
स्वप्रकृतिसहितस्यजगतोजडाजडरूपस्यभगवतः प्रभवत्यस्मादितिप्रभवःउत्पत्तिकारणंतथाप्रलीयतेस्मि
न्नितिप्रलयः प्रलयस्थानंचअतस्तेउभेअपिप्रकृतीमत्तोनातिरिच्येते ६ एवमेवविज्ञानात्सर्वविज्ञानंप्रकृ
तिःपरात्मनोजगदुपादानत्वेनोपपाद्यएवात्मनोनिर्विकारत्वहानिंप्राप्याहमत्तइतिकारणान्तरादेः परंपृथक्

एतद्योनीनिभूतानिसर्वाणीत्युपधारय अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथा ६
मत्तःपरतरंनान्यत्किंचिदस्तिधनंजय मयिसर्वमिदंप्रोतंसूत्रेमणिगणाइव ७ ॥

भूतंघटादिव्यवहारोनतयोर्भेदाभावात्परतरंतुगवाश्वादिभिरनुपादानकत्वात्एवंब्रह्मणः परतरंतदनुपादानकं
किंचिदपिनास्तिहेधनंजयएवंप्रपंचस्यब्रह्माव्यतिरेकंप्रदर्श्यब्रह्मणःप्रपंचव्यतिरेकंसदृष्टान्तमाहमयीति
मयिसद्रूपेणस्फुरणरूपेणचसूत्रवत्सर्वत्रानुस्यूतेयदिदंसर्वंमणिगणवत्परस्परव्यावृत्तंतत्प्रोतंते
नव्यावृत्तेभ्योनुवृत्तंभिन्नमितिन्यायेनप्रपंचातीतोहमतोनममविकारित्वमित्यर्थः ७

द्वि द
५३

तत्त्वेवं प्रपंचपरमात्मनोर्मणिसूत्रवदुपादानोपादेयभावो पि न स्यात् न हि उपादानं च अनुवृत्तं चेति घटते मृद्घटयोरिव दर्श नादित्याशंक्य स्वप्नमायेंद्रजालादि जगत् तुल्यत्वं प्रपंचस्योपाध्याभावमप्यविरुद्धमित्युपदिष्टं वेदयद्भिर्गुरुभिर्विद्यातीति मत्वा दृष्टांतांतरेणैवानुवृत्तिं व्याख्यातुं श्रीभगवान् उपोद्घातयति रस इति रसाद्यधारसो प्सु पर्णानि सत्तानि रत्नैवमोकारस्य सर्व वाक्सत्त्वसारस्येति बाह्यवृत्तेः प्रणवानुसृतिश्रवणात् सत्तया निसंगृष्टितानि एवमाकाशस्य शब्दः सारभूतस्तस्मि न्नपि खं प्रोतम् एवं पुरुषसारं पौरुषं शौर्यधैर्यादिरूपं तत्र पुरुषाः प्रोताः एवमग्रे पि द्रष्टव्यं पुण्य इति रसादिष्वपि द्रष्टव्यं श्र

रसोहमप्सुकौंतेयप्रभास्मिशशिसूर्ययोः प्रणवः सर्ववेदेषु शब्दः खेपौरुषंनृषु ८ पुण्योगंधः
पृथिव्यांचतेजश्चास्मिविभावसौ जीवनंसर्वभूतेषु तपश्चास्मितपस्विषु ९ बीजंमांसर्व
भूतानांविद्धिपार्थसनातनं बुद्धिर्बुद्धिमतामस्मितेजस्तेजस्विनामहं १० बलंबलवतांचा
हंकामरागविवर्जितां धर्माविरुद्धोभूतेषुकामोस्मिभरतर्षभ ११

पुण्यस्य सर्वस्याविद्यामात्रविलसितत्वात् विभावसौ वह्नौ तेजः दहनशक्तिर्जीवं यनेनेति जीवनमन्नं विराज्यं तत्र हि सर्वाणि भूतानि प्रोतानि अन्येतु जीवनं आयुरिति व्याचक्षते तपश्चेति तपो धर्मः तद्भूतेमपि तपस्विनः प्रोताः ९ बीजं कारणं सर्वभूतानां पिंडब्रह्मांडात्मकानां बीजेमपि पिंडादिकं प्रोतं कनके कुंडलादिवत् सनातनं नित्यं बीजांतरादनु त्पन्नं बुद्धिरूपेमपि बुद्धिमंतः प्रोताः तेजः प्रागल्भ्यं तद्रूपेमपि प्रागल्भाः प्रोताः १० बलरूपेमपि बलवंतः प्रोता कामरागविवर्जितं कामस्तृष्णा रागः रंजना तो द्वावपि विषयको अप्राप्तेषु निर्विषयस्य बलस्य वर्जितं एवं धर्माविरुद्धे कामरूपे

सात्विकाः ज्ञानधर्मवैराग्यैश्वर्यादयः राजस्या लोभप्रवृत्त्यादयः तामसा निद्रालस्यादयः तान्सर्वान्मत्त एव रसतन्मा
त्रादिरूपात्स्वात्मनो निर्गतान् इति विद्धि तन्त्वेवं सर्वजगदात्मनो वैरित्वापत्त्या कूटस्थहानिरित्याशंक्याह न त्वहं तेषु
ते मयीति येष्वादयः श्रोतास्तेषु स्वत्रावयवभूतेषु रसादिषु अनृतजडरूपेषु अबाधितात्मचिन्मात्रस्वरूपो घटशरा
वोदंचनादिविवमृत्तो नास्ति अमृतस्यास्य सत्तास्फुरणे एव स्वकीये प्रयच्छामि न तु मत्तात्मा भवामीत्यर्थः ते तु मय्येवा
धस्तामदनन्याऽध्यारज्वामध्वस्ताः सर्पादयो रज्ज्वनन्याः तदनन्यत्वमारंभणशब्दादिभ्य इति न्यायात् अनन्यत्वं व्यति
रेकेणाभावः न खलु नन्यत्वमिति भेदं ब्रूमः किंतु भेदं वारयामः कुतः आरम्भणशब्दात् वाचारंभणं विकारो नाम
धेयमिति विकारस्य वागालंबनत्वेन स्वप्नमायेंद्रजालिकविषयसाम्यश्रुतेः नहि आत्मनो विचित्रप्रपंचात्मत्वेत

प ये चैव सात्विका भावा राजसास्तामसाश्च ये मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि १२ त्रि
भिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् मोहितं नाभिजानाति मामेभ्यः परमव्ययं १३

नयात्यंशविरोधेऽपि न त्वहं ते स्वित्यंशे विरोधपरिहारो युज्यते कार्यस्य कारणात्मकत्वावश्यंभावात् तस्माद्विवर्त्तवा
दाश्रयणेनैव ब्रह्मणो जगदुपादानत्वं कूटस्थत्वे निर्वहतीति इति साधूक्तं न त्वहं तेष्वते मयीति १२ कथं तर्हि स्थूलसूक्ष्म
प्रपंचबाधेन जनाः आत्मानं नागच्छंतीत्याशंक्याह त्रिभिरिति एभिः पूर्वोक्तैस्त्रिभिस्त्रिविधैर्भावैः प्रकारैश्च वृत्तिभिर्नि
म यमादिगुणमयैः सत्वरजस्तमोगुणविकारैः इदं सर्वं प्राणिजातं जगच्छब्दवाच्यं मोहितं सत् एभ्यो गुणेभ्यः
परमात्मानं न जानाति यथा रज्ज्वां सर्पधर्मेण व्याकुलः सर्पात्परां रज्जुं न जानाति तद्वत्परत्वे हेतुः अव्ययं ए
तेभावापरिणामित्वात् व्ययवंतः अहं तु तद्विपरीतः साक्षीत्यन्वयः १३

हस्याजीवरूपेणलीलयाक्रीडतोममसंबंधिनीयंदैवीहिप्रसिद्धापिंडब्रह्मांडरूपेणविततायाममचिन्मात्रस्यमामहंनजानामीति
साक्षीप्रत्यक्षेणापलापानर्हाअनंतस्यप्रपंचस्येंद्रजालादेरिवप्रकाशकागुणमयीसत्वरजस्तमोगुणमयीदुरत्ययादुर
तिक्रमायेमामेवसर्वभूतेस्यंभगवंतंवासुदेवंप्रपद्यंतेविषयीकुर्वंति तएवैतांमायांतरंति अधिष्ठानज्ञानेनैवसमूलस्य
भ्रमस्योच्छेदोभवतिनतुज्ञानांतरेणवाधृतिर्निरोधेनवेत्यर्थः अयमर्थोजीवेश्वरविभागमंतरेणशुद्धचिन्मात्रेकल्पितामाया
दर्पणः चिन्मात्रतिविंबरूपंजीवशोकृतविंबचैतन्यमनुरुध्यप्रचलति अयस्कांतमनुरुध्येवलोहशलाकाइदमेवईश्वराधीन

दैवीह्येषागुणमयीममामायादुरत्यया
मामेवयेप्रपद्यंतेमायामेतांतरंतिते १४

त्वंमायाज्ञानद्वारासर्वस्रष्टृत्वमपितथाचश्रुतिः अस्मान्मायीसृजतेविश्वमेतत्तस्मिंश्चान्योमाययासंनिरुद्धइतितथा
चैकैवमायाजीवेश्वरयोरुपाधिर्दर्पणइवविंबप्रतिविंबयोः विंबप्रतिविंबभावनाक्रांतमुभयोरनुस्यूतंशुद्धचिन्मात्रमनंतंतत्
तीयंमुक्तप्राप्यंजीवेश्वरोचउपाधिद्वारणयोः अल्पज्ञत्वसर्वज्ञत्वशास्यत्वशासितृत्वादिभावंभजतेतावेवतद्भावेउपाधि ४८
प्रचारादर्शिनोउदासीनवोधरूपतयाजीवसाक्षीश्वरसाक्षीतिद्विधाव्यभ्यांव्यवह्रियते एवंचजीवः ईश्वराराधनावाप्तप्रत्य
क्तत्वज्ञानेनमायायांनष्टायांतत्कार्यस्याविनाशेनसाक्षित्वाभावात्साक्षित्वमपिपरित्यज्यविंबप्रतिविंबानुस्यूतंशुद्धंतत्
त्पदंचैतन्यंप्राप्नोतीतिनरिदमुक्तंदैवीमायेतिचेत्कस्यास्तवजीवेश्वरसंबंधित्वंजीवस्येश्वरभजनेनमायातरण

कृतस्तर्हि सर्वे त्वां प्रपद्य मायां न तरंतीत्याशंक्याह न मामिति । यतो दुष्कृतिनः पतो मायया ऽपहृतं तैर स्कृतं ज्ञानं अखंडसंविद्रू
पब्रह्मरूपेषां ते अतस्मिंस्तस्मुं गृह्य भावात् मूढाः आत्मानात्मविवेकहीनाः अत एव नराधमा मां न प्रपद्यंते कुतो दुष्कृतिनः य
तो मायया ऽपहृतं तिरस्कृतं ज्ञानं अखंडसंविद्रूपब्रह्मरूपेषां ते ऽपहृतज्ञानाः एतेन मायाया आवरणशक्तिरुक्ता किं च आ
सुरं असुराणां विरोचनादीनां भावं चित्ताभिप्रायं आत्मा देहः महय्य इत्यादिनाख्कृतं देहेंद्रियसंघात एव सम्यक् क्तेन दर्शितं यद
स्ति वा विधं आश्रिताः एतेन मायाया विक्षेपशक्तिरुक्ता तदेवं मायया स्वरूपानंद आवृत्य देहाद्यध्यस्मेजनिते सति तद्भि
मानादेहादिपुष्ट्यर्थं दुष्कृतं कुर्वंतीति ते न च मूढाः संतो नराधमा मां न प्रपद्यंते सर्वे सर्वानर्थमूलं मायेवेत्यर्थः १५ ये तु म
त्यपि देहाद्यध्यासे मनो विद्यते मत्प्रीत्यर्थं सुकृतमेवाचरंतीति ते पि चतुर्विधा न केवलं ते सर्वे मंदेक कामाइत्याशयेनाह चतु

न मां दुष्कृतिनो मूढाः प्रपद्यंते नराधमाः । माययापहृतज्ञाना आसुरं भावमाश्रिताः १५ चतुर्विधा भ
जंते मां जनाः सुकृतिनोऽर्जुन । आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ १६ तेषां ज्ञानी नित्ययुक्त ए
कभक्तिर्विशिष्यते । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः १७

र्विधा इति आर्तः पीडितः पीडापरिहारार्थी जिज्ञासुः स्वात्मज्ञानकामः अर्थार्थी धनाद्यर्थी ज्ञानी चेति चतुर्विधा मां भजंते १६ किं स
र्वेपि समाः एतेन सुकृतिनद्वत्वसाधारण्येन विशेषणमाध्यते तेषामिति तेषां मध्ये ज्ञानी विशिष्यते यतो नित्ययुक्तः आर्ताद
पाहिकामिनः कामदृष्टेन मद्भजने युक्ता भवंति अयं तु नित्ययुक्तः एकभक्तिश्च एकभावेन मद्भजनं करोति तथा हि
आर्ता रोगिणः सूर्यं भजंते जिज्ञासवः सरस्वतीं अर्थार्थिनः कुबेरादीनि तेषां कर्मार्थित्वेनानेकभक्तित्वे दृश्य
ते तस्य नित्ययुक्तत्वे एकभक्तित्वे च हेतुर्हि यतो ज्ञानिनो ऽहमत्यर्थं प्रियः आत्मत्वादेव आत्मा च प्रियो निरूपाधि
प्रेमगोचरत्वात् तेन रेतः प्रियः पुत्रात् प्रियो वित्तात् प्रियो ऽन्यस्मात् सर्वस्मादंतरयमात्मेति श्रुतेश्च सु च ज्ञानी मम प्रियः भक्तो
ना दुर्लभत्वादिति भावः १७

उदाराइतिसर्वएवैतेउदाराउत्कृष्टाएवज्ञानीतुममआत्मैवेतिममतंनिश्चितंहियतःसःयुक्तात्माअहमेवभगवान्वासु
देवइतिनेष्ठोनमपिसमाहितचितः मामेवअनुत्तमांश्रेष्ठांगातिंआस्थितः नतुमत्तोन्यदेवेप्सपादिकंकामयमानोमद्भक्तिं
करोतिकिंतुममभाग्ययमेवमांभजतइत्यर्थः १८ किंचवासुदेवःसर्वमितिज्ञानवान्योबहूनांजन्मनामंतेचरम
जन्मनिमांप्रपद्यतेसम्यग्दर्शनेनापरोक्षीकरोतिसमहात्मात्यन्तमतःसुदुर्लभइतियोजना १९ अन्येतुतैस्तैःका
मैःपुत्रपश्वादिविषयैर्हृतःज्ञानाःहृतंदूरीकृतंज्ञानंविवेकोयेषांतेअन्यदेवताःअहमेतस्याराधनेनेदंफलमा
वाप्नवानीतिभेदबुद्ध्याप्रपद्यन्तेइंद्रादीभजंते।नियमंचतुर्दस्युपवासादिकंआस्थायकेत्वोवक्ष्यमाणाविधयादेव्याश्रि

उदारांसर्वएवैतेज्ञानीत्वात्मैवमेमतं आस्थितःसहियुक्तात्मामामेवानुत्तमांगतिं १८ बहूनांजन्मना
मंतेज्ञानवान्मांप्रपद्यते वासुदेवःसर्वमितिसमहात्मासदुर्लभः १९ कामैस्तैस्तैर्हृतज्ञानाप्रपद्य
तेन्यदेवता तंतंनियममास्थायप्रकृत्यानियतास्वया २० योयोयांयांतनुंभक्तःश्रद्धयार्चितुम
हसि तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहं २१ सतयाश्रद्धयायुक्तस्तस्याराधनमीहते लभ
तेचततःकामान्मयैवविहितान्हितान् २२

सुपर्विणीनियताः २० किंचयोयोभक्तोराजसःसात्विकस्तामसोवायांतनुंतादृशींदेवादिरूपांयक्षरक्षोरूपांभूतप्रेत
रूपांवामूर्तिंश्रद्धयतादृशीमेवार्चितुमिच्छतितस्यभक्तस्यतामेवश्रद्धांसात्विकींराजसींतामसींवाहंसर्वेश्वरो
अचलांविदधामि २१ ततश्चसतयाश्रद्धयायुक्तःसन्तस्यामूर्तेःआराधनंसंसाधनंवशीकरणमीहतेइ
च्छतिततश्चकामान्विषयान्लभतेमयैवविहितान्तेऽज्ञात्वापितान्हितान्ईप्सितान्एतेनसर्वासांदे
वतानांस्वात्मावशवर्तित्वंदर्शितं २२

भ·गी· टी· ५६

नैव यांति सर्वं यद्यतरदेवो भक्ताय तादीनेव यांति भूतप्रेतभक्ताश्च भूतादीनेवेत्यपि द्रष्टव्यं मद्भक्तास्तु २

अल्पमेधसामल्पप्रज्ञानां तस्य तस्य तन्मनुते न्याद्विजानातितत् इत्यामितिष्कृतेः हितं अल्पंत तैव नेधापेषां ने वा ध्यापीमिलाषण
इत्यर्थः तेषां तत्फलं अंतवत्सर्वस्य वाल्पार्थस्यांतवत्वाद्देवांतशब्दो भेदे नेश्वरभक्तिर्भ्योविनेदार्थोपनो देवयजो देवा
न्भजंते इति देवयजः ते देवान्स्वंतपुक्तौ [illegible] मामेवानंतं यांति अनंतस्तेनं तफलभाज इत्यर्थः २३ एवं तर्हि कुतस्त्वा
मेव सर्वे न प्रतिपद्यंते इत्याशंक्याज्ञानादित्याह अव्यक्तमिति अव्यक्तं सर्वोपाधिशून्यं अस्पष्टमपि वसुदेव शरी
रेणाभिव्यक्तिमापन्नं अस्मदादिवच्छरीराभिमानिनं मामबुद्धयो मन्यंते पतः मम परं भावं परत्वं इतोत्कृष्टत्वं अजा
नेत उत्कृष्टत्वमेवविधिनष्टि अव्ययं नवेतीत्यव्ययं अविनाशि अनुत्तमं यस्मात्ततदन्यदुत्कृष्टं च नास्ति नि

अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसां देवान्देवयजो यांति मद्भक्ता यांति मामपि २३ अव्यक्तं
व्यक्तिमापन्नं मन्यंते मामबुद्धयः परं भावमजानंतो ममाव्ययमनुत्तमं २४ नाहं प्रकाशः
सर्वस्य योगमायासमावृतः मूढोयं नाभिजानाति लोको मामजमव्ययं २५ वेदा
हं समतीतानि वर्तमानानि चार्जुन भविष्याणि च भूतानि मां तु वेद न कश्चन २६

रतिशयमक्षयं ऐश्वर्यरूपमित्यर्थः २४ कुतस्त्वद्विषयमज्ञानं लोकस्येत्यत आह नाहमिति योगयोगिन् अर्थ
अघावप्रत्ययांतो योगमायावृतः अहं न स्यदार्थः सर्वस्य योगिनस्त्वपरार्थमात्राभिः तस्य न प्रकाशोस्मि तत्र हे
तुमायासमावृत इति माया तु योगो युक्तिः गुणानां घटने सैव योगमाया वापा चित्त समाधिर्वा को जोन भगवतस्तत्त्व कु
ताम्ना यैति भगवत्संकल्पवशवर्तिनी मायेत्यर्थः उत्तरार्द्धं स्पष्टार्थः २५ ननु त्वदन्यत्रं लोकं त्वन्मायामो
हयति चेत्त्वां कुतो न मोहयतीति तत्राह वेदाहमिति सत्यसत्यपि लोकस्य मम मायामेदे विशेषोपाधिकभेद
स्य सत्त्वात् उपाधि[illegible]ना मानित्वा ह्लोको मूढः तदभावाद्धाहं सर्वं जानामि इति विशेषः अतस्तेरार्थः स्पष्टः २६ ५६

शिव

केमपुनर्निमित्तेनानीतादीनि भूतानि न जानंतीत्याशंक्याह इच्छेति इच्छा रागः द्वेषः ताभ्यां समुत्थितो द्वंद्वमोहः शोभना शोभनसत्यासत्यनित्यानित्यात्मानात्मसु विपर्ययपाः अशोभनेषु शोभनाबुद्धिः शोभनेवाशोभनबुद्धिरित्येवं रूपः स्नेहः हे भारत भरतान्वय सर्वभूतानि सर्गे सृष्टिविषये मोहं अविवेकं यांति हे परंतप अयं भावः यो हि सृष्टे रूपतत्वं स्वरूपं च तत्वतो जानाति स ब्रह्मवित् सर्वज्ञत्वात् ईश्वरादीन् जानाति सृष्टौ च सर्वेषां मोहोस्ति अशोभने स्त्र्यादौ शोभनाध्यासात् असत्ये प्रपंचे सत्यत्वासत्यत्वाध्यासात् तु सत्ये वात्मन्यसंगे त्वसत्यत्वाध्यासात् अनित्ये स्वर्गादौ नित्यत्वाध्यासात् अनात्मनि देहादावात्माध्यासात् अस्ततो विपर्ययेन सृष्टेर्ज्ञानं प्रतिबद्धं तेन च सार्वज्ञ्यं न जायते ईश्वरादीनामिति २७ केषां तर्हि सार्वज्ञ्यं भवतीत्याशंक्याह येषां त्विति द्वाभ्यां येषां पुनः जनानां पुण्यकर्मणां पापं अंतगतं अंते नाशं प्राप्तं शापं हि तापाश्रिते

इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत सर्वभूतानि संमोहं सर्गे यांति परंतप २७ येषां त्वंतगतं पापं जनानां पुण्यकर्मणां ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः २८ जरामरणमोक्षाय मामाश्रित्य यतंति ये ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलं २९ ॥

तिसमासः ते द्वंद्वमोह उक्तलक्षणस्नेहनिर्मुक्ताः संतः प्रथमं दृढव्रताः शमदमादिदाढ्येन भाजो भक्त्वा मां भजंते २८ अतएव जरामरणयोः प्रवाहात आत्मनो मोक्षाय मामाश्रित्य मम विसमाहितचेतसो भूत्वा ये यतंति ज्ञानलाय वेदांतश्रवणादौ ते तत्सर्वं वेदांतप्रसिद्धं कृत्स्नं ब्रह्म विदुः चिरउदुपासकाद्य कृत्स्नं ब्रह्मविदः सूत्रकारणयोर्निष्कलस्य वा ज्ञानात् श्रीगोपाले वा नोपासकास्तु तत्पदलक्ष्ये कृत्स्नं ब्रह्म विदंतस्ते अध्यात्मिकं कार्यं न जानंतीति सर्वविदो भवंतीत्यर्थः अनेन यतत्नानामहं भूयो यतंतं नातयस्माविशिष्यते इत्येकविज्ञानात्सर्वविज्ञानप्रतिज्ञायाः पूर्वं कृतातस्याउपसंहारो दर्शित अध्यात्मं आत्मनि शरीरे स्थितप्रत्यगात्मविषयं वस्तुस्वरूपं त्वंपदार्थमित्यर्थः कर्म च तत्त्वंपदार्थज्ञानसि

एवंतत्पदार्थविवेकंसद्योमुक्तिहेतुंसमाप्यतत्प्राप्यपापभूतानुपासनातिक्रममुक्तिफलानिविस्तरेणवक्तुकामःसंक्षे
पेणसूत्रयतिसाधिभूतेतिअधिभूतंचअधिदैवंचताभ्यांसहितंसाधिभूताधिदैवंतंयाधियज्ञेनसहितंसाधिय
ज्ञंचमांविदुरुपासतेतेयुक्तचेतसोयतःनिरंतरसमाहितचित्तास्ततोमांप्रयाणकालेपिसर्वजनव्यामोहकेपिदुः
२ खभावनादार्ढ्यान्मरणकालेपितस्यज्ञानस्यप्रमोषोनभवत्यतोभगवतिनिरंतरंतर्पणदृढभावनाकर्तव्येति
भावःअधिभूतादिपदार्थान्भगवान्देवव्याख्यास्यतीतिनोक्तावयं इतिश्रीभावदीपेभीष्मपर्वणिगीतासुस
प्तमोध्यायः ७

साधिभूताधिदैवंमांसाधियज्ञंचयेविदुः प्रयाणकालेपिचमांतेविदुर्युक्तचेतसः ३० इतिश्रीभग
वद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेज्ञानविज्ञानयोगोनामस
प्तमोध्यायः अर्जुनउवाच किंतद्ब्रह्मकिमध्यात्मंकिंकर्मपुरुषोत्तम अधिभूतंचकिंप्रोक्त
मधिदैवंकिमुच्यते १ अधियज्ञःकथंकोत्रदेहेस्मिन्मधुसूदन प्रयाणकालेचकथंज्ञेयोसि
नियतात्मभिः २

पूर्वाध्यायेमायोपहितंब्रह्मजगत्कारणमुक्तंतत्रकेचनमानामनुपाधिब्रह्मप्रतिपत्तयेउपलक्षणंमध्यमाना
मुपास्यंचेतिमत्वाप्रतिपत्तव्यब्रह्मतद्विषयएकउपासनाविषयोपरएवंसप्तप्रश्नविषयास्तेब्रह्मतद्वि
दुरित्यध्यायांतेसार्धश्लोकेनभगवतासूत्रितास्तद्वृत्तिरूपोयमध्यायआरभ्यतेतत्रसूत्रितानांब्रह्मादिशब्दा
नामर्थंबुभुत्सुरर्जुनउवाचकिमितिकिंमितितत्कृत्स्नंब्रह्मेतिप्रथमःप्रश्नःशेषःस्पष्टार्थश्लोकः १ अधि
यज्ञःकोत्रकइतिस्वरूपप्रश्नःकथंसेपदइतिपदार्थकेषणतत्तउपासनाप्रकारप्रश्नश्चेतिद्वयंमिलित्वाएक

क्रमेणैषां प्रश्नानामुत्तरमाह अक्षरमित्यादिभिः तत्र किं तद्ब्रह्मेति त्यस्योत्तरं परमं ब्रह्मेति परमं तद्ब्रह्मेति योज
ना ऽक्षरशब्दस्य वर्णेषु रूढत्वादोमित्येतदक्षरमित्यादिश्रुतेरोमित्येकाक्षरं ब्रह्मेति स्मृतेश्च दर्शनेनापि प्रणव
स्याक्षरशब्देन ग्रहणे प्राप्ते परमिति विशेषणं प्रणवस्य परब्रह्मत्वासंभवात् अतस्मात् एतद्वैतदक्षरं गार्गि ब्राह्म
णा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमिति श्रुतिप्रसिद्धमखंडैकरसं ब्रह्म अक्षरशब्दितं तद्ब्रह्मेति प्राचः

श्रीभगवानोवाच अक्षरं ब्रह्म परमं स्वभावो ध्यात्ममुच्यते
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ३

यद्वा अक्षरशब्देन जीवः कूटस्थोऽक्षर उच्यते उत्तमः पुरुषस्त्वन्य इति गीतायाम् अक्षरं प्रधानममृतं क्षरं हरः क्षरात्मा
नावीशते देव एक इति श्रुतौ च कूटस्थपदेनामृतपदेन च विशेषितस्याक्षरपदस्य आत्मवा जीवं वाचित्वदर्शिना
त्तमतोऽक्षरमिति पेत्वाभावव्युदासः तथा चाक्षरं जीवाख्यं परं ब्रह्म परममिति विशेषणेन सोपाधिकस्य पू
र्वाध्यायोक्तस्य व्यावृत्तिः नहि जीवस्य सोपाधिकस्य ब्रह्मभावः संभवक्या वर्तकोपाधौ मायादर्पणे जाग्रति

तयोरभेदाभियोगात् किंतद्ब्रह्मेतिप्रश्नेपरममितिविशेषणाभावेपिनेब्रह्मतद्विदुः कृत्स्नमितिप्रश्नोत्थापके सूत्रे
परमत्वाविनाकृत्स्नपदेनब्रह्मणोविशेषत्वात् । तोपिब्रह्मणः परममितिविशेषणं पुनरत एवप्रश्नेपितच्छब्देनकृ
त्स्नत्वस्यावग्रहणात् ततश्च किंतत्कृत्स्नंब्रह्मेतिप्रश्नेपदद्वयंजीवाख्यंतदेवअपीतोपाधिसंबंधंकृत्स्नंब्रह्मेतित
त्वमसीतिमहावाक्यार्थः श्रुतीर्वाब्रह्मभावप्रतिपादितोभवतीतिहृद्यं तथाचाध्यात्मेत्यंगंकोभावः स्वरूपंस्वभावः
शुद्धत्वंपदार्थः सोध्यात्मंउच्यतेभाष्येतुतस्यैवब्रह्मपरस्यब्रह्मणप्रतिदेहंप्रत्यगात्मभावः स्वोभावः स्वभावो
ध्यात्ममुच्यतेअध्यात्मशब्देनाभिधीयतेइतिविसर्गः देवतोद्देशेनद्रव्यत्यागात्मकोयोगः सकर्मसंज्ञितः त
मेववशिष्टनहिभूतेतिभूतानांभावः सात्विकादिस्वभावः उद्भवश्चतयोः करणात्भूतभावोद्भवकरः तथा
हिबुद्धिकर्मानुसारित्वंभावस्यस्मर्यतेतथाउद्भवोपिकर्मतएवस्मर्यतेअग्नौप्रस्ताहुतिसम्यगादित्यमुप
तिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति ३

न

क्षरो भावो जनिमद्वस्तु कर्मफलभूतं तत्साधनभूतं च तदधिभूतमित्युच्यते अधिदैवं पुरुषः सर्वासु पूर्षु शे
ते इति सर्वकरणानां ग्राहकः सकलदेवतात्मा हिरण्यगर्भः अधियज्ञो यज्ञाभिमानी विष्णुरन्तर्यामी सोऽहमेवदे
हेऽस्मिन्नस्मिन्देहभृतां वर ४ अत्र षट्प्रश्नोत्तरेषु प्रथमे जीवस्य ब्रह्मभाव उक्तः तं जानतां प्राणमेव नास्ति न त
स्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन्ब्रह्माप्येतीति श्रुतेः द्वितीयेऽपि द्वस्त्वपदार्थ उक्तस्तत्रतत्रान
स्यापि वस्तुतत्त्वाविषयत्वान्न तत्र भावनापेक्षास्तीति न भावनाफलमन्तकाले तत्तृतीयोपपत्तेस्तृतीयचतुर्थ

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं अधियज्ञोऽहमेवात्र देहे देहभृतां वरः ४
अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरं यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ५

योस्तु कर्म तत्साधनफलभूतं च जन्यं वस्तूक्तं स्तत्त्वोऽपि न भावनापेक्षास्ति अंतकाले प्रबलेनैव कर्मणा चित्तस्या
रोधात्तत्साधनफलभूतस्यैव स्मरणेन वस्तुपभावेन न तत्र भावनापावैय्यर्थात् परिशेषात् अंतयोरेव कार्यकारण
ब्रह्मणोः सोपाधिकनिरुपाधिकयोरन्यतरस्य भावनाद्देवाचेदं तत्काले तत्स्मरणयोः वस्वरूपं भावीति तयोरन्यतरं स
स्वरूपं परमात्मानं स्मरन् यः कलेवरं मुक्त्वार्चिरादिमार्गेण प्रयाति सः ब्रह्मलोकप्राप्तिद्वारा क्रमेण मद्भावं मोक्षं
यातीत्याह अंतकाले चेति स्पष्टे जनानां नास्त्यत्र संशय इति सोपाधिकब्रह्मणोपास्तिं प्रकृत्य परां तं चैकाच

ना

हृदयस्यनाड्यस्तासांमूर्द्धानमभिनिसृतैकायोर्ध्वमायन्नमृतत्वमेतिविष्वङ्ङन्याउत्क्रमणेभवतीतित
दुपासकस्यगतिरुक्तंकिंस्यामृतत्वस्यश्रवणात् यस्तुशुद्ध त्वंपदार्थरूपमध्यात्मंवस्तुमात्रंवेदऽप्रसोब्रह्मात्मै
क्यस्तोभावान्नतस्यप्राणाउत्क्रामंतीत्येतद्वाक्यविषयोनभवतिकिंतुशांतेचैकाचेत्येतस्यैवविषयोननुतस्यानु
पासकत्वात्कथमेवमितिचेत् ननहिकल्याणकृत्कश्चिद्दुर्गतिंतातगछतीतिन्यायेनतस्योभयभ्रष्टत्वासं
भवात्कठवल्लीषुनिष्फलप्रत्यगात्मविदंकेवलयोगिनंप्रकृत्यशांतेचैकाचेतिश्रुत्वावाक्येवेदांतविज्ञानसुनिश्चि
तार्थाःसंन्यासयोगाद्यतयःशुद्धसत्वातेब्रह्मलोकेतुपरांतकालेपरामृतात्परिमुच्यंतइतिश्रुतेः निश्चिता
र्थानांशोधितत्वंपदार्थानामेवक्रममुक्तिरवगम्यतेनचात्रसुनिश्चितार्थाइत्यनेनब्रह्मात्मैक्यनिश्चयवंतो
गृहीतुंशक्याः तेषांगत्यभावस्यप्रोक्तत्वात् नाप्युपासकाः असंभवात् उपासनाहिनामश्रुतस्मि
त्तबुद्धिर्यथाशालग्रामेविष्णुबुद्धिरेवंसत्त्वेविराडंतर्यामिछात्मबुद्धिरितिननतद्वंतःसुनिश्चि
तार्थाइतिवक्तुंशक्यंतस्मादध्यात्मविदंब्रह्मात्मैक्यानवगम्यात् अनुपास्यत्वेनात्यप्रत्यया
भावेपिअर्चिरादिगतिप्राप्तिरस्तीतिसर्वमनवद्यं ५

नकेवलंकार्यकारणब्रह्मणोरेवभावनांत्यप्रत्ययवशात्तद्भावप्राप्तिहेतुरपितुकीटस्यजीवतएवभावनाव
शात्तद्भावस्तुप्रावप्राप्तिर्दृश्यतेनंदिकेश्वरस्यवस्मर्यतेसहिमहादेवंभावयन्नतत्सारूप्यंदेहांतरंविनैवप्राप्त
इतिपौराणप्रसिद्धंतत्रकिमुवक्तव्यंअंत्यप्रत्ययवशान्देहांतरेभावभावप्राप्तिरस्तीतिमत्वातस्यैवार्थमन्य
त्रापिदर्शयतियंयमितितद्भावभावितःभावाकारवासनयाजनितइत्यर्थः ६ यस्मादेवंतस्मात्सर्वेषुकाले

यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरं तंतमेवैतिकौंतेयसदातद्भावभावितः ६
तस्मात्सर्वेषुकालेषुमामनुस्मरयुध्यच मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयं ७

षुमामनुस्मरअंतकालेमत्स्मृत्यामद्भावप्राप्त्यर्थंयुध्यचेति चचकारात्स्वकर्मोपलक्ष्यतेः ननुद्वयोर्वगम्यते
ज्ञानकर्मसमुच्चयकर्तृत्ववत्उभयानुष्ठानात्एकस्मिन्नेवाधिकारिणिकर्तृत्वाकर्तृत्वप्रत्ययद्वन्द्वविरोधा
भावात्मय्यर्पितमदेकनिष्ठान्तःकरणेनमनोबुद्धीयेनसमय्यर्पितमनोबुद्धिस्त्वंअसंशयंमामेवैष्य
सिप्राप्स्यसिअंतकालेस्मरणेनेतिशेषः ७

एतदेवश्लोकत्रयेणविवृणोति अभ्यासयोगयुक्तेनेतितत्रस्थितौयत्नोभ्यासइतिसूत्रितोभ्यासः तत्रध्येयेवस्तुनि
चित्तस्यस्थिरीकरणार्थोयत्नः सचप्रत्ययान्तरतिरस्कृतसजातीयप्रत्ययप्रवाहीकरणरूपः सोत्राभ्यासः तत्रभावो
विषयः सिद्धः विष्णुप्रतिमादिर्विराड्वाहिरण्यगर्भोवा असिद्धस्तुमानसप्रतिमादिः तत्रासिद्धेमानसप्रतिमाकरणासं
पादनंचेतिविषयभेदात्तद्विगुणोयत्नः कर्तव्योभवति सिद्धेतुचित्तस्थिरीकरणएकएवयत्नः तत्रयथास्वतः
स्वच्छः स्फटिकः जपाकुसुमोपरागाल्लोहितः स्फटिकइतितत्रलोहित्याध्यासः तत्प्रावल्यात्तत्रैवस्फ
टिकधीप्रमोषेपद्मरागत्वाध्यासः पद्मरागेपिइन्द्रकाचोर्इन्द्रनीलत्वाध्यासस्तत्रैवतदानीमेवकिंचिद्दूर
स्थितिहीनोपलत्वाध्यासइतिउत्तरोत्तराध्यासक्रमेणाशुद्धएकएवस्फाटिकः पंचविधोभवति एवंस्वतःशु

अभ्यासयोगयुक्तेचेतसानान्यगामिना परमंपुरुषंदिव्यंयातिपार्थानुचिंतयन् ८

द्धचैतन्यंमायोपरागात्तदेवेश्वरः मायाप्रावल्यात्तस्यैवेश्वरत्वासंप्रमोषेतत्रैवसूत्रात्माध्यासः सूत्रेपिअसोन
रुर्यो[illegible]द्विराडध्यासः तत्रएवविराडेकदेशेषुशरीरादौबुध्यात्मत्वाध्यासः तत्रयथाघटांतर्गतःप्रदीपः घटमात्रंभासयतेघटा
च्छिद्राद्वहिर्गतः किंचित्स्वप्रभयासंसृष्टंविषयमवभासयतेसर्वात्मनाघटादवहिर्गतस्तुकृत्स्नंभवनोदरवर्तिपदा
र्थजातंप्रकाशयातितथादेहांतर्गतासतीसंवत्संनिकृष्टंकंचिद्विषयंस्वप्रकाशादिकमवभासयतेसर्वात्मनागु
हातोयुक्तादेहकृतपरिच्छेदाभिमानेमुक्तेत्वपरिच्छिन्नासतीकृत्स्नंविराडात्मानमवभासयतेपरोक्षंवास्यग्रं
थेष्वपिमहिमाहितवहुतारासोमस्यादयोपिह्यासितिविषयमिहाल्पंजातमद्योतयंतिसहजलयस्मपुष्पंयद्योत
येज्योतिरंतोस्थितंपुवनमपिसस्वज[illegible]सूलभेदक्रमेणेतिसहजलयःस्वभावकः देहकृतपरिच्छेदाभिमा

नस्तुस्मात्स्वप्नादेरुत्थितं क्रमेण संकल्पक्रमेण सदोषमात्राभिर्निवृत्तत्वात्सर्वस्य प्राक्संकल्पात्दसत्वात्तथा च श्रुतिः स य
दि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठंतीति श्रुतेः तद्दोषनिमित्तरूपाद्यो विषयाः संकल्पकृता इत्यत्र
पादस्तत्राद्यदोषः रागादयः तदेवं प्रकाशमाने विराजि अहमेवेदं सर्वोस्मीति मन्वानः सोस्य परमो लोक इति शास्त्रप्रमाणा
दुपासकेन गृहीतोहंग्र यद्यपि वस्तुतत्वापेक्षया भ्रांतिस्तथापि स्वाभाविकदेहाहंग्रहात्स तत्स्वरूपः यथा स्फटि
केहेनोपलत्वग्रहापेक्षया इंद्रनीलत्वग्रहस्तद्वत्तथा च स्फटिके प्रतिधीयमानं च स्नेहरो नरयत्नप्रवृद्धो इंद्रनील
त्वं बाधित्वा पद्मरागत्वेन बाधेन लोहितस्फटिकत्वं तद्बाधेन स्फटिकत्वं चावगच्छति एवं गुरूक्तेन गच्छतोप्युक्तात्प्रत्यगात्मा
निप्रतिधीयमानं मनोस्वकार्यरूपपर्यवसन्नं तत्रएवातिष्ठते चरमे विश्वरूपं प्राप्य तत्स्वरूपमेव विलीयते यथोक्तं येन
त्यजसि तत्त्यजेति येन मनसा त्यजसि विराडादिभावं तदपि भावं तदपि मनः त्यजेत्यर्थः तदेवं नित्यव्यवहारापेक्षया।
सिद्धेषु विराडस्वत्रांतर्यामिषु मनसः स्थैर्यकरणार्थे यत्नोभ्यासस्तत्फलभूतो योगः समाधिः ध्येयवस्तुन्ये
व चेतसः स्थैर्यं तेन युक्तेन पक्वेन चेतसा नान्यगामिना अत्र नान्यगामिना नैकधेति वक्तव्ये समासः तेन चेतसा परमं
सर्वोत्कृष्टं पुरस्तान्निरस्तोषदोषं यत्सर्वेषां पुरस्तात्सर्वान् पाप्मनः औषत्तस्मात्पुरुष इति निर्वचनात्तद्दिव्यं द्योतमा
नं अनुचिंतयन् अहमेव भगवान् सर्वात्मा वासुदेव इति सततं आचार्योपदेशमनुध्यायन् तमेव नदीसमुद्रन्या
येन याति हे पार्थ तथा च श्रुतिः यथा नद्यः स्यंदमानाः समुद्रेस्तं गच्छंति नामरूपे विहाय तथा विद्वान् पुण्यपापवि
धूय परात्परं पुरुषमुपैति दिव्यमिति यास्तस्त्रांतर्यामिणं ८

तदेवं उपासनीयस्वरूपमुक्त्वा उपास्यस्य स्वरूपमाह कविमिति कविं क्रांतदर्शिनं सर्वज्ञं पुराणं चिरंतनं ऽनुशा
सितारं जगतो नियंतारं अणोः सूक्ष्मादप्याकाशादे ऽरणीयांसं सूक्ष्मतरं योऽनुस्मरेत् ऽनुचिंतयेत् सर्वस्य कर्म
फलस्य धातारं विभागेन प्रदातारं अचिंत्यरूपं नास्य रूपं विद्यमानमपि केनचिच्चिंतयितुं शक्यं आदित्यवर्णं आ

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरे
द्यः सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ९

दित्यस्येव नित्यप्रकाशरूपो वर्णो दीप्यमानता यस्य तं ऽआदित्यवर्णं सर्वजगदवभासकमित्यर्थः तमसो
देहेंद्रियादावनात्मन्यात्माभिमानरूपाविद्यातः परस्तात् परावृत्तं सति देहाभिमाने न प्रकाशते योगयुक्ता
त्मके तु तस्मिन्स्वयमेव प्रकाशत इत्यर्थः ९

उपासनायाः फलमाह प्रयाणेति प्रयाणकाले मनसाचलेन कृतेन रवर्जितेन भक्त्या भगवति वासुदेवे आराध्यत्वबुद्ध्या युक्तो योगब
लेन योगः मनः प्राणेंद्रियक्रियानिरोधः हृदयेपुंडरीके तेषां वशीकरणमित्यर्थः तस्यैव बलेन च युक्तो भूमिकाजयक्रमेण प्राणे
व मूलादिब्रह्मरंध्रांतस्थानेषु आरोहावरोहक्रमेण संचारितपवनोंतकाले भ्रुवोर्मध्ये सम्यक् तच्चक्रे प्राणं आवेश्य स्थापयित्वा
स्थापनप्रयोजनं प्रणवविस्मरणपूर्वकं दिव्यपुरुषचिंतनं परब्रह्म भ्रुमध्यादुपर्यनीयमाने वायो मनसो मूर्छा मा भवतु इति त
स्यामवस्थायां न भवतीत्यतो यत्नेनैव संपाद्य वस्तुतोऽर्चिरादिमार्गप्रवर्णमानं वशस्य स्थाने विशेषप्रायकेस्य प्राप्य स्थानं च
तस्मिन्नेव स्मरणं कर्तव्यं न वासनावासितं मनः भ्रूमध्याद्योगिनां ऊर्ध्वयानं उच्चाटं त्विति प्रयाणकाले मुक्तो ध्रुव ब्रह्मांडरवे

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन
चैव भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्स तं परं पुरुषमुपैति दिव्यं १०

पेरं मित्वा प्रचलितेस न निमनो लब्ध वृत्तिकं भूत्वा एवं संस्कारप्राबल्यात् योगमहात्म्यात् दिव्योपात्तु येन म अर्चिरादिपर्वदेवताभिरभि
हृत्यमानेऽन्तरोत्तरं स्थानं प्रत्यतिवाह्यमानेन समानेनैव च पुरुषेण संगच्छमानेनेन च पथाभिलषितं स्थानं प्राप्यातिमानं
पश्यति तदिदमुक्तं भ्रुवोर्मध्ये सम्यक् प्राणं आवेश्यति स एवं कृत्वा योगी कविं पुराणमित्युक्तलक्षणं परं पुरुषं हिर
ण्यगर्भाख्यं सर्वस्य भूतजातस्य जनयितारं नारायणं दिव्यं उपैति याति उपेति समीपं प्राप्नोति तल्लोकं प्राप्नोतीत्यर्थः
न हि पौराणिकानामिव वैदिकानां मते बृहद्विष्णुरुद्र[illegible] लोकानां उपर्युपरि कल्पनास्ति किं तर्हि सर्वे हिरण्यगर्भ
लोकाख्येसत्यलोके एवांतर्भवंति यतो हि उपासनकर्मार्जितं हिरण्यगर्भप्राप्यं नेति बृहदारण्यके तद्ब्राह्मणो वासि

गी. भा.
गी.
६२

भ्रुवोर्मध्ये प्राणमावेश्य सम्यगुक्तं तत्किं कृत्वा कर्तव्यं तत्कृत्वा च किं कर्तव्यमित्येतत् इदं वदिष्यत्तत्प्रतीकत्वेन चिंतितं प्रणवं ताव
द्वाच्यवाचकयोरभेदविवक्षयास्तीति पदक्षरमिति यदक्षरं प्रणवाख्यं वाचकं वेदविदो वदंति यच्चापदक्षरं ब्रह्म तद्वाच्यं एतद्वे
पदक्षरं ब्राह्मणा अभिवदंति स्थूलमनण्वह्रस्वमदीर्घमित्येवंलक्षणं वा वेदविदो वदंति यच्च यतयो विशंति ब्रह्मप्रतीकत्वेन
शरणीकुर्वंति यत्ते सम्यग्दर्शने सरत्सागरन्यायेन यत्र विशंति यतयः यदक्षरमिच्छंतो ब्रह्मचर्यं चरंतीति यच्च ध्येयेपि सम
नेतन्नेपदं वर्णत्रयात्मकं पदनौपंवाख्यानं विष्णोः परमं पदं संग्रहेण प्रवक्ष्ये अपंच वाच्यवाचकयोरभेदः स्मृतिश्चायमाग
म्यते अन्यत्र धर्मादन्यत्राधर्मादिति सर्वे धर्मातीतं ब्रह्म प्रकृत्य सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति यदि
च्छंतो ब्रह्मचर्यं चरंतीति तत्ते पदं तिष्ठदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतदंतस्ते ओंकारेणोपसंहारात फ

यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण
प्रवक्ष्ये ११ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणं १२

लं च प्रतिभावात् ओंकारं प्रतीकत्वेन प्रकल्प्यतद्वारा शुद्धं शबलं वा ब्रह्म प्रतिपत्तव्यं तथा चस्म तं तत्परेण तद्वै सत्यका
मपरं च ब्रह्म यदोंकार इत्युपक्रम्य तस्मादेवं विद्वानेतेनैवायतनेनैकतरमन्वेतीत्येतद्दृष्टं आयतनं शालग्रामवत् प्रती
कं तेन ११ भ्रुवोर्मध्ये कथं प्राणं आवेशयेदित्यत आह सर्वेति सर्वाणि श्रोत्रादिविषयग्रहणानि द्वाराणींद्रिया
णि संयम्य निगृह्य तथा तथा हृदि मनोपि निरुध्य तेषां कं तकं भूतं प्राणं मूर्द्धन्यनाडीतश्चक्रे सुषुम्नाख्यया मूर्द्ध्नि भ्रु सु
वोर्मध्ये आधाय कथं योगधारणं योगमाश्रित्य धारणं मनसो देशविशेषे निर्वर्त्तनीं आस्थित
अनुतिष्ठन् सन् १२

६२

मूर्द्ध्नि प्राणमाधाय किं कुर्यादित्यत आह ओमितीति ओंकारस्वरूपं एकाक्षरं एकं च तत् अक्षरं च तत् तद्व्याहरन् उच्चरमाणो मां च ब्रह्मस्वरूपं अ
नुस्मरन् यो हि देवदत्तमास्मृत्वा तन्नाम व्याहरति तस्मै देवदत्तोऽभिमुखो भवत्येवं ब्रह्मणो नामोच्चारणेन सन्निहितानवा
पकं ब्रह्मसाधकस्य सन्निधीयते सन्निहिते च ब्रह्मणि यो देहं त्यजन् म्रियमाणः प्रयाति ऊर्ध्वनाड्या याति स परमां गतिं
सन्निकृष्टं ब्रह्मरूपां याति ब्रह्मैव प्रकृत्य श्रूयते एषास्य परमा गतिरेषोऽस्य परमा संपदेषोऽस्य परमानंद इति तामेव गतिमु
क्तिं ब्रह्मैव प्राप्नोति ब्रह्मलोकप्राप्तिद्वारा १३ इयं गतिरतीव दुर्लभेति मा मंस्था इत्याह अनन्येति नास्ति अन्यत्र चेतो यस्य सोऽन
न्य

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः प्रयाति त्यजन्देहं स याति परमां गतिं १३ अनन्यचेताः सततं यो
मां स्मरति नित्यशः तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः १४ मामुपेत्य पुनर्जन्म दुःखालयमशाश्व
तं नाप्नुवंति महात्मानः संसिद्धिं परमां गताः १५

न्यचेता इत्यनेन स्मरणे आदर उक्तः सततमिति नैरंतर्यं यो मां स्मरति नित्यश इति दीर्घकालत्वं यावज्जीवं स्मरतीत्यर्थः तस्याहं
सुलभः पार्थ नित्ययुक्तस्य योगिनामावश्यके युक्ताहारादौ यमनियमादौ च युक्तस्यावहितस्य योगिनो योगमनुतिष्ठतः १४
त्वल्लाभेऽपि किं स्यादित्यत आह मामिति मामुपेत्य पुनर्द्वितीयवारं जन्म नाप्नुवंति यज्जन्म दुःखानामालयभूतं मूढदृष्ट्या किं
चित्सुखालयत्वेऽपि अशाश्वतं नश्वरं तु क्षणिकमित्यर्थः के नाप्नुवंति महात्मानो योगेन जितचित्ता अत एव परमां संसिद्धिं मोक्षं गता
ति ऽप्रागता अपि प्रसन्नत्वाद्ध्यानवत्यया ब्रह्मलोकगता मुक्ताः स्मर्यते ब्रह्मणा व सह ते सर्वे प्राप्ते तु प्र[illegible]ति[illegible]संचरे
परस्यान्ते कृतात्मानः प्रविशंति परं पदमिति संचरे ब्रह्मप्रलये परस्य चतुर्मुखस्य अंते नाशे १५

तदलाभे किं स्यादित्यत आह आब्रह्मेति आब्रह्मभुवनात् ब्रह्मलोकमभिव्याप्य ब्रह्मलोकेन सहैवेत्यर्थः लोकाः पुनरावर्ति
नः पुनरावृत्तिस्वभावाः हेऽर्जुन शेषं स्पष्टं अत्रेयं व्यवस्था क्रमप्रमुक्तिफलाभिर्दहरादिविद्याभिः ब्रह्मलोकं गतास्ते तत्रैव
ज्ञानं ब्रह्मप्राप्य ब्रह्मणा सह मुच्यन्ते ये तु पंचाग्निविद्यादिभिर्ब्रह्मलोकं गतास्ते त्वनुपासितपरमेश्वराः पुनरावर्तन्त
इति १६ आब्रह्मभिर्जाकालपरिच्छेदमाह सहस्रेति युगमत्र चतुर्युगपर्यायः चतुर्युगसहस्रं तु ब्रह्मणो दिनं
रात्रिरपि तावतीत्याह रात्रिमिति अत्रापि चतुर्युगसहस्राणि अंते भवति तां चतुर्युगसहस्रांते प्रसिद्धां अहोरात्रविदो

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते १६ सहस्रयुग
पर्यंतमहर्यद्ब्रह्मणो विदुः रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः १७ अव्यक्ताद्व्यक्तयः स
र्वाः प्रभवंत्यहरागमे रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके १८

जना विदुः १७ किं ब्रह्मणो हि जायंते किं वा रा[illegible]त्रावित्यत आह अव्यक्तादिति [illegible] दैनंदिनसृष्टिप्रलययोः प्रकृ
रा तत्वादव्यक्तशब्देन अव्याकृतं वियदादिकार्यमिह ग्राह्यं तदा आकाशादीनां सत्वात् किं तर्हि प्रजापतिस्वापावस्थे
वेह अव्यक्तशब्दार्थः अयं भावः प्रजापतेः स्वापकाले तत्कल्पिताः स्थावरजंगमप्रपंचः सर्वोपि तदीयेऽव्याकृता
ख्ये लीयते रात्र्यागमे तथा दिवसागमे पुनस्तत एव यथापूर्वमाविर्भवति एवं दृष्टिसृष्टि
न्यायेनास्मत्कल्पितोऽयं वियदादिप्रपंचोऽस्मत्सुप्तौ लीयते अस्मत्प्रबो
धे यथापूर्व[illegible]दुर्भवतीति १८
श्री

कृतहानाकृताभ्यागमदोषापत्तेरप्येवं धर्मोत्कर्षणास्य प्रभृतिसाफल्याय अविद्यादिवशादेव सोयं भूतग्रामः पुनः पु
नर्भूत्वा पुनः पुनः प्रलीयत इत्याह वैराग्योत्पादनार्थं भूतग्राम इति अहरागमे प्रलीयत इति योजना स एव भूत्वा प्रली
यत इति योजना न्यो भिन्नो वा भवतीत्यर्थः कुतो यतो अवशः अविद्याकामकर्माधीनस्तस्मात्सर्वानर्थबीजभूतायां
अविद्यायां उच्छेदे जन्ममरणप्रवाहाविच्छेदादवश्यं पतितव्यमित्यर्थः १९ एवं ब्रह्मभवनोक्तानामावृत्तिं व्याख्याय य
त्प्राप्तानामावृत्तिर्नास्ति तदक्षरं परं ब्रह्मस्वरूपमुपक्रान्तं वस्तु लक्षयति परस्तस्मादिति त्रिभिः पर इति तस्मादव्यक्ता
त् भूतग्रामबीजभूतादविद्यालक्षणात् अनन्तान् अन्यो अव्यक्तं तद्विलक्षणो भावः सत्तानुषाद्वात परामिमतं सत्ता

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते रात्र्यागमे वशः पार्थ प्रभवत्यहरागमे १९
परस्तस्मात्तु भावोन्योव्यक्तोव्यक्तात्सनातनः यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति २०
अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिं यं प्राप्य न निवर्तन्ते तद्धाम परमं मम २१

सामान्यं धारयति तस्य सामान्यादिभ्यो व्यावृत्तत्वात् अस्य च सर्वत्रानुगतत्वात् सनातनो नित्यैकरूपः उपाधिमात्रहितं
व्याधिविक्रियाया नित्यं विक्रियते तद्वभात् अयं त्वनुपाधित्वान्नित्यैकरूप एव यो सः भावः सर्वेषु भूतेषु वियदादि
षु नश्यत्सु न विनश्यति केवलसत्तारूपत्वात् एतेन तस्य कालत्रयाबाध्यत्वं नित्यत्वं चोक्तं २० अव्यक्तो न व्यज्यत इति
दृश्यत्वं निरस्तं अक्षरोच्युते प्राप्नोतीति त्रिविधपरिच्छेदशून्यत्वमुक्तं तं भावं परमां गतिं ब्रह्मलोकान्तागतिस्त्वपरमा
२ कार्यत्वात् आहुः एषास्य परमा गतिरित्यादयः श्रुतयः यं भावं प्राप्य न निवर्तन्ते पुनः संसारे न पतन्ति तदिति विधे
यापेक्षया स्त्रीत्वं स एव मम विष्णोः परमं उपाधिभिरस्पृष्टं धाम प्रकाशः तद्विष्णोः परमं पदमिति श्रुतिप्रसिद्धं

गी॰ टी॰ अ॰ ८

म॰भा॰
भी॰ ६४

एवं ज्ञेयं प्रत्यगभिन्नं ब्रह्मोक्त्वा जगत्कारणत्वेनोपासनीयमितोन्यदित्याह पुरुष इति तु शब्दः पूर्वैर्विलक्षणत्वद्योतनार्थः
हे पार्थ यया भक्त्या आराधनेनोपासनयेति यावत् कीदृश्या अनन्यया नान्यस्मिन्यस्यां सा तया उपास्योपासकभे
दमंतरेण अहंग्रहरूपयेत्यर्थः तया भक्त्या यो लभ्यः स परः पूर्वोक्तादव्याकृतादनुगतादक्षरादन्यः कारणत्वे
ति यावत् लभ्यत्वादेवास्यान्यत्वमपि न ह्यात्मा चेल्लभ्यश्चेति युज्यते अस्य कारणत्वमेवाह यस्येति यस्य पुरुषस्यांतः
स्थानि निर्वीजे दुम इव सर्वाणि वियदादीनि स्थावरजंगमानि च येन चेदं सर्वं ततं व्याप्तमुपादानत्वात् स भक्त्या लभ्य

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । यस्यांतःस्थानि भूतानि येन सर्वमिदं ततं २२
यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः । प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ २३
अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं । तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः २४

द्वितीयो जनना २२ पूर्वोक्तानामोंकारसगुणब्रह्मविदां क्रममुक्तिभाजां ब्रह्मप्रतिपत्तये उत्तमो मार्गो वक्तव्य इत्यत आह यत्रे
ति आवृत्तिमार्गोपन्यासोनावृत्तिमार्गस्तुत्यर्थः योगिन इति योगिनः कर्मिणश्चोपलक्ष्यंते तेषां यथायोग्यं मार्गद्वय
विनाभावोपि स्पष्टं २३ तत्रोपासकानां देवयानं पंथानमाह अग्निरिति अग्निर्ज्योतिरित्यर्चिरभिमानिनी देवता लक्ष्यते एवं अ
हरिति अहरभिमानिनी एवं शुक्लपक्षस्य षण्मासा संमितस्योत्तरायणस्य चाभिमानिन्यो देवता एव एतच्चान्यासाम
प्युपलक्षणं तत्र प्रयाता उत्क्रांताः ब्रह्मकार्यं ब्रह्म द्वारा परं गच्छंति ब्रह्मविदो ब्रह्मोपासका जनाः २४ ॥ ॥

श्रीव
६४

एतेन धूमो रात्रिरित्येषोऽपि धूमादिमार्गः कर्मिणामपक्वयोगिनां चउपचित फलस्य व्याख्यातः २५ उक्तौ मार्गावनुपसंह
रति शुक्लकृष्णे इति शुक्लाज्ञानहेतुत्वादर्चिरादिगतिः एकया अन्यया कृष्णया २६ एते सृती मार्गौ आदरेति फले जानन् योगी न
मुह्यति योगभ्रष्टो पतिरल्पपुण्यतेन स्वर्गयोगेन भवति कश्चन कोऽपि यस्मादेवं तस्मात्सर्वेष्वित्यादि स्पष्टं २७ पुनः
श्रद्धाभिवृद्धये योगं स्तौति वेदेष्विति वेदेषु सम्यगधीतेषु यज्ञेषु जपः सु च यः स च सम्यगनुष्ठितेषु दानेषु च सम्य

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनं तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते २५
शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते एकया यात्यनावृत्तिमन्यया वर्तते पुनः २६ नैते
सृती पार्थ जानन्योगी मुह्यति कश्चन तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन २७ वेदेषु य
ज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टं अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमु
पैति चाद्यं २८ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसं
वादे पुरुषोत्तयोगो नाम अष्टमोऽध्याय॥८॥

र्दत्तेषु यत्पुण्यं तत्फलं चेति पुण्यफलं सर्वेषु समुच्चितेषु यत्प्रदिष्टं शास्त्रेषु तत्सर्वं योगी अत्येति क्रामति वा कार्यब्र
ह्मलोकं प्राप्नोतीत्यत आह परं स्थानं निर्विशेषं ब्रह्म उपैति प्राप्नोति च क्रमेणेत्यर्थः आद्यं न तु केनचित्त्रभिहितं तदने
नाध्यायेन ध्येयस्तत्पदार्थो व्याख्यातः अग्रमेऽध्याये ज्ञेयं ब्रह्म व्याख्यातं २८ इति श्री भारतभावदीपे भीष्मपर्व
णि गीतार्थप्रकाशेऽष्टमोऽध्यायः ॥ ॥

पूर्वाध्याये किं तद्ब्रह्मेत्यादि सप्त प्रश्नान् अक्षरं ब्रह्म परममित्यादिना संक्षिप्य व्याख्याता तज्ज्ञानस्य पृथक् प्रयोजनाकां
क्षायां कर्मविदां अधिभौतिकं धूमादिमार्गप्राप्यत्वाख्यानमिति स्वरूपेण प्राप्यप्रापकादिविभागो दर्शितः तेन कर्माधि
भूते व्याख्याते तथा सूत्रान्तर्यामिणो स्वरूपासकस्य चिरादिमार्गेण क्रममुक्तिस्थानप्राप्तिरिति उक्तं तेन अधिदैवा
धियज्ञौ व्याख्यातौ ओं मित्येकाक्षरमित्यादिना अंतकाले कथं ज्ञेयो सीत्यस्योत्तरं व्याख्यातं तत् देवध्येयब्रह्मविद्या
सांगा निरूपिता परिशिष्टमाद्यं ज्ञेयब्रह्मविषयं प्रश्नद्वयं किं तद्ब्रह्म किमध्यात्ममिति तद्विवरणाय नवमो
अध्याय आरभ्यते तेन केवलं अर्चिरादिगतिप्रा — कालांतरे एव मुक्तिरस्ति किं त्विहैव सद्यो मुक्तिरस्तीति विशेष

श्रीभगवानुवाच इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसे ऽशु
भात् १

वक्तुं श्रीभगवानुवाच इदं तु ते इति इदं वक्ष्यमाणं तु पूर्वस्मात् ध्येयात् विलक्षणं ज्ञेयं ते तुभ्यं गुह्यतममिति गो
प्यं प्रवक्ष्यामि अनसूयवे असूया गुणेषु दोषाविष्करणं तद्रहिताय ज्ञानं ज्ञप्तिमात्रस्वरूपं ब्रह्म विज्ञानेन अनुभवे
न सहितं न तु केवलं परोक्षेण यत् ज्ञानं ज्ञात्वा साक्षात्कृत्य अशुभात् संसारात् मोक्ष्यसे अत्र यत् समाप्तमादौ ज्ञा
नं तेहे स विज्ञानमिदं वक्ष्याम्यशेषत इति प्रतिज्ञातं यस्य च विज्ञानाय शास्त्रोच्चं दुर्न्यायो न्यायोपपलेक्षणीभूतं
तगत्कारणं ब्रह्म तत्रैव निरूपितं यद्विज्ञाने ऽधिकारसंपत्त्यर्थं तस्य सगुणस्योपासनमुक्तं तादृशं सर्वशेषि
भूतं ब्रह्म वक्तव्यमिति तच्चैव प्रतिजानीते वचनमात्रेणैवापरोक्षं ज्ञानं जायत इति तत्रैवयुत्यादि तेन अ

ण्तदेवस्तौति राजविद्येति विद्यानां राजा इति राजविद्या अध्यात्मविद्या गुह्यानां राजा इति राजगुह्यं राजदंतादिषु परमितुपसर्जनत
स्य परनिपातः पवित्रं पावनं उत्तमं पूर्वापरदुरितनाशात्मकेश हेतुत्वात् प्रायश्चित्ताद्यपेक्षयाश्रेष्टं प्रत्यक्षं नित्यापरोक्षं
पत्तत्प्रत्यगात्मवस्तु तदेव प्राधान्येनावगम्यते नेनेति प्रत्यक्षावगमं प्रत्यक्षेण सुखादिवदवगमो यस्येति वा प्रसि
न्द्धे विज्ञानं सहितमिति विशेषणस्य श्लोकोत्तरस्य व्याख्यातत्वान्न तेन पौनरुक्त्यदोषः तर्हि अपूर्वत्वाभावान्निष्फलं।
स्यादत आह धर्म्यं पदहितं तथाहि सर्वेषामपि प्रत्यगात्माकारवृत्तौ संप्राप्यते तेनमेकक्रतुशतस्य चेतः सतस्या

राजविद्या राजगुह्यं पवित्रमिदमुत्तमं प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययं २
अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ३

उः

यत्फलं तदवाप्नोतीति तर्हि सौधर्म्यं स्यान्नेत्याह सुसुखं कर्तुमि[illegible]ति कर्तुं संपादयितुं आविष्कर्तुं ससुखं अ
नायासेन साध्यं अज्ञापनयमात्रसिद्धत्वात् तर्हि आसु विनाशि फलं चेन्न अव्ययं वस्तुमात्रविषयत्वात् अनंत
फलं न तु कर्मफलवन्नश्यति २ तर्हि कुत एतत् ज्ञानं सर्वे [illegible] संपादयंतीत्याह अश्रद्दधाना इति स्पष्टार्थः।
श्लोकः ३

एवंस्तुत्याभिमुखीकृत्यपदद्वयंतदाहमयेतिमयाइदंसर्वंजगततंव्याप्तंउपादानत्वात्कनकेनेवकुंडलादीनि
ननुप्रागेवैतदुक्तं अहंसर्वस्यजगतःप्रभवःप्रलयस्तथेतितथाचेराजविद्येत्यादिस्तुतिरस्यानेएवकृता
स्यात्तेवक्तव्यविशेषाभावादितिचेत्अत्रब्रूमः यथायदतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्र
यंत्यभिसंविशंतितद्विजिज्ञासस्वतद्ब्रह्मेतिज्ञेयस्यब्रह्मणोलक्षणंजगजन्मादिहेतुत्वमुक्तंतस्यानु

मयाततमिदंसर्वंजगदव्यक्तमूर्तिना॥
मत्स्थानिसर्वभूतानिनचाहंतेष्ववस्थिता ४

गमेआनंदादिशब्दशब्दितेषुविराडादिषुदर्शयतिआनंदाद्ध्येवखल्विमानिभूतानितायंतेप्राणाद्ध्येवेत्यादिनातस्यानि
र्णयवाक्यंतुआनंदाद्ध्येवखल्विमानिभूतानिजायंतइतिसैषाभार्गवीविद्येतितत्रैवविद्यापर्यवसा
नाभिधानात् एवमितरापिसप्तमेभूमिरापोनलोवायुरित्यादिनासर्वभूतात्मकस्यविराजोजगतन्मादिहेतुत्वं
प्रदर्शयन्नाहअहंसर्वस्यजगतःप्रभवःप्रलयस्तथेत्यनेनमायासबलेपितत्प्रदर्शयत्यथेदानींशुद्धेप्रत्यगात्मे

नैवं तद्दर्शयति स्थूलारुंधतीन्यायेन प्रतिपत्तिसौकर्यार्थमिति गम्यं राजविद्येत्यादिन्यस्तत्त्वेतं यथा कश्चिद्दुर्लक्ष्याम
रुंधतीं दिदर्शयिषुस्तत्समीपस्थां स्थूलां तारामरुंधतीति ग्राहयति प्रतिपादयति चानेनैव क्रमेण प्रतिपत्तिरेवमि
हापि कार्यकारणप्रतिपत्तिद्वारा अकार्यकारणस्य शुद्धस्य प्रतिपत्तिर्युक्ता अत एव भगवान्भाष्यकारो मया
ततमिदं सर्वमित्यत्र मया मम यः परो भावस्तेन ततं व्याप्तमिति व्याचख्यौ न त्वहं सर्वस्य जगतः प्रभव इत्यत्र म
मुयः परो भावः स सर्वस्य जगतः प्रभव इति स च भगवतः कारणात्मनः परो भावः परानंद एव तेनैव चेदं ततं
आनंदाद्ध्येवेत्युदाहृतं श्रुतेस्तस्यैव जगदुपादानत्वेन तद्दीपसत्तास्फूर्तिभ्यां जगतो व्याप्ततत्वात् अत एव अव्य
क्तमूर्तिनेति विशेषणं मायाशबलो हि कारणं बुद्धिग्राह्यत्वात्करणगोचरः शुद्धं हि बुद्धेः परत्वात् करणागो
चर इति किंभूते कारणे नानंदस्य परिणाम इत्यत आह मत्स्थानीति मयि प्रत्यगानंदे रज्जौ स्रक्सर्पदंडधाराद
यः सर्वभूतानि स्थितानि अतो मत्स्थानीत्युपचारादुच्यंते अधिष्ठानाध्यस्तयो वास्तव

संबंधायोगात् एतदेवाह न चाहं परमानंदस्तेषु भूते
षु वस्थितोस्मि घटादाविव मृत्तन्य अपरि
णामित्वादेव ४

एवमभ्युपगते आनंदस्य जगद्विवर्ताधिष्ठानत्वं तदपवदति न च मत्स्थानीति। अयं भावः अस्य द्वैतेंद्रजालस्य यदुपादानकारणं अ
ज्ञानं तदपाश्रितयत् ब्रह्म तत्कारणमुच्यत इति वार्तिकोक्तमज्ञानमेव जगतः कारणं तच्च तुर्य्यं अहं चासंगतः ततश्च तुच्छ
तरेण तत्कार्येण भूतसंघेन न मम मासंगस्य आधाराधेयभावसंबंधो अनिर्वचनीयोप्यस्ति आवृते हि रज्ज्वादिकमनिर्वचनी
येन सर्पादिना संबध्यते अहं तु सर्वदानावृत्तसाक्षिरूपत्वात् संबंधार्हः इति न च मत्स्थानि भूतानीत्युक्तमिति ननु साक्षी
णस्तव ब्रह्मण एवासत्वाच्चेति प्रतीत्यैव भूतसंबंधानुभवात्कथं न च मत्स्थानीत्युक्तिरित्याशंक्याह पश्य मे योगमैश्वर
मिति मिममभूतासहयोगं युक्तिं घटनां पश्य ईश्वरेण मायाविना निर्मितं गंधर्वनगरे लोव स्वतरी वेश्यतरावतस्य आ नि
त्मा प्रत्यगानंदः भूतभृन्न भूतस्थो न च कारोप्यर्थोन्यत्र कुमस्त्वबमिव गंधर्वनगरं भूदपि तत्स्थं न तस्य तदाकारेण प

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ५

रिणामासंभवात् एवंरूपोपि परानंदरूपो ममात्मा भूतभावनः भूतानां वृद्धिकर एतस्यैवानंदस्यान्यानि भूतानि मा
त्रामुपजीवंतीति को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनंदो न स्यादित्यादि श्रुतिभ्यः आकाशे अव्याकृताख्यस्याधिष्ठाने भूत
आनंदोनुस्यूतो न स्यात् तर्हि प्राणापानक्रियां कश्चिदपि न कुर्यात् कारणगतं जाड्यं कार्येपि स्यात् आकाशे आनंदानुवेधे
तु कारणस्य चेतनत्वात् कार्यमपि चेतनावत्स्यादिति श्रुत्यर्थः बृहदारण्यकेपि यदूर्ध्वं गार्गि दिवो यदवाक् पृथिव्या यदं
तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते आकाश एव तदोतं प्रोतं चेति मायाविनि सर्वस्योतत्वप्रोतत्वमुक्त्वा
कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेत्युत्तरं एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्यस्थूलादिलक्षणस्याक्षरस्या
काशाधारत्वमुक्तं तस्माद्युक्तमाकाशशरीरेण भगवता कारिणोपाधिनिकृष्टचिन्मात्राभिप्रायेण ममात्मा भूतभावन

श्लोकद्वयार्थेदृष्टांतमाह यथेतियथालोकेआकाशेस्थितोनित्यंसदावायुसर्वत्रपरिमाणतश्चमहानतथासर्वाणिभूतानि
सर्वगतेमयिअसंश्लेषेणैवस्थितानीत्येवमुपधारयेतिप्राचं किंतद्ब्रह्मेतिप्रश्नस्योत्तरमुक्तं अक्षरंपरंब्रह्मेति अक्षरसंज्ञः
शुद्धंत्वंपदार्थएवनिरुपाधिकंब्रह्मेत्युक्तं तत्रनिरुपाधिकेब्रह्मश्लोकद्वयेनव्याख्यातं इदानींतस्यात्तरात्मनंजीवेनाभे
दंसदृष्टांतपूर्वकमाह यथेतिवायुः सूत्रात्मा वायुर्वैगोतमतत्सूत्रमितिश्रुतेः सर्वत्रगइतिसमष्टिलिंगत्वात्तस्यस
र्वगत्वंमहानित्यवाद्यवायुव्यावृत्यर्थं सयथाआकाशस्थितः अव्याकृताकाशेस्वकारणेस्थितः नित्यमितिकालत्र
येपितस्याकाशसंबंधउक्तः सर्वाणिभूतानिउपाधिनिकृष्टत्वंपदार्थरूपाचेतनवर्गः बहुत्वंलोकाभिप्रायेणयथा

यथाकाशस्थितोनित्यंवायुःसर्वत्रगोमहान् तथासर्वाणिभूतानिमत्स्थानीत्युपधारय ६
सर्वभूतानिकौंतेयप्रकृतिंयांतिमामिकां कल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहं ७

कार्यंसर्वंउत्पत्तेःप्राक्नाशादूर्ध्वंमध्येचस्वकारणेणवाभेदेनतिष्ठति एवंसर्वोपिजीववर्गउपाधत्पत्तेःप्राक्तन्नाशादू
र्ध्वंमध्येवाघटाकाशोमहाकाशादिवपरस्माद्ब्रह्मणः कालत्रयेपिनातिरिच्यतइत्यर्थः एतेनजीवब्रह्माभेदकथनेन
स्वभावोध्यात्ममुच्यतइतिपदस्यागुक्तंब्रह्मैवजीवइतितद्विवृतं ६ नन्वेवंउपाधिरहितेस्वेवब्रह्मणिलयस्त्वेउपाधेःका
गतिरित्याशंक्याह सर्वेति सर्वाणिभूतानिस्थावरजंगमंअमराणिकानिकानिममभायायाविनःप्रकृतिंत्रिगुणात्मिकांअ
परांस्वसम्भूताख्यांमामिकांयांतिप्रविशंतिकदायांतिकल्पक्षयेपुनश्चतान्येवभूतानिप्रकृतौसुप्ताविवसंस्कारात्मना
स्थितानिप्रकृतौगतानिकल्पादौविसृजामिविविधरूपेणसृजाम्यहंकारणात्मामायावी ७ ॥ ॥ ॥

एतदेवाह प्रकृतिमिति स्वीयाम विद्याल्नक्षणां स्वां प्रकृतिं अवष्टभ्य आश्रित्य तां विना केवलस्य स्रष्टृत्वासंभवात् इमं भूत
ग्रामं पुनः पुनरिदं स्वजामि किंभूतं प्रकृतेर्वशात् स्वभाववशात् अवशं रागद्वेषाद्यधीनं ८ ननु विषमां सृष्टिं कुर्वतस्त
व वैषम्यनैर्घृण्ये स्यातामत आह न चेति तानि विषमसृष्टिरूपाणि कर्माणि न निबध्नंति तत्र हेतुः उदासीनिमिति यथा
पर्जन्यो न बीजविशेषु रागं केषुचिद्द्वेषं वा कृत्वा उदासीनः सन् वर्षाति एवं ईश्वरोपि पुण्यवत्सु रागं पापिषु द्वेषं वाकुर्व
न् जगज्जगत् सृजति तत्तदसाधारण कर्मबीजवशात्ते विभिन्नं फलं प्राप्नुवंतीति नेश्वरस्य वैषम्यादीत्यर्थः ९ ननु

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ८ न च मां तानि कर्मा
णि निबध्नंति धनंजय उदासीनवदासीनमसक्तं तेषु कर्मसु ९ मयाध्यक्षेण प्रकृतिः सूयते सच
राचरं हेतुनानेन कौंतेय जगद्विपरिवर्तते १० अवजानंति मां मूढा मानुषीं तनुमाश्रितं परं भा
वमजानंतो मम भूतमहेश्वरं ११

विसृजामि उदासीनमिति परस्परविरुद्धमुच्यते इत्याशंक्याह मयेति मया कूटस्थेन अध्यक्षेण अपस्कांतकल्पेन प्रवर्त
केन प्रकृतिः सचराचरं जगत्सूयते उत्पादयति अनेन अध्यक्षत्वेनैव हेतुना हे कौंतेय जगद्विपरिवर्तते जन्मादिवस्थासु
भ्रमति अपस्कांतवद्हि सुसीदीनस्य सृष्टिप्रवर्तकश्च भवामीति भावः तथा च मंत्रवर्णः एको देवः सर्वभूतेषु गू
ढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति एकस्य देव
स्य सर्वाध्यक्षत्वं साक्षित्वं च प्रतिपादयति १० एवं भूतं मां संतं मूढाः अवजानंति यतो मानुषीं तनुं आश्रि
त्य मनुष्यदेहेन व्यवहरंतं मम परं प्रकृष्टं भावं तत्वं ते अजानंतः भूतानां महेश्वरं मां अवजानंतीति संबंधः ११

मदवज्ञानात्ते मोघाशाः ॥ वयेक प्राशाप्राप्तिर्येषां ते मोघाशाः तथा मोघकर्माणः निस्फलं पेगाः मोघज्ञाना निष्फ
सः लज्ञाना यतो विचेतस निर्विवेकाः यतो राक्षसीमासुरीं च रजस्तमः प्रधानां मोहिनीं मोहिनीं मोहकरीं प्रकृतिं श्रिताः छिं
धि भिंधि पिब खाद परस्वमपहरेत्येवंशीला क्रूरकर्माणो भवंतीत्यर्थः तथा ये महात्मानः उपसद्दृढास्ते तु देव्योग्र
त्पंतं विलक्षणं मां भजंति यतो दैवीं प्रकृतिं सत्वप्रधानामाश्रितास्ततः अनन्यमनसः एकाग्रचेतसः किंगतानुगतिकत
या दंभेन वा भजंति न किं तर्हि मां भूतादिं सर्वभूतकारणमव्ययं मत्वा ज्ञात्वा भजंति १३ भजनस्वरूपमाह सततमि

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः राक्षसी मासुरींचैव प्रकृतिं मोहिनीं श्रिताः १२
महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं १३
सततं कीर्तयंतो मां यतंतश्च दृढव्रताः नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते १४
ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखं १५

तियतंतः इंद्रियोपसंहारं शमदमादिषु प्रयत्नमनाः दृढान्पाहिंसादीनि व्रतानि येषां ते दृढव्रताः नमस्यंतश्च मां
हृदयेशयं प्रतिमादिरूपं वा भक्त्या नित्ययुक्ता नित्यमवहिता संत उपासते १४ ज्ञानयज्ञेन निर्विकल्पसमाधि
नोपातंजल्या एकत्वेन अहमेव भगवान्वासुदेव औपनिषदाः पृथक्त्वेन अयमीश्वरो मम स्वामीति बुध्या प्रा
ऊ कृताः अन्ये पुनर्बुध्या बहुप्रकारं विश्वतोमुखं सर्वैः प्रकारैः यत्किंचित् दृष्टं तद्भगवत्स्वरूपमेव यच्छ्रुतं तन्ना
मेव यद्दत्तं भुक्तं वा तत्तदर्पितमेवेत्येवं विश्वतोमुखं यथा स्यात्तथा मां उपासते १५

भ.भा.
भा.टी.
६९

न

इदमेवोपासनं विवृणोति अहमिति क्रतुः संकल्पो देवताध्यानरूपः यज्ञः श्रौतः स्मार्तश्च यज्ञः देवतोद्देशेन द्रव्यत्या
गः स्वधा पितॄणामन्नं औषधं मनुष्याणामन्नं मंत्रो येन दीयते सः आज्यं हविः अग्निः हुतं प्रक्षेपक्रियाइदं सर्वं यस्मा
दहमेवातस्तेषां विश्वतोमुखं उपासनं युक्ततरमित्यर्थः १६ धाता कर्मफलानां कर्ता वेद्यं वेदितव्यं ब्रह्म पवित्रं
पावनं तपआदिकं १७ गतिर्मुक्तप्राप्यं स्थानं भर्ता विकर्मफलदानेन पोषकः प्रभुः अंतर्यामी साक्षी कृताकृतावेक्ष
कः निवसंत्यस्मिन्निति निवासः आश्रयो यजमानादिः शरणं रक्षकः सुहृत् उपकारं अनपेक्ष उपकर्ता प्रभवउ

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधं मंत्रोहमहमेवाज्यमहमग्निरहं हुतं १६ पिताहमस्य
जगतो माता धाता पितामहः वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च १७ गतिर्भर्ता प्रभुः सा
क्षी निवासः सरणं सुहृत् प्रभवः प्रलयः स्थानं निधानं बीजमव्ययं १८ तपाम्यहमहं व
र्षं निगृह्णाम्युत्सृजामि च अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन १९ ॥ ॥ ॥

त्पत्तिस्थानं प्रलयस्थानं स्थानं स्थितिस्थानं निधानं कर्मफलसमर्पणस्थानं कालांतरे फलप्रसवार्थं
बीजं प्ररोहकारणं प्ररोहधर्मिणां अव्ययं यावत्संसारभावित्वात् १८ अहं तपामि आदित्यो भूत्वा अहं
वर्षं वृष्टिः तां निगृह्णामि अष्टसु मासेषु केषुचिदिति अमृतं जीवनं मृत्युर्मरणं अमृतं देवानां वा सासा
धुश्च सत् असाधुश्च असत् सर्वं अहमेव अतस्तेषां विश्वतोमुखं मम भजनं कुर्वतां सर्वरूपेणाहं अनुभा
वं अनुग्रहं करोमीति भावः १९

शिव
६९

ये पुनर्युक्तेष्वन्यतमेवापि त्वां न भजंते ते केवलं कर्मठाः कां गतिं प्राप्नुवंतीति तत्राह त्रैविद्या इति तिस्रो ऋग्यजुःसा
मरूपाः विद्या येषां ते त्रिविद्यास्त एव त्रैविद्याः सोमपाः सोमपायिनो यज्ञैर्यागैर्मां दृष्ट्वा स्वर्गतिं फलं प्रार्थयंते दिव्या
न्प्राकृतान् संकल्पमात्रोपनतानदुःखासंभिन्नान् २० त्रयो वेदास्त्रयी तस्यामुक्तं धर्मं त्रयीधर्मं कामकामा विषयकामु
काः गतागतं लभंते तथा च श्रुतिः प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म एतच्छ्रेयो येभिनंदंति मू
ढा जरामृत्युं ते पुनरेवापि यंतीति अष्टादश षोडश ऋत्विजः यजमानः पत्नी चेति २१ एवं काम्यकर्मिणां गतिं फलं चो
क्त्वा ये जनंते मद्भक्तानामपि मद्भजनेनैव सर्वसिद्धिरित्याह अनन्या इति नास्ति अन्य उपास्यो येषां अहमेव भगवान्

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ते पुण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्यान्दि
विदेवभोगान् २० ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति एवं त्रयीधर्ममनुप्रपन्ना ग
तागतं कामकामा लभंते २१ अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं व
हाम्यहं येप्यन्यदेवता भक्ता यजंते श्रद्धयान्विताः तेपि मामेव कौंतेय यजंत्यविधिपूर्वकं २३

वासुदेव इति अभेदेन चिंतयंत इत्यर्थः ये जनाः पर्युपासते परितः साकल्येन कार्त्स्न्येनाद्वैतदृष्ट्येत्यर्थः उपासते ते
षां नित्याभियुक्तानां सततमभियोगिनां योगः अप्राप्तस्य अन्नादेर्योगभूमिकाया वा प्रापणं क्षेमस्तस्यैव प्राप्तस्य
संरक्षणं तत्तद्द्वयं अहमेव वहामि निर्वहामि तेन त्वाघर्यं वा योगभूमिषूर्ध्वोर्ध्वभूमिलाभार्थं वा चिंता न
कर्तव्येत्यर्थः अनन्यचेतसां तेषां मदभिन्नत्वात् सर्वं संपत्स्यतीति तात्पर्यं तथा चोक्तं ज्ञानी त्वात्मैव मे
मतमिति अविधिपूर्वकं विधिरभेदबुद्धिस्तद्राहित्यादविधिपूर्वकत्वं तदा यजनस्य २३ ॥ ॥

हीयतः सर्वयज्ञानामहमेव सर्वदेवतारूपेण भोक्ता प्रभुः फलदाता च एवं सन्ति ते मां प्रत्याभिन्नं तत्त्वेन याथार्थ्येन न
जानंति अतश्च्यवंति त्राननिष्ठा मलवंधात्संसारगर्ते पतंति २४ सर्वभंक्ता [illegible] भजनेप्राप्नुवंति [illegible] रूपसो
नियमित्याह यांतीति भूतार्थमित्या ये षां ते भूतेज्या २५ मद्भक्तिः सतीसुकेमाराः देवतांतरभक्तिस्तु बहुवित्त
व्ययायासमाध्येत्याशयेनाह पत्रमिति भक्तिरेव केवलं ममापेक्षिता नान्यादि इति भावः भक्त्युपहृतं भक्त्या स
मर्पितं २६ अतः सर्वं मदर्पणं कुर्वीत्याह यत्करोषि गमनादिकं तद्भगवत एव प्रदानादि [illegible] करोमीति

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते २४ यांति देवव्रता देवा
न्पितॄन्यांति पितृव्रताः भूतानि यांति भूतेज्या यांति मद्याजिनोपि मां २५ पत्रं पुष्पं फलं तोयं यो मे भ
क्त्या प्रयच्छति तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः २६ यत्करोषि यदश्नासि यज्जुहोषि ददासि
यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं २७ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः संन्यास
योगयुक्तात्मा विमुक्तो मामुपैष्यसि २८

यत्तात्पर्यमेव तन्मदर्पणं कार्यमिति एवं वचनादिष्वपि नामकीर्तनादि द्रष्टव्यमूह्यं २७ एवं कुर्वतः फलमा
ह शुभाशुभेति शुभाशुभफलैः इष्टानिष्टफलैः कर्मरूपैर्बंधनैः एवं कुर्वन् त्वं मोक्ष्यसे भगवदर्पण
बुद्ध्याप्यकिंचित्कर्म कुर्वतः कर्मलेपो नास्तीत्यर्थः अयमेवोक्तलक्षणः कर्मफलसंन्यासयोगरूपः
तत्र युक्तात्मा समाहितचित्तः सन् विमुक्तः कर्मबंधनैर्विमुक्तः सन् मां
सर्वेषां प्रत्यगात्मानं उपैष्यसि २८

यतोभक्तानेवानुगृह्णातिनेतरान्नित्यंतोरागद्वेषवान्भगवानित्यतआह समोहमिति यथाग्निरागादिस्वरूपोपिसमीप
स्थानामेवशीतंनाशयतिनदूरस्थानांनतद्वत्सर्वत्रसमोप्यहंशरणा[illegible]नांनामेववंधनाशयामिनोन्येषामित्य
र्थः अतोनममरागोद्वेषोवेतिभावः मयितेतेष्वहंवर्तेअ भक्तचित्तानारागाद्याक्रांतत्वेनतत्रममाविशेषतोभि
व्यक्तिर्नस्तीतिभावः भक्तेर्महात्म्यमाह अपिचेदितिअत्यंतपापिष्ठोपिनान्यदेवतांसनभजतेतथापि
सत्साधुरेवमंतव्योहियतःसम्यग्व्यवसितःसम्यग्वृतः ३ सम्यग्व्यवसितत्वादेवक्षिप्रंशीघ्रंधर्मात्माभवतिशांति

समोहंसर्वभूतेषुनमेद्वेष्योस्तिनप्रियः येभजंतितुमांभक्त्यामयितेतेषुचाप्यहं २९ अपिचेत्सुदु
राचारोभजतेमामनन्यभाक् साधुरेवसमंतव्यःसम्यग्व्यवसितोहिसः ३ क्षिप्रंभवतिधर्मात्मा
शश्वच्छांतिंनिगच्छति कौंतेयप्रतिजानीहिनमेभक्तःप्रणश्यति ३१ मांहिपार्थव्यपाश्रित्ययेपिस्युः
पापयोनयः स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगतिं ३२ किंपुनर्ब्राह्मणापुण्याभक्ताराज
र्षयस्तथा अनित्यमसुखंलोकमिमंप्राप्यभजस्वमां ३३

चशश्वत्तंनिगच्छतिप्राप्नोतिहेकौंतेयत्वमेवमदास्मयाप्रतिज्ञांकुरुमेममभगवतोहरेर्भक्तोननश्यतीति ३१ किं
वक्तव्याणिहेपार्थहिनिश्चितंमांव्यपाश्रित्ययेत्यंतपापयोनयःस्त्र्यादयस्तेपिपरांगतिंयांति ३२ ब्राह्मणादयःपुनः
पुण्याःमदाश्रयेणपरांगतिंयांतीत्यत्रकिंचित्रंअतस्त्वमिमंमर्त्यलोकंअनित्यमध्रुवंअसुखंसुखलेशही
नंप्राप्यमांपरमात्मानंभजस्वलोकांतरेभजनंनभविष्यतीत्यर्थः तथाचश्रुतिः इहचेदवेदीथसत्यमस्तिन
चेदवेदीन्महतीविनष्टिरिति ३३

भ.गी.
भा.दी.
७१

भजनप्रकारं दर्शयति मन्मना इति मय्येव मनो यस्य न पुत्रादौ स मन्मनाः ममैव भक्तो न राजादेर्धनाद्यर्थं स मद्भक्तः मद्याजी मदर्थमेव यजते न स्वर्गाद्यर्थं स मद्याजी नातृप्तो भव मामेव नमस्कुरु शरणत्वेन भजनत्वेन्या न एवमनेन प्रकारेण युक्तो योगं कृत्वा मामेवात्मानं सर्वान्तरं एष्यसि प्राप्स्यसि अभेदेन घटाकाश इव महाकाशं यततो मत्परायणः अहमेव सर्वोपाधिशून्य स्त्रिविधात्मा परः सर्वोत्कृष्टः अयनं प्राप्यं यस्य स मत्परायणः तथा च श्रुतिः यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति ३४ इति श्रीभारतभावदीपे भीष्मपर्वणि भगवद्गीतासु नवमोध्यायः ९ सप्तमेन तत्पदवाच्यार्थो निरूपितः तदुपासनाक्रममुक्तिरित्यष्टमे प्रोक्तं नवमे तत्पदलक्ष्यार्थस्य स्वरूपं तत्प्राप्त्यावेवविश्व

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ३४ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोध्यायः श्रीभगवानुवाच भूय एव महाबाहो शृणु मे परमं वचः यत्तेहं प्रीयमाणाय वक्ष्यामि हितकाम्यया १

तोमुखे सर्वत्र भगवद्भजनमुक्तं तच्च रागद्वेषकलुषितमनसामशक्यमिति मत्वा नो भगवान्तत्सिद्धये स्वविभूतीः केषुचिदेव पदार्थेषु भगवद्बुद्धिविधानार्था तावदुपदिशति दशमे तत्फलं भक्त विश्वतोमुखस्योपासनं तेन च विश्वरूपदर्शनमेकादशे पुनस्तत्पदलक्ष्याव्यक्तस्योपासनं तदुपासकलक्षणानि चोक्तान्युपासनाकाण्डं तत्र द्वादशे शोधनार्थं समापयिष्यति तत्र बाह्यसत्या स्वरूपमेव श्रीभगवानुवाच भूय एवेति हे महाबाहो भूयः प्रागुक्तमपि पुनर्मे परमं निरतिशयवस्तुनः प्रकाशकं वचः शृणु प्रीयमाणायेत्यत्र

वि

उक्तमपि त्वां पुनस्त्वत्स्वरूपस्याहं त्वां ब्रवीमीत्याह न मे इति प्रभवं प्रकृष्टं भावं ऐश्वर्यं वियदादिसृष्टिसामर्थ्यं न विदुः न जानन्ति
हेतुः अहमिति प्रपंभावो देहो मत्पन्नन रहि देवानां वृष्ट्यादि लाभः न चार्वाचीनेशाच वृष्ट्यादिभिः स्वोत्पत्तिप्राक्का
लीनमर्थं परिच्छेत्तुं शक्यत इति पदार्थः स्पष्टा २ कस्तर्हि त्वां वेत्तीत्यत आह य इति यः असंमूढः सन् मां वेत्ति स सर्व
प्र वपापैः प्रमुच्यत इति संबंधः अजमजं यो बुद्ध्यात्मनोरेकीभावेन प्रत्यो न्याध्यासलक्षणेन मूढः संमू
ढः तद्विपरीतोऽसंमूढः तत्वज्ञानेन बाधिताध्यासः स एवात्मवित्वात् इतरस्य जनममनुभवन् मां प्रत्यगात्मा

न मे विदुः सुरगणाः प्रभवं न महर्षयः अहमादिर्हि देवानां महर्षीणां च सर्वशः २ यो मामजम
नादिं च वेत्ति लोकमहेश्वरं असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ३ बुद्धिर्ज्ञानमसंमोहः
क्षमा सत्यं दमः शमः सुखं दुःखं भवोऽभावो भयं चाभयमेव च ४

नं लोकमहेश्वरं अनादिकारणं तत्त्वमस्यर्थं अत एव अजातं वेत्ति सः सर्वैः कृते क्रियमाणैर्वा पापैः प्रमुच्यते
मर्त्येषु मध्ये ३ मम महेश्वरत्वादेव मत्तो बुद्ध्यादयो भवन्तीत्याह बुद्धिरिति बुद्धिः अंतःकरणस्य सूक्ष्मार्था
वबोधने सामर्थ्यं ज्ञानं आत्मानात्मादिपदार्थाववोधः असंमोहः प्रत्युत्पन्नेषु बोधव्येषु अव्याकुलतया वि
वेकपूर्विका प्रतिः क्षमा आक्रुष्टस्य ताडितस्य वा अविकृतचित्तता सत्यं प्रमाणेनावगतस्यार्थस्य यथार्थ
त्वेन भाषणं दमो बाह्येंद्रियनियमः शमो मनोनिग्रहः सुखं आह्लादः दुःखं तापो भवः उत्पत्तिः भावः
सत्ता अभावस्तद्विपर्ययो भयं त्रासः अभयमेव च तद्विपरीतं ४

भ.गी.
१२३

अहिंसा प्राणिनामसंपीडा समता मित्रामित्रादौ समचित्तता तुष्टिः संतोषः लब्धे पर्याप्तबुद्धिः तप इंद्रियसंयमपूर्व
कं शरीरपीडनं दानं यथाशक्ति संविभागः यशो धर्मनिमित्ता कीर्तिः एते बुध्यादयो विंशतिर्भावा मत्त एव प्राणि
नां भवंति पृथग्विधाः प्रत्येकं नानाप्रकारा न तत उत्तमगुणलाभायाहमेव त्वया शरणीकरणीय इति भावः ५ एत
देव शिष्टाचारप्रदर्शनेन द्रढयति महर्षय इति सप्तभृग्वादयः चत्वारः सनकादयश्च पूर्वे प्रसिद्धा महर्षय इति य
सर्वत्र तथा मनवस्त्रयोदश प्रसिद्धास्ते सर्वे मानसः हिरण्यगर्भरूपस्य मम मनस एवोद्भूताः अयोनिजा जाता उ

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः भवंति भावा भूतानां मत्त एव पृथग्विधाः ५ महर्षयः
सप्त पूर्वे चत्वारो मनवस्तथा मद्भावा मानसा जाता येषां लोक इमाः प्रजा ६ एतां विभूतिं योगं च
मम यो वेत्ति तत्त्वतः सोऽविकंपेन योगेन युज्यते नात्र संशयः ७

प्रजाता इमा चतुर्विधा अयं लोकश्च तदाधारभूतः तदुभयं येषां पत्ये संबंधिषु संततिरित्यर्थः यद्यपि येषा
मिति षष्ठी पंचम्यर्थे येभ्य इमाः प्रजाश्चायं लोकश्च जात इत्यर्थः तेपि मद्भावा मध्ये भावा मनो येषां ते प्रसिद्ध
माहात्म्या नाप्येते तत्त्वमपि मामनुयाश्वयेति भावः ६ उपासनाविधिकारिणमाह एतामिति एतां च रूपमाणां
विभूतिं योगं च विश्वतो मुखं भगवति मनःसमाधानं यस्तत्त्वतो वेत्ति सम्यगनुष्ठानं तु च समर्थो भवा
ति सः अविकंपेन षष्ठाध्यायोक्तेन भगवद्विषयेन ध्यानेन युज्यते तत्र कृत्यकृत्यो भवति नात्र संशय इति प्रवृत्तितिरा
पोषपरागुच्यते भगवद्वचसि संशयासंभवात् ७

श्रीव
१२

उपासनास्वरूपमाह द्वाभ्यां अहमिति बुधाः मां प्रत्यगात्मानं इति भजंते इति अयं अहमेव सर्वस्य जगतः प्रभव उत्पत्ति
मत्तः मदनुग्रहं प्राप्यैव सर्वं बुध्यादिकं स्वस्वकार्याय प्रवर्तते अहमेव जगतः कर्ता नियामी इति वा अहंग्रहेण आत्मानं
उपासीत इति भावः भावसमन्विता भावनायुक्ताः एतश्चोत्तरार्थः ८ एवं ध्याने भावनाप्रकारमुक्त्वा बुद्ध्यानमाह मच्चि
ता इति अहमेव चित्ते येषां ते मच्चिताः तथा अहमेव गतो विद्यमानो येषु ते मद्गताः तथाविधाः प्राणा इंद्रियाणि येषां

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इति मत्वा भजंते मां बुधा भावसमन्विताः ८ मच्चिता मद्ग
तप्राणा बोधयंतः परस्परं कथयंतश्च मां नित्यं तुष्यंति च रमंति च ९ तेषां सततयुक्ता
नां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयांति ते १०

ते मद्गतप्राणाः चित्तेनेंद्रियैर्वा गृह्यते तत्सर्वं प्रत्यगात्मा वासुदेव इति भावयंत इत्यर्थः इममेवार्थं परस्परं बोध
यंतः श्रुतियुक्तिप्रदर्शनेन समानानां समुदाये ज्ञापयंतः कथयंतश्च शिष्यान् प्रति तुष्यंति तेनैव ज्ञानेनैव नतु
मिष्टान्नादिना रमंति च तत्रैव न तु स्त्र्यादावित्यर्थः ९ उपासनायाः फलमाह तेषामिति सततयुक्तानां नित्यो
त्साहवतां प्रीतिः प्रेमा तत्पूर्वकं भजतां सेवमानानां तेभ्यो ददामि तं बुद्धियोगं ज्ञानरूपसमाधिं ज्ञानरूपामि
त्यर्थः तां ददामि येन यया निष्ठया ते मामुपायांति समुद्रमिव नद्यो अभेदेन प्रविशंति १०

किंचतेषांमक्तानांमुपर्यनुकंपार्थंनस्त्वप्रयोजनमस्ति धार्येराजवत्तबुध्विप्रत्तानेनअज्ञानजं अविवेकादुत्थितंमिथ्याप्रत्य
यलक्षणंमोहांधकारंतमोनाशकंसर्वानर्थनिधानंमूलाज्ञाननाशेननाशयामि आत्मभावस्थः आत्मनोभावोतःकर
णग्रहंतत्रस्थितेनज्ञानरूपेणभासताप्रबलेनअप्रधानभावः तत्वमसीतिवाक्यजाब्रह्माकारांतःकरणवृत्तिःस्वोत्पत्तयेश्र
वणमननध्यानानिशमादीनिकर्माणिचापेक्षतेयथादीपंस्वोत्पत्तयेतैलवर्त्त्यादीनिउत्पन्नातुतमोनाशेनस्वविषय
प्रकाशनार्थंसप्रत्ययावृत्तिलक्षणंप्रसंख्यानंचकर्मभिरूपकारंनापेक्षतेनहिज्ञानेनतदाकारप्रत्ययावृत्तिर्वाकर्मापेक्षा

तेषामेवानुकंपार्थमहमज्ञानजंतमः नाशयाम्यात्मभावस्थोज्ञानदीपेनभास्वता ११ अर्जुन
उवाच परंब्रह्मपरंधामपवित्रंपरमंभवान् पुरुषंशाश्वतंदिव्यमादिदेवमजंविभुं १२
आहुस्त्वामृषयःसर्वेदेवर्षिर्नारदस्तथा असितोदेवलोव्यासःस्वयंचैवब्रवीषिमे १३

वाज्ञानदार्ढ्यायापेक्षतेप्रमाणस्यात्रिमात्रसापेक्षत्वात्ज्ञानस्ययेतुउत्पन्नज्ञानानामपिप्रसंख्यानापेक्षांचवदं
तितेवलादेवमोक्षस्यकृतकतामनित्यतांचप्रार्थयंतइतिदिक् ११ एतांविभूतिंयोगंचेत्यादिविभूतिज्ञानस्यफलो
दर्केश्रुत्वातत्रोत्सुकः प्रथमंस्तुत्याभगवंतमाजीवयन्नर्जुनउवाचपरमितिपरंब्रह्मनत्वपरमुपास्यंतेदेवब्रह्म
त्वोवाधिनेदंयदिदमुपासतइतिश्रुतेः परंधामज्योतिर्नलपरंवृत्तिरूपज्ञानंतस्यधीर्हमीरित्यतत्सर्वंमतएवा
तिश्रुतेर्वृत्तिरूपत्वात्परमंपवित्रंनतुतीर्थादिवदपरंभवाननतेन्नमानमाहपुरुषमितिसार्द्धेनपुरुषंदेहांतस्थं
शाश्वतंनित्यंदिव्यंदिविहार्दाकाशेआविर्भूतंआदिदेवंसत्त्वात्मनोप्याद्यंअतएवअजंविभुंव्यापकंत्वापरम्
षयआहुरितिसंबंधः १३

शिव
९३

व्यक्तिंप्रभवं १४ हेभूतभावनभूतानांभावक १५ एवंस्तन्नामंतंनैवबुभुत्सितमाहवक्तुमिति १६ कथमितियोगिनए
म्वर्यंतद्वन्हेयोगिनत्वांकथंचमेचद्दृषाविद्यांनकथमितिविश्वरूपदर्शनस्यदौलभ्यंमन्वानः कतिपयेष्वेवस्थानेषु
भगवंतंचिंतयिष्यामिविश्वरूपदर्शनेऽप्रधिकारसिद्धार्थमितिआशयेनाहकेष्विति १७ योगंविश्वरूपंविभूतिं
ध्यानालंबनंप्रश्नतस्यमोक्षस्यसाधनं १८ प्रश्नोत्तरंश्रीभगवानुवाच हंततेहंतइदानीहमेत्पनममैवहियाः

सर्वमेतदृतंमन्येयन्मांवदसिकेशवः नहितेभगवन्व्यक्तिंविदुर्देवानदानवाः १४ स्वयमेवा
त्मनात्मानंवेत्थत्वंपुरुषोत्तम भूतभावनभूतेशदेवदेवजगत्पते १५ वक्तुमर्हस्यशेषेण
दिव्याह्यात्मविभूतयः याभिर्विभूतिभिर्लोकानिमांस्त्वंव्याप्यतिष्ठसि १६ कथंविद्यामहंयो
गिंस्त्वांसदापरिचिंतयन् केषुकेषुचभावेषुचिंत्योसिभगवन्मया १७ विस्तरेणात्मनोयो
गंविभूतिंचजनार्दन भूयःकथयतृप्तिर्हिशृण्वतोनास्तिमेमृतं १८ श्रीभगवानुवाच हंत
तेकथयिष्यामिदिव्याह्यात्मविभूतयः प्राधान्यतःकुरुश्रेष्ठनास्त्यंतोविस्तरस्यमे १९ ॥

पुराणांतेरेष्वपिश्रेष्टत्वेनप्रसिद्धाःविभूतयस्ताः कथयामीतियोजनाप्राधान्यतइतियोगोएकारित्वेनविभू
तयइहप्राधान्येनयोगस्तुसंक्षेपेणैवोच्यतेतस्याग्रेवक्ष्यमाणत्वादितिभावः अन्यथाविभूतिंचकथयेतिपृष्टे
विभूतिमात्रकथनेनानवहितत्वंभगवतःस्यात्नास्त्यंतोविस्तरस्यमेविभूतीनामितिविपरिणामेनानुषं
जनीयं १९

गी॰

भी॰टी॰

संक्षेपेण योगमाह अहमिति हे गुडाकेश हे जितनिद्र हे घनकेशेति वा अहं वासुदेव आत्मा अंतर्यामी व्यापकः अत एव
सर्वेषां भूतानामाशयः एकीभावस्थानं जलानामिव कासारो जलाशयस्तद्वदहं सर्वभूताशयः स्थितः अचलाशयः
खपरिच्छेदशरीरो वा विसर्गलोपो वक्तव्य इति वार्त्तिकेन पक्षे विसर्गलोपः भाष्ये तु सर्वेषां भूतानामाशये तद्हृदि स्थित इ-
ति व्याख्यातं सर्वभूताशयत्वादेव अहमादिः जन्मकारणं मध्यं स्थितिकारणं भूतानां अन्तः लयस्थानं सर्वमि-
दं ब्रह्मांडं मय्येवास्तीति भावः २० योगयुक्ता विभूतीराह आदित्यानामित्यादिना यावदध्यायसमाप्ति आदित्या

अहमात्मा गुडाकेश सर्वभूताशयस्थितः अहमादिश्च मध्यं च भूतानामन्त एव च २० आदित्यानाम-
हं विष्णुर्ज्योतिषां रविरंशुमान् मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी २१ वेदानां सामवेदो-
ऽस्मि देवानामस्मि वासवः इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना २२ रुद्राणां शंकरश्चास्मि
वित्तेशो यक्षरक्षसां वसूनां पावकश्चास्मि मेरुः शिखरिणामहं २३ ॥ ॥ ॥ ॥

नां द्वादशानां मध्ये विष्णुर्नाम आदित्यो हं वामनावतारो वा ज्योतिषां अग्न्यादीनां मध्ये रविः अंशुमान् अंशु-
मतां प्रतपनशीलो निधाय मध्याह्ने तीव्रतापवान् रविरहमेवेत्यर्थः मरुतां सप्तसप्तकानां मध्ये मरीचिरहं नक्ष-
त्राणां ताराणां अत्र प्रायेण निर्धारणे षष्ठी भूतानामस्मि चेतनेत्यादौ संबंधे षष्ठी शशी चंद्रमाः २१ सामवेदो गाने-
न रमणीयत्वात् अत्र मन इंद्रियांतरप्रवर्तकत्वात् चेतना धीवृत्तिश्च तदभिव्यक्तिहेतुत्वात् एते वेदादीनां मध्ये श्रे-
ष्ठाः २२ रुद्राणामेकादशानां वसूनामष्टानां शिखरालिनां विशेषाश्च तेषां मध्ये मेरुरहमाद्रिरहम २३

पुरोधसां पुरोहितानां बृहस्पतिं देवराजपुरोहितत्वात् सेनानीनां सेनापतीनां स्कंदः कार्तिकेयः सरसां जलाशया-
नां २४ एकं अक्षरं ओंकारः स्वजपयज्ञो हिंसाशून्यत्वात् स्थावराणां स्थितिमतां २५ २६ अमृतोद्भवं अ-
मृतमथनावसरोद्भवो यस्य तं २७ प्रजनो पुत्रजननयितृत्वात् कंदर्पः कामः न तु वृथा मैथुनरूपः नागानां

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिं सेनानीनामहं स्कंदः सरसामस्मि सागरः २४
महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं यज्ञानां जपयज्ञोस्मि स्थावराणां हिमालयः २५
अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः २६
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं ऐरावतं गजेंद्राणां नराणां च नराधिपं २७
आयुधानामहं वज्रं धेनूनामस्मि कामधुक् प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः २८
अनंतश्चास्मि नागानां वरुणो यादसामहं पितॄणामर्यमा चास्मि यमः संयमतामहं २९
प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहं मृगाणां च मृगेंद्रोहं वैनतेयश्च पक्षिणां ३०
पवनः पवतामस्मि रामः शस्त्रभृतामहं झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ३१

सर्पाणां एवांतरभेदानां यादसां जलेचराणां संनियमनकर्तॄणां २९ कलयतां गणनं कुर्वतां ३० पवतां पा-
वयितॄणां वेगवतां वा रामो दाशरथी रामः परशुरामादीनां परमेश्वराणामपि विभूतिमध्ये गणनं ध्यानार्थं झषा-
णां मत्स्यादीनां मकरो जातिभेदः स्रोतसां नदीनां ३१

कः इतीकादेशः यस्येति चेति लोपः तस्य मध्ये द्वंद्वो रहस्यार्थोऽहं द्वंद्वं रहस्येति सूत्रे द्वंद्वशब्दस्य रहस्यवाचित्वं शाब्दिक

सर्गाणां भौतिकानां भक्तानामादिरंतश्च इति प्रागेवोक्तत्वात् विद्यानां चतुःषष्टिसंख्यानां मध्ये अध्यात्मविद्या बंधच्छेदहेतु
त्वात् प्रवदतां प्रवक्तृद्वारेण वदनभेदाः वादजल्पवितंडा ३ इह गृह्यंते तेषां मध्ये वादस्तत्त्वनिर्णयार्थत्वादहं ३२
अक्षराणां मध्ये अकारः अकारो वै सर्वा वागिति श्रुतेः सामासिकस्य समाससमुदायस्य मध्ये अहं द्वंद्वोऽस्मि उ
भयपदार्थप्रधानत्वादिति प्राचः समासैकत्रासनं समासो विदुषां वा गुरुशिष्याणां वा मंत्रार्थकथार्थे वा एकत्रा
वस्थानं तत्र विदितमर्थजातं सामासिकं चातुर्थिकाद्यः कठस्येवा [redacted] प्रसिद्धं अक्षयः अक्षहीनः का य

सर्गाणामादिरंतश्च मध्यं चैवाहमर्जुन अध्यात्मविद्या विद्यानां वादः प्रवदतामहं ३२
अक्षराणामकारोऽस्मि द्वंद्वः सामासिकस्य च अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ३३
मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ३४
बृहत्साम तथा साम्नां गायत्री छंदसामहं मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ३५

लः त्रुट्यादिः परो वा ईश्वरः कालस्यापि कालोऽस्मि धाता कर्मफलप्रदः विश्वतोमुखः सर्वप्राणितस्मात्
प्यामीत्यर्थः ३३ सर्वहरः प्रलयकाले मृत्युरस्मि भविष्यतां भाविकल्याणानां उद्भवः ऐश्वर्योत्कर्षोऽहं कीर्त्या
दिसप्तकमहं यासामाश्रयमात्रेण मनुष्येषु कृतार्थता बुद्धिर्भवति ३४ बृहत्साम त्वामिद्धि हवामहे इत्यस्या
मृचि गीयमानं साम पृष्ठस्तोत्रे विनियुक्तं इंद्रदेवतात्वात् साम्नां मध्ये अहमस्मि छंदसां मध्ये गायत्री द्विज
त्वसंपादनात् सामान्यहरणाच्च श्रेष्ठोऽहं मासि कुसुमाकरो वसंतः ३५

व्यवसायोनिश्चयउद्यमोवा ३६ वृस्णीनांयादवानांउशनाःशुक्रः ३७ दमयतांराजादीनांदमनःसाधनंदंं
डोहमस्मिजिगीषतांजेतुमिछतांजयसाधनंनीतिरस्मिमौनंवाचोनिग्रहः ३८ सर्वभूतानांवीजमित्यने
नसर्वभूतानिमद्विभूतिरितिदर्शितंतदेवोपपादयतिनतदस्तीतिमयाविनाभूतंकिमपिनास्तिउपादे
यस्यउपादानमंतरेणस्थित्यसंभवात् ३९ नांतोस्तीतिउद्देशतःएकदेशेनविभूतेर्विस्तरोमयाप्रोक्तः

द्यूतंछलयतामस्मितेजस्तेजस्विनामहं जयोस्मिव्यवसायोस्मिसत्वंसत्ववतामहं ३६ वृष्णीनां
वासुदेवोस्मिपांडवानांधनंजयः मुनीनामप्यहंव्यासः कवीनामुशनाकविः ३७ दंडोदमयताम
स्मिनीतिरस्मिजिगीषतांमौनंचैवास्मिगुह्यानांज्ञानंज्ञानवतामहं ३८ यच्चापिसर्वभूतानांवी
जंतदहमर्जुन नतदस्तिविनायत्स्यान्मयाभूतंचराचरं ३९ नांतोस्तिममदिव्यानांविभूतीनां
परंतप एषतूद्देशतःप्रोक्तोविभूतेर्विस्तरोमया ४० यद्यद्विभूतिमत्सत्वंश्रीमदूर्जितमेववा
तत्तदेवावगछत्वंममतेजोंशसंभवं ४१

सर्वभूतानांवीजमहमित्युक्त्वासर्वस्यतादात्म्योक्तेःसर्वस्वविभूतिरित्युक्तमेवतथापितद्ग्रहणाशक्तंप्रतिप्राहयद्य
दितियद्यत्सत्वंप्राणिविभूतिमतऐश्वर्ययुक्तंश्रीमत्लक्ष्मीकीर्तिशोभावानतरयुक्तंऊर्जितंवलाद्यतिशयेनयुक्तंत
द्भगवतोंशयुक्तंतत्तत्सर्वममतेजसःचिछक्तेरंशासंभवंअंशात्सर्वंभूतंत्वमवगछजानीहिलोकेयद्य
तिरमणीयंतद्भगवतोरूपमितिध्यायेदित्यर्थः ४८

म॰भी॰

मी॰टी॰

उक्तमाधिकारणमुद्दिश्याह अथवेति मूढान्प्रतिनिदुक्तं त्वं तु एतावदेव विद्धि एकदेशेनाहमिदमवष्टभ्य व्याप्य स्थितो
स्मि यादोस्य भूतानीतिश्रुतेः तस्मात्परिछिन्नदर्शनं त्यक्त्वा सर्वत्र ब्रह्मबुद्धिमेव कुर्वित्याशयः इतिश्रीभारतभाव
दीपे भीष्मपर्वणि गीतार्थप्रकाशे दशमोध्यायः पूर्वस्मिन्नध्याये योगो विभूतिश्च व्याख्येयत्वेन प्रतिज्ञातो
एतां विभूतिं योगं च मम यो वेत्तीति आत्मनो योगं विभूतिं च जनार्दन भूयः कथयेत्येतेतरेण वक्ष्योत्तव्यत्वेन प्रष्टि
तौ तत्र अहमात्मा गुडाकेश सर्वभूताशयस्थित इति संक्षेपेण योगो भगवता सर्वभूताधारत्वलक्षण उक्तः

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ४२ इतिश्रीभग
वद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमो
ध्यायः १० अर्जुन उवाच मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं यत्त्वयोक्तं वचस्तेन मोहोयं वि
गतो मम १

प्राग्विभूतिकथनात् तदंते च विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति कृत्स्नेन धाम्नमिव मयेदं जगद्विष्ट
ब्धमिति सूपन्यासएव स्मारितः तदेव भगवतः सर्वभूताधारत्वं साक्षात्कर्तुकामोर्जुन उवाच मदनुग्रहायेति मयि
अनुग्रहो नुकंपा तदर्थं मदनुग्रहाय परमं सद्यः शोकमोहनिवर्तकत्वेनोत्कृष्टं गुह्यं गोप्यं अध्यात्मसंज्ञितं
आत्मानात्मविवेकार्थं शास्त्रं अध्यात्मं तत्संज्ञितं यत्त्वया वचः अशोच्यानन्वशोच इत्यादिना षष्ठाध्यायपर्यंतं त्वंप
दार्थः अछिप्रधानं नायं हंति न हन्यते इत्यात्मनो कर्तृत्वाभावप्रतिपादकं तेन मम मोहः अविवेकोयं विशेषेण

शिव

भवेतितथासप्तमोध्यायमारभ्यदशमपर्यंतंत्वयाभूतानांभ वाप्ययावपिउक्तौअहंसर्वस्यजगतोमतःसर्वंप्रवर्ततइ
तितावपिमयाविस्तरसःत्वत्तःश्रुतौहेकमलपत्राक्षअव्ययंमहात्म्यमपि नचमांतानिकर्माणिलिंपंतीतिविषमसृष्टि
षो . कर्तुरपिवैषम्यनैर्घृण्यदोषोनास्तिजनितकर्तृत्वस्यहंकारबंधोनास्तीत्येवमादिरूपंतत्पदार्थस्मशुद्धिप्रधानंश्रुतमित्यन्व
यः २ एवमितियत्त्वंविष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदितिआत्मानंजगदाधारमात्थवत्तदपि इत्थमे
वनममात्रासंभावनास्तिहेपरमेश्वरतेतवरूपंऐश्वरंईश्वरस्येदंविश्वात्मकंमायामयमित्यर्थः हेपुरुषोत्तम
क्षराक्षराभ्यांतिविश्वरूपंमायामयंवास्तवंतवरूपंमायातीतमित्यैश्वर्यमितिपुरुषोत्तमेतिचपदाभ्यांलभ्यतेत

भवाप्ययौहिभूतानांश्रुतौविस्तरशोमया त्वत्तःकमलपत्राक्षमाहात्म्यमपिचाव्ययं २
एवमेतद्यथात्थत्वमात्मानंपरमेश्वर द्रष्टुमिछामितेरूपमैश्वरंपुरुषोत्तम। ३ सत्य
सेयदितछक्यंमयाद्रष्टुमितिप्रभो योगेश्वरततोमेत्वंदर्शयात्मानमव्ययं ४

यावद्दत्यंतिमायाद्येषामयासृष्टायन्मांपश्यसिनारदसर्वभूतगुणैर्युक्तंनैवंमांज्ञातुमर्हसिइतिउक्तंवस्तुद्वैरूप
मभिप्रेत्यअव्यक्तोयमचिंत्योयमिति ३ मन्यसइतिहेयोगेश्वरयोगानांयोगिनांमीश्वरतद्रूपंयदिमयाद्रष्टुंशक्यमि
तिमन्यसेयदिमयितद्दर्शनाधिकारंपश्यसितर्हिदर्शयतत्रमेमद्यमव्ययंमायामयंआत्मानंदर्शयमायामयत्वादेवा
स्याव्ययत्वंमायायाहिसर्वंसर्वात्मकंसर्वदास्तीतिप्रसिद्धंयथोक्तंवसिष्टेनवर्तमानंतीतंचभविष्यत्स्यलमरव
पिमयाधरमदूरंचनिमेषःकल्पइत्यपिविदामनिस्थितानित्येपश्यमायाविजंभितंनहिमरुमरीचिसरसी
क्रमशःपुष्यतिअतोमायामयत्वादेवास्यऐश्वरस्यरूपस्याव्ययत्वं ४

गी. टी.
भी. टी.

एवंप्रार्थितः सभगवानुवाच पश्यमेति शतशोऽत्यादि नाऽनंतानीत्युक्तं नानावर्णानि नानाकृतीनिच ५ दिव्यानि तावद्दा
ह पश्यादित्यानिति अदृष्टपूर्वाणि आश्चर्याणि अद्भुतानिच चतुर्मुखपंचमुखषण्मुखादीनि ६ हेगुडाकेश जितनि
द्र मम देहे एकस्थं एकस्मिन्नेवावयवे नखाग्रमात्रे स्थितं कृत्स्नं वर्तमानं जगत्पश्य यच्चान्यत् अतीतमनागतं विप्र
कृष्टं वा वहितं स्थूलं सूक्ष्मं वा तत्सर्वमिह पश्य ७ यत्त्वं मन्यसे यदि तच्छक्यं मया द्रष्टुमिति तत्राह नतु शक्य

श्रीभगवानुवाच पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः नानाविधानि दिव्यानि ना
नावर्णाकृतीनिच पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा बहून्यदृष्टपूर्वाणि प
श्याश्चर्याणि भारत इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरं मम देहे गुडाकेश यच्चान्यद्द्रष्टु
मिच्छसि ७ नतु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा दिव्यं ददामि ते चक्षुः पश्य मे योगमै
श्वरं ८ संजय उवाच एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः दर्शयामास पार्थाय प

से शक्नोषि पद विकरणव्यत्यय आर्ष अनेन प्राकृतेन दिव्यमप्राकृतं ऐश्वरं ईश्वरसंबंधिनं योगं विश्वाश्रयत्वल
क्षणं सामर्थ्यं ८ एवमुक्त्वा भगवानर्जुनाय दिव्यं रूपं दर्शितवान् सच [illegible] दृष्ट्वाति विस्मयाविष्टो भगवंतं
विज्ञापितवानिति इमं वृत्तांतं एवमुक्त्वेत्यादिषड्भिः श्लोकैर्धृतराष्ट्रं प्रति संजय उवाच एवमुक्त्वेति ततः दिव्यचक्षुःप्र
दानानंतरं राजन् हे धृतराष्ट्र महांश्चासौ योगेश्वरश्चेति विग्रहः महतो योगस्य ईश्वरः परमं दिव्यं ऐश्वरं मायाविसंबंधि
न तु मायातीतं दर्शयास ९
मा

तदेवरूपंविशिनष्टिद्वाभ्यां अनेकेत्यादिना अनेकानि अनंतानिवक्त्राणिनयनानिचयस्मिन्तदनेकवक्त्रनयनं अनेकान्य
द्भुतानिदर्शनानियस्मिंस्तदनेकाद्भुतदर्शनं दिव्यानि अनेकानिच उद्यतानि आयुधानिचक्रादीनियस्मिन् विश्वतोमुख
मितिसर्वात्मकस्यएकत्वेनपृथक्त्वेनबहुधाविश्वतोमुखमितिविस्पष्टंपरामर्शः अनंतंसर्वतःपरिच्छेदरहितं ११ दिवि
अंतरिक्षेभादीप्तिःभासःदीप्तेःअत्यंतोपमेयंनिरूपमतामेवतस्यदीप्तेर्दर्शयति उभौयदिव्योम्निसूर्यकप्रवाहाविति
यावत् १२ इहैकस्थंजगत्कृत्स्नंपश्यपेतियत्प्राकभगवताउक्तंतदप्यपश्यदित्याहतत्रेतिअनेकधाप्रविभक्तमित्य
नेनवर्षाःखंचनतित्रिलोकीबीजैस्तत्राद्रूपेणतरुदृश्यतेतद्वत्मामभूदितिदर्शयितुंसविकाशोअनेकधाविभागयुक्तं

अनेकवक्त्रनयनमनेकाद्भुतदर्शनं अनेकदिव्याभरणंदिव्यानेकोद्यतायुधं १० दिव्यमाल्यांब
रधरंदिव्यगंधानुलेपनं सर्वाश्चर्यमयंदेवमनंतंविश्वतोमुखं ११ दिविसूर्यसहस्रस्यभ
वेद्युगपदुत्थिता यदिभाःसदृशीसास्याद्भासस्तस्यमहात्मनः १२ तत्रैकस्थंजगत्कृत्स्नंप्र
विभक्तमनेकधा अपश्यद्देवदेवस्यशरीरेपांडवस्तदा १३

अपश्यत्एकस्थंएकावयवस्थंअयमर्थः यदाभगवतश्चरणमुखंरूपंचिंतितेतेतनचेचेत्सिलब्धपदेसतिक्रमशास्तदीयाव
यवान्त्यक्त्वामुखोस्मितिवापदनखेवाचिंतांधियतेतत्रापिलब्धपदेतस्मिन्तदपित्यक्त्वाविश्वरूपमारोहतिदिव्यंचवपु
रपिएवंसर्वतामायादितंमनःएवमनोस्पदिव्यंचवस्तुः सतेनादिव्येनवस्तुष्वामनसेतान्कामान्यस्यपरंरमतद्यतिरिक्ते
कामान्विषयान्नयतानहार्दकाशाद्यसगुणब्रह्मगतानितिस्फुरितपदयोरर्थः यथोक्तंश्रीभागवतेतत्रलब्धपदंचित्तमा
कृष्येकत्रधारयेत्नान्यानिचिंतयेद्भूयः सुस्मितंभावयेत्मुखंतत्रलब्धपदंचित्तमाकृष्येकत्रव्योम्निधारयेततश्चत्यक्त्वा
मदारोहेनकिंचिदपिचिंतयेदितितत्रमूर्तीएकत्रआरोहेव्योम्निकारोमहारोहोनिर्विकल्पेब्रह्मणिएवारूढ़ इतिदिदमुक्तं

गी॰

हृष्टमारोमांचितगात्रः १४ देवान्ब्रह्मादिसादीन्भूतविशेषाः चतुर्विधाजरायुजादयः तेषांसंघान्समूहान्ब्रह्माणंचतुर्मु
खंईशंईशितारंकमलासनस्थमित्यनेनदूरदर्शनमुक्तं उरगान्पातालस्थान् अनंतादीन्दिव्यान् कैलाशादेस्थितान्
वासुकिप्रमुखान् एतेनअव्यवहितदर्शनमुक्तं १५ अनेकेअनंताबाहवः उदराणिवक्त्राणिचयस्मिन्तदनेकबाहूद
रवक्त्रनेत्रंसर्वतः चतुर्दिक्षु उपर्यधश्च अनंतमपरिछिन्नंरूपमस्यतंअनंतत्वमेवाहनांतमितिदीर्घरज्वादिव

ततः सविस्मयाविष्टोहृष्टरोमाधनंजयः प्रणम्यशिरसादेवं कृतांजलिरभाषत १४
अर्जुनउवाच पश्यामिदेवांस्तवदेवदेहे सर्वांस्तथाभूतविशेषसंघान् ब्रह्माणमीशं
कमलासनस्थमृषींश्चसर्वानुरगांश्चदिव्यान् १५ अनेकबाहूदरवक्त्रनेत्रंपश्या
मित्वांसर्वतोनंतरूपं नांतंनमध्यंनपुनस्तवादिं पश्यामिविश्वेश्वरविश्वरूपं १६ किरी
टिनंगदिनंचक्रिणंचतेजोराशिंसर्वतोदीप्तिमंतं पश्यामित्वांदुर्निरीक्ष्यंसमंताद्दीप्ता
नलार्कद्युतिमप्रमेयं १७

तदाद्यंतौदेशिकोनस्तस्तस्यर्थः १६ किरीटिगदाचक्रधारिणंदीप्तिमत्वादेवदुर्निरीक्ष्यंद्रष्टुमशक्यंसमं
तात् सर्वतोयेदीप्ताअनला अर्कश्चतद्वत्द्युतिर्यस्यतंसमंतात्दीप्तानलार्कद्युतिमित्येकंपदं अप्र श्रीव
तएवाप्रमेयंद्रष्टुमशक्यमपरिछेद्यं १७ ७८

म हिरण्यगर्भरूपत्वमुक्तं सनातनश्चिरंतनोऽस्मादिपुरुषो जीवात्मा सोऽपि त्वमेव मे मम मतः॥

त

एवं दयोगैश्वर्यदर्शनात्तमेवैवे —ति वदन्नप्रमेयत्वमेव विवृणोति त्वमेव परमं अक्षरं अस्थूलादिलक्षणं अक्षरं परमं ब्रह्म

ति सो परागुक्तं [redacted] स्फलं ब्रह्मेति देवत्वमेवासि एतेन सगुणरूपस्य निर्गुणस्थापकं अत एव वेदितव्यं वेदान्तप्रमाणेन ज्ञातुं यो

ग्यं न तूपासनीयं सगुणं ब्रह्मापि त्वमेवेत्याह त्वमसीति निधानं लयस्थानं एतेन कारणत्वमुक्तं अव्ययः अमृतत्वात् शा

श्वतस्य वैदिकस्य धर्मस्य गोप्तेत्यनेन कार्यं ब्रह्मेति ततः १८ देशतः कालतश्चादिमध्यान्तहीनत्वात् अनादिमध्यान्तं

दीप्तहुताशो वक्त्रेयस्येति भास्वरं दंतत्वचा ज्यतेस्वतेजसा चैतन्यज्योतिषा इदं विश्वं विश्वरूपं तपंतं प्रकाशयंतं अनादि

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानं त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरु

षो मतो मे १८ अनादिमध्यान्तमनंतवीर्यमनंतबाहुं शशिसूर्यनेत्रं पश्यामि त्वां दीप्तहुताशवक्त्रं

स्वतेजसा विश्वमिदं तपंतं १९ द्यावापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः

दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् २०

सर्वविशेषणविशिष्टं विश्वं तापकर्मीभूतं तापयंतं त्वां परज्योतिरूपं पश्यामि जानामि चित्रपटस्थानीयं विश्वरू

पं संस्कारात्मकधीवासनोपेतेयेन ज्योतिषा प्रकाशेन देवत्वमसीति जानामीति भावः १९ एवं स्वयं रूपदर्श

नेन कृतकृत्यीभूतत्वात्तदुपसंहारमिच्छन् स्तौति द्यावापृथिव्योरिति हे महात्मन् हि प्रत्यक्षं त्वया एकेन इदं

द्यावापृथिव्योरंतरं मध्यं सर्वाः दिशश्च व्याप्ताः अतस्तवेदं अद्भुतं उग्रं रूपं दृष्ट्वा लोकत्रयं प्रकर्षेण व्यथि

तं अतः परमिदमुपसंहरेत्यभिप्रायः

भ.गी.
टी.

अमीइतिहियतः अमीत्वा त्वां असुरसंघाः असुरांशाः दुर्योधनादयः त्वां पतंगाः पावकमिव अदृष्टप्रेरिता विशंतिम
न्यायेत्यर्थः केचिद्भीताः प्रांजलयो वद्धांजलयो गृणंति स्तुवंति २१ किंच येत्वदनुगृहीतास्त्वां रुद्रादयस्तेपि वि
स्मिताः संतः सर्वेत्वां वीक्षंतइत्याह रुद्रादित्याइति साध्या विश्वेचदेवगणाः विशेषेण रुद्रादित्यवत्तेपि उष्मपाः
पितरः गंधर्वाणां यक्षाणां असुराणां सिद्धानां जातिभेदानां संघाः समूहास्तेमे एते शेषं स्पष्टं २२ पुनर्लोकाना
मात्मनश्च व्यथामाह रूपमिति महत् आदिमध्यांतहीनं हे महावाहो तेतव करालं महत् रूपं दृष्ट्वा लोका व्यथिता

अमी हि त्वां सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति स्वस्तीत्युक्त्वा महर्षिसिद्धसंघास्तु
वंति त्वां स्तुतिभिः पुष्कलाभिः २१ रुद्रादित्या वसवो ये च साध्या विश्वेश्विनौ मरुतश्चोष्मपाश्च
गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे २२ रूपं महत्ते बहुवक्त्रनेत्रं महा
वाहो बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहं २३ नभःस्पृशं दीप्त
मनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि शमं च विष्णो

स्तथाहं च व्यथतइतियोजना २३ करालत्वप्रपंचनेन व्यथामेवाह नभइति नभस्पृशं व्योमव्यापयुगपलक्षणकः
तेननभस्पृशश्चाद्योदकारांतः दीप्तं अग्निवज्ज्वल्यमानं व्यात्ताननं विस्तृतमुखं दीप्तविशालनेत्रं रक्तनेत्रं मितस
र्वः हि प्रत्यक्षं त्वां त्वां दृष्ट्वा प्रव्यथितांतरात्मा प्रकर्षेण व्यथितचित्तः धृति धैर्यं न विंदामि न लभे शमं शांतिं
स्वास्थ्यं च न लभे इति श्लोको व्यापकमपानकं तवरूकांतदेशांत्पल्कास्वस्य मंत्रमशकांत्वद्व्यापकत्वादितिभावः

शिव
२४
७९

नि

कालानलः प्रलयाग्निः तत्तुल्यानि प्रसीद प्रसन्नः सुखदो भवेत्यर्थः २५ अमी त्वा विशंति त्यग्निमल्लोकादय आकृष्यतेते भीष्मा
दयः उत्तमारोः शिरोभिः अयंभावः धृतराष्ट्रस्य पुत्रा पापिष्टा भगवंतमेव त्रैलोक्यशरीरं विशंति पापानुरूपं तस्य पापुष्मा
याना स्थितान् नरकानेव गच्छंतीति तत्र त्वां विशंतीते वोक्तं भीष्मादयस्तु भक्ताः यतो ग्निर्वाहन एव दाश्च प्रसृतास्तद्भ
गवतो मुखं प्रविशंतीति वैषम्यगतिसूचनार्थं त्वां धृतराष्ट्रस्य पुत्रा विशंति भीष्मादयस्ते वक्त्राणि विशंतीति विभाग

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवा
स २५ अमी च त्वा धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदी
यैरपि योधमुख्यैः २६ वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि केचिद्विलग्ना दशनां
तरेषु संदृश्यंते चूर्णितैरुत्तमांगैः २७ यथा नदीनां बहवोंबुवेगाः समुद्रमेवाभिमुखा द्रवंति तथा त
वामी नरलोकवीरा विशंति वक्त्राण्यभिविज्वलंति २८ यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय स
मृद्धवेगाः तथैव नाशाय विशंति लोकास्तवापि वक्त्राणि समृद्धवेगाः २९

दर्शनं युक्तमिति २७ द्रुदमेव दृष्टांतमाह यथेति तव वक्त्राणि विशंतीति संबंधः अभिविज्वलंतिसर्वतः जाज्व
ल्यमानानि २८ बुद्धिपूर्वकमेव तेत्वद्वक्त्राणि प्रविशंतीति स दृष्टांतमाह यथा प्रदीप्तमिति २९

भ॰गी॰

भा॰टी॰ येचपतंनस्तांस्त्वंकरणेवानपिनवारिपितुमिच्छसिचेत्पादलेलिह्यसेभयोभूयोतिशयेनवास्वादयसिकीदृशास्त्वं
समंतात्ज्वलद्भिर्वदनैर्लोकान्समग्रान्ग्रसमानः एवंनिर्दहेणस्थापितवते ज्ञोनहीयतेप्रत्युतवर्द्धतेचेत्याहतेजो
भिरितिकेशवविष्णोव्यापनशीलशामग्रंजगत्तेजोभिरापूर्यतवउग्राः स्पष्टमशक्याःभासःदीप्तयः तपंतीतियोजना
पदार्थस्पष्टः ३० एवंदीप्त्याप्याकुलीभूतोर्जुनः भगवान्स्वरूपमितिविस्मृत्वाह आख्याहीतित्वमुग्ररूपः क्रूरकर्मा

लेलिह्यसेग्रसमानःसमंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः तेजोभिरापूर्यजगत्समग्रंभासस्तवो
ग्राःप्रतपंतिविष्णो ३० आख्याहिमेकोभवानुग्ररूपोनमोस्तुतेदेववरप्रसीद विज्ञातुमिच्छामिभवं
तमाद्यंनहिप्रजानामितवप्रवृत्तिं ३१ श्रीभगवानुवाच कालोस्मिलोकक्षयकृत्प्रवृद्धोलोकान्समाह
र्तुमिहप्रवृत्तः ऋतेपित्वांनभविष्यंतिसर्वेयेवस्थिताःप्रत्यनीकेषुयोधाः ३२ तस्मात्त्वमुत्तिष्ठयशोलभ
स्वजित्वाशत्रून्भुंक्ष्वराज्यंसमृद्धं मयैवैतेनिहताःपूर्वमेवनिमित्तमात्रंभवसव्यसाचिन् ३३ ॥

भगवान्कोसीत्याख्याहिहेप्रभुकोस्मीतिकथयप्रसीदप्रशांतोभवत्वामहंविज्ञातुमिच्छामियतस्तवप्रवृत्तिंचेष्टांनजाना
मिएवमर्जुनेनप्रार्थितःश्रीभगवानुवाचकालइतिद्वाभ्यांस्मिनसंग्रामेलोकान्समाहर्तुमत्तुंइहप्रवृत्तः प्रवृद्धोमहान्
लोकक्षयकृतकरोनामपरमेश्वरोस्मियस्मादेवंतस्मात्ऋतेपित्वांविनापिसर्वेनभविष्यंतिकेतेसर्वेयेप्रत्यनी-
केषुसैनिश्रात्रुसैन्येषुयोधाःशूराभीष्माद्रयोवस्थितास्ते ३२ तस्मादितियस्मात्त्वांविनाप्येतेमरिष्यंतितस्मा श्रीव
त्त्वंउत्तिष्ठयुद्धायशेषंस्पष्टं ३३ ॥ ८

माव्यथिष्ठा गते महांतः कथं हंतुं शक्या इत्याकुलीभावं माप इत्यर्थः जेतासि जेष्यसि सपत्नान् शत्रून् ३५ भगवता
एवमुक्ते सति पश्चात् किं वृत्तमित्यपेक्षायां संजय उवाच अत्र कृतांजलित्वादिना चिह्नेन भवद्वाक्योक्तैर्दीनं किरी ग
टिनं तरिष्यंतीति स्वचेतसि गद्गदं भयहर्षाभ्यावेशेन गद्गदेन कंठकंपनेन सह वर्तत इति सगद्गदं यथा भवति त
था हउक्त्वान् भीतभीतः सन्नाहेति संबंधः अत्र आहेति पदच्छेदे पुनरर्जुन उवाचेति पुनरुक्तं स्यात् अतः प्रणम्य
अर्जुन उवाचेत्येव संबंधः न तु प्रणम्य आहेति कातर्हि आहेतिक्रियायाः गतिर्नैयं क्रिया किंतु आहेति प्रसिद्ध

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् मया हतांस्त्वं जहि माव्यथिष्ठा युध्यस्व जेता
सि रणे सपत्नान् ३५ संजय उवाच एतच्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेपमानः किरीटी नम
स्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ३६ अर्जुन उवाच स्थाने हृषीकेश तव प्रकी
र्त्या जगत्प्रहृष्यत्यनुरज्यते च रक्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति च सिद्धसंघाः ३७

र्यमव्ययमित्यदोषः ३५ एकादशभिः श्लोकैरर्जुन उवाच स्थाने इति हे हृषीकेश सर्वेंद्रियप्रवर्तक अत्रेत यो ग्रि
न्न तव प्रकीर्त्या जगत्प्रहृष्यतीति यत्तत्स्थाने इत्यव्ययं युक्तमित्यर्थः यत्तव प्रकीर्त्या नामसंकीर्तनेन जगत् अनु
रज्यते तदपि स्थाने युक्तं यत्तव प्रकीर्त्या रक्षांसि भीतानि संति दिशो द्रवंति पलायंते तदपि स्थाने युक्तं यच्च
तां सर्वे सिद्धसंघाः कपिलादीनां समुदाया नमस्यंति तदपि स्थाने अयं श्लोकः रक्षोघ्नमंत्रशास्त्रे प्रसिद्धः
सचनाष्टादशसुदर्शनास्त्रे मंत्राभ्यासं ज्ञेय इति रहस्यं ३६

उक्तामां सिद्धसंघा नमस्यंते यत्तत्तेपि अहमेव ब्रह्मांडग्रतानि स्रष्टुमर्हतीत्यत आह कस्मादिति हे महात्मन् कस्माद्धेतो
स्ते त्वां न च नमेरन् अपि तु नमेरन्नेव तत्र हेतुः गरीयसे तेपि गुरुवस्त्वमपि गुरुस्तथापि त्वं प्रपितामहायितो गरीयसी सर्थः
कुतो भूमे वातिशय्यात्तेषां ममवशामानेपि सत्यसंकल्पादो सति अतश्चाह ब्रह्मणो हिरण्यगर्भस्यापि आदिकर्त्रे
पितामहायप्येवमहात्मतस्तस्य सृष्टिद्वारा ब्रह्माणं सृज्यतेइत्यर्थः जगद्व्यापारवर्जं प्रकरणाद्सं निहितत्वाच्चेतिन्याये
न नित्यसिद्धेश्वरस्य तवास्तु पातेसर्वैश्वर्यभातोभजंतिनत्तु त्वत्समास्ते अनंतरा वत्वंहे अनंत हे देवानां ईश जगन्निवा

कस्माच्च ते न नमेरन्महात्मन्गरीयसे ब्रह्मणोप्यादिकर्त्रे अनंत देवेश जगन्निवास त्वमक्षरं सद
सत्तत्परं यत् ३७ त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानं वेत्तासि वेद्यं च परं च धा
म त्वया ततं विश्वमनंतरूप ३८ वायुर्यमोग्निर्वरुणः शशांकः प्रजापतिस्त्वं प्रपितामहश्च न
मो नमस्तेस्तु सहस्रकृत्वः पुनश्च भूयोपि नमो नमस्ते ३९

स जगतामालयभूत त्वं अक्षरं च ब्रह्म कीदृशं अक्षरं यत्सदसत्तत्परं च सदसत्त च सदसती ताभ्यां परं च
सदसत परं कार्यकारणं तदुभयातीतं चेति त्रिविधमित्यर्थः ३७ पुनरपि स्तौति त्वमिति त्वं आदिदेवो जगतः
स्रष्टृत्वात् पुरुषः सर्वशरीरशायी शरीरी पुराणः शरीरनाशादिनाप्यविनश्यम् विश्वस्य त्वं परं निधानं नि
धीयतेस्मिन्निति लयस्थानं किं साक्ष्यात्माज्ञोऽप्रकृतिं वर्त्तयति वेत्ता ज्ञाता वेद्यं दृश्यं च त्वमेव परं च वेत्त वे
द्याभ्यामन्यत् धाम चैतन्यं त्वया विश्वं ततं व्याप्तं त्वसत्तास्फूर्तिभ्यां हे अनंतरूप त्रिविधपरिच्छेदशून्य
स्वरूप ३८ सर्वदेवतात्मत्वेन स्तौति वायुरिति प्रजापतिर्दक्षादिचतुर्मुखो वा प्रपितामहः चतुर्मुखे

हेअनंतवीर्ययतःसर्वंसमाप्नोषिएकोभवानाशमंतात्व्याप्नोषिततोहेतोःसर्वइतिनवनामपुरस्तात्कर्मणामादौपृष्ठत स्तेपाश्चात्यतोमध्येपितेनमोस्तु ४० एवंस्तुत्वा स्वापराधान्क्षमापयतिसखेति अयंममसखामित्रइतिमत्वाप्र भवस्योत्कर्षाविष्करणपूर्वकंयतमयाउक्तंहेकृष्णहेयादवहेसखेतिशब्देनपुनःसंधिरार्षःकुतउक्तंतवइ

नमःपुरस्तादथपृष्ठतस्तेनमोस्तुतेसर्वतएवसर्व अनंतवीर्यामितविक्रमस्त्वंसर्वंसमाप्नोषि ततोसिसर्वः ४० सखेतिमत्वाप्रसभंयदुक्तंहेकृष्णहेयादवहेसखेति अजानतामहि मानंतवेदंमयाप्रमादात्प्रणयेनवापि ४१ यच्चावहासार्थमसत्कृतोसिविहारशय्यासनभो जनेषु एकोथवाप्यच्युततत्समक्षंतत्क्षामयेत्वामहमप्रमेयं ४२ पितासिलोकस्यचराच रस्यत्वमस्यपूज्यश्चगुरुर्गरीयान् नत्वत्समोस्त्यभ्यधिकःकुतोन्योलोकत्रयेप्यप्रतिमप्रभा वः ४३

दंएवंविधंमहिमानंमहात्म्यंअजानताकदाचित्प्रमादात् चित्तविक्षेपात् कदाचित्प्रणयेनस्नेहेनच ४१ तथा यच्चअवहासार्थंविहारादिषुअसत्कृतोसिपरिभूतोसि एकोवासखीनांवियोगकालेवातत्समक्षंवाअस त्कृतोसितत्क्षामयेतत्त्वंअप्रमेयोचिंत्यस्वभावः करुणःपरःयतः शत्रुभ्योपिशिशुपालादिभ्यउत्तमां गतिंदत्तवानसीत्यर्थः ४२ अप्रमेयत्वमेवाहपितासीतियतस्त्वमस्माकंपितास्यअतोस्माभिःशिशु भिःकृतापराधास्त्वयाक्षंतव्याएवेतिभावः ४३ ॥

गी.प.

एतदेवाह तस्मादिति यस्मात्त्वं पिता गुरुश्च तस्मात्कायं शरीरं प्रणिधाय भूमौ धृत्वा दंडवत्प्रणम्य त्वां प्रसादये
ईड्यं स्तुत्यं स्वहं मन्यत ४४ एवं स्तुत्वा स्वेष्टं प्रार्थयते अदृष्टपूर्वमिति हे देव कदाचिदपि पूर्वं न दृष्टं तादृशं अदृ
ष्टपूर्वं तव रूपं दृष्ट्वा हृषित उत्फुल्लोस्मि तथा विकरालरूपदर्शनं तेन भयेन च मे मम मनः प्रव्यथितं अतस्तदेव
धारणाविषयभूतं रूपं मे मह्यं दर्शय ४५ तदेव रूपमाह किरीटिनमिति एतेनार्जुनस्य चक्रगदाकिरीटे

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यं पितेव पुत्रस्य सखेव सख्युः प्रियः प्रिया
यार्हसि देव सोढुं अदृष्टपूर्वं हृषितोस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे तदेव मे दर्शय देव रूपं
प्रसीद देवेश जगन्निवास ४५ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव तेनैव
रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ४६ श्रीभगवानुवाच मया प्रसन्नेन तवार्जुनेदं रूपं प
रं दर्शितमात्मयोगात् तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं ४७ ॥ ॥ ॥

येतं चतुर्भुजं भगवतो रूपं धारणाविषयदर्शितं हे सहस्रबाहो विश्वमूर्ते सहस्रबाहुत्वादिकं उपसंहृ
त्य तेनैव रूपेण भव प्रकटो भव ४६ एवमर्जुनेन प्रार्थितः सन् श्रीभगवानुवाच मयेति त्रिभिः हे अर्जु
न प्रसन्नेन मया तव तुभ्यं इदं परं रूपं दर्शितं आत्मयोगात् स्वसामर्थ्यात् करुणया न तु तव तद्दर्शने धिकारोस्ति
तथा च प्रागुक्तं कर्मण्येवाधिकारस्त इति तेजोमयं [illegible]ादिव्यं विश्वं विश्वात्मकं आद्यं अनादि अनंतं चेयद्रूपं ते दर्शितं श्रिव
४७

८२

यागैकैकारणं यत्तत्कर्मिणां दुःप्राप्यमित्याह न वेदेति वेदानां यज्ञानां च अध्ययनैरधिगमैः न च दानैः न च क्रिया
भिः स्मृत्युक्ताभिरग्निहोत्रादिभिर्वाप्यारामादिभिः तपोभिः कृच्छ्रचान्द्रायणादिभिर्नृलोके एवंरूपोऽहं द्रष्टुं न शक्यः रोरु
त्वाभावग्राह्यः न त्वदन्येन कुरुप्रवीर ४८ इदं मम दुर्लभदर्शनं रूपं दृष्ट्वा विचेष्टयसे तर्हि उपसंहरामीदमि
त्याशयेनाह मा ते इति मम इदं दृक् घोरं रूपं दृष्ट्वा ते तव व्यथा मा भूदिति त्रिदोषः विमूढभावो मे न भूयस्त्वं ते मा भू

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कु
रुप्रवीर ४८ मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदं व्यपेतभीः प्रीतमनाः पुनस्त्वं त
देव मे रूपमिदं प्रपश्य ४९ संजय उवाच इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः आश्वा
श्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ५० अर्जुन उवाच दृष्ट्वेदं मानुषं रूपं तव
सौम्यं जनार्दन इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ५१

त्वं व्यपेतभीः निर्भयः प्रीतमनाश्च पुनस्त्वं भूत्वा तदेव यत्त्वया द्रष्टुं प्रार्थितं मे मम मे इदं प्रपश्य ४९ संजय उवाच इ
ति इति वासुदेवोऽर्जुनं प्रति इति उक्त्वा किरीटकुण्डलधारी तथा पूर्वमासीत् तथा स्वकं मानुषरूपं भूयः पुनः दर्शयामास
यदर्जुनेन प्रार्थितं च चतुर्भुजं हारणं विश्वरूपं तदपि तिरोधदेश्वर्यः तथा महात्मा व्यापकोऽपि सन् सौम्यवपुरनु
रूपदेहो भूत्वा [illegible] भीतं एनं आश्वासयामास च ५० ततो निर्भयः सन्नर्जुन उवाच दृष्ट्वेति सचेताः अव्याकु
लः प्रकृतिं गतः स्वास्थ्यं प्राप्तः संवृत्तो जातोऽस्मि ५१

मा॰भा॰
भी॰टी॰

अस्यविश्वरूपदर्शनस्यदौर्लभ्यंदर्शयन्श्रीभगवानुवाचसुदर्शमितिदर्शनकांक्षिणः दर्शनेकांक्षैतेएवनतुलभ्यते ५२ नाहमितिनवेदयज्ञाध्ययनैरित्यनेनोक्तएवार्थः पुनरुच्यते विश्वरूपदर्शनस्यातिदौर्लभ्यप्रख्यापनाय इतिस्पष्टार्थःश्लोकः ५३ कथंतर्हिद्रष्टुंशक्यःत्वमतआह भक्त्येतिभक्त्याश्चाराधनेनअनन्ययाअव्यभिचरितयाअखंडयेत्यर्थः अहमेवंविधोज्ञातुंशक्यःत्वंपदार्थशोधकशास्त्रतःद्रष्टुंध्यानतानत्वेनयाथात्म्येनप्रवेष्टुंशक्यः तत्वमसिवाक्यार्थजज्ञानेतः हेपरंअज्ञानशत्रुंतापयतीतिपरंतपः ५४ शास्त्रसर्वस्वंसंगृह्णातिमत्कर्मकृदि

श्रीभगवानुवाच सुदुर्दर्शमिदंरूपंदृष्टवानसियन्मम। देवाअप्यस्यरूपस्यानित्यंदर्शनकांक्षिणः ५२
नाहंवेदैर्नतपसानदानेननचेज्यया शक्यएवंविधोद्रष्टुंदृष्टवानसिमांयथा भक्त्यात्वनन्ययाशक्य
अहमेवंविधोर्जुन ज्ञातुंद्रष्टुंचतत्वेनप्रवेष्टुंचपरंतप। मत्कर्मकृन्मत्परमोमद्भक्तःसंगवर्जितः नि
र्वैरःसर्वभूतेषुयःसमामेतिपांडव ५५ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे।
श्रीकृष्णार्जुनसंवादेविश्वरूपदर्शननामएकादशोध्यायः ११

तिमदर्थमेवकर्माणिकरोतीतिमत्कर्मकृत्अहमेवपरमोनिष्कलःप्राप्योयस्येतिसमत्परः एतेनकृत्स्नःकर्मयोगोध्यानयोगश्चत्वंपदार्थशोधकउक्तः ममभक्तिआराधनकृदितिउपासनाकांडार्थसंग्रहः संगवर्जितइत्यनेनएकांतेभगवद्ध्याननिष्ठइत्युक्तं निर्वैरइतिविश्वंभगदात्मनापश्येदित्युक्तंअन्यथाभेदबुद्धवतोनिर्वैरत्वासंभवात् एवंभूतोयःसमांतत्पदलक्ष्यार्थभूतमखंडानंदैकघनंएतिप्राप्नोतिप्रत्यगभेदेनैकघनंएतिप्राप्नोतिप्रत्यगभेदेनहेपांडवविशुद्धवंशजत्वमेवेतनज्ञातुंशक्योसीतिभावः ५५ इतिनैलकंठीयेभारतभावदीपेभीष्मपर्वणि

प्र

सप्तसमाप्तेतावताग्रंथेन तत्पदवाच्यार्थोति रूपं तदिदानीं तत्पदार्थशोधनमुपासनाकांडं च समापयिष्यन् निरा
र्थतः प्राधान्येन तत्पदलक्ष्यार्थं तद्विदां लक्षणानि च प्रदर्शयितेभ्य आदितस्तु लौकिकबुद्ध्यनुसारेण तत्पदवाच्यस्ये
वोपासनादिकं प्रपंच[illegible]नेतेन पूर्वाध्याये मत्कर्मकृन्मत्परम इत्यादिना स्वभजनस्य उक्तं तत्र मच्छ्रद्धार्थः । किं स
गुणमुत निर्गुणं ब्रह्म उभयत्रापि श्रेष्ठत्वस्य पूर्वं योगदर्शनात् संधिहानः पृच्छति एवमिति एवमित्यव्यवहि
तेन मत्कर्मकृदित्यादिना उक्तप्रकारं परामृशति अनेन प्रकारेण ये सततं युक्ता नित्यं समाहितचित्ताः भक्ताः स ।

अर्जुन उवाच एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः १ श्रीभ
वानुवाच मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते श्रद्धया परयोपेतास्ते मे युक्ततमा मताः २

गुणत्वेदिनस्त्वां पर्युपासते ये चापि अक्षरं अस्थूलादिलक्षणं बुद्ध्याद्यगोचरं उपासते तेषां मध्ये योगवित्तमाः के क
नि तर इत्यर्थः १ गुणस्य दुःप्रापत्वात्तथैव श्रेष्ठत्वं सूचयन् सगुणप्राप्तिरूपं च श्रावद्यतो दर्शयन् श्रीभगवानुवाच
मयीति मयि सगुणे ब्रह्मणि मनश्चावेश्य प्रवेश्य ये मां नित्ययुक्ताः सदोद्युक्ताः मां परमेश्वरमुपासते चिंतयं
ति श्रद्धया आस्तिक्यबुद्ध्या परया सात्त्विक्या अवश्यं परमात्मा यमाराधितं स्तारयिष्यतीत्येवं निश्चयरूप २
या श्रद्धया उपेतास्ते मे मम मत्तानीतास्तैवमेमतमितिस्तानिनमातमत्वेनैव पश्यते अमूर्खेष्वपिकारुणया
त्सद्रूपातावेतुः सर्वज्ञस्य युक्ततमा मताः २

एवं उपासकान्स्तुत्वा अव्यक्तविदां ज्ञानिनां दौर्लभ्यं श्लोकत्रयेणाह येत्विति तु शब्दः सगुणाद्वैलक्षण्यार्थः अक्षरं एतद्वै तत्
दक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमित्यादिश्रुत्या सर्वधर्मशून्यं निरूपितं अत एवानिर्देश्यं
निर्देष्टुं अशक्यं वाचा अव्यक्तं च वाचामगोचरत्वात् बुद्धेरप्यविषयं इत्यर्थः तथा च श्रुतिः यतो वाचो निवर्तंते अप्राप्य म
नसा सह इति ब्रह्मणो वाङ्मनसातीतत्वं दर्शयति पर्युपासते इति सर्वप्रकारेणोपासते उपासनमिह अनात्मनो
दर्शनमेव यथोक्तं अनात्मदर्शनेनैव परात्मानमुपास्महे इति ननु तर्ह्येवंविधस्य शून्यकल्पस्य सत्वे किं मानमत
आह सर्वत्रगमिति सत्तारूपेण स्फुरणरूपेण सर्वत्रगतं यत्सत्तया सर्वं सत्तावद्भवति कथं तस्यासत्वं ब्राच्यमि

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवं ३

ति भावः न चैवं तार्किकाभिमतं सत्ता सामान्यमुक्तं स्यात् तद्धि घटः सन्निति सर्वत्रानुगतं तत् दृश्यते इत्याशंक्याह अ
चिंत्यमिति सत्ता सामान्यं हि प्रत्यक्षं तदपि ब्रह्मसत्तानुवेधेनैवात्मीनं लभते न स्वतः सिद्धं सामान्यं तत् जातिः स
ती घटत्वं सदिति प्रत्ययात् सामान्यस्य सदिति प्रत्ययागोचरत्वे तु तस्याप्यसत्वापत्या पदार्थत्वमेव न स्यात्
तस्मात्सर्वाधिष्ठानभूतं ब्रह्म रूपादिहीनत्वाच्चिंतयितुमशक्यं दूरे तस्य स्वर्गगतत्वेन प्रत्यक्षगोचरत्व
मित्यर्थः ननु सत्सदिति प्रत्ययस्यान्यथाप्युपपत्तेः सत्तासामान्यबाधिनं प्रतीतेनाधिष्ठानभूतं ब्रह्मेन
साधयितुं शक्यमत आह कूटस्थमिति वस्तुतोसदपि सदिवावभासमानं कूटं यथा कूटकार्षापणं कूटतुल्ये
ति न क्षते कूटः अहंकारः प्रतीचि अभेदेन भासमानत्वं सति कदाचित्कत्वात् योयमभेदेन कदाचिद्भातिस

नत्र मिथ्याकल्पितः यथा रज्जुरगस्तथा चापमहंकरोमीति मिथ्यात्वात् कूटसंज्ञा तत्र तिष्ठति तद्भासकत्वेनेति
कूटस्थं चेतन्यं अहमनुभवो हि अहंभावो दृश्यते या भाति तद्भासकस्य चैतन्यं ततोन्यात् यथा घटभासको के
घटाद् अन्यस्तद्वत् एतेन नित्यापरोक्षत्वं ब्रह्मलक्षणः साधितं न त्वेवं अहमनुभवति येनात्मविषये तो हमर्थ एवात्मा
न ततोन्य इत्याशंक्याह अचलमिति अहमर्थो हि सुखी परिणामी अविभौ वपुशीलश्चात्मा तु अचलः
आत्मा तु न तथा तस्य तथात्वे निर्मोक्षापत्त्वे वंध्यो च तद् दुःखादि धर्मिणः आत्यंतिकदुःखनाशस्य मोक्षस्य
धर्मिणो नाशमंतरेणासंभवात् घटेया वद्रूपनाशाद् दर्शनात् आत्मनस्तिरोभावेच जगदांध्यप्रसज्जेत सुषुप्ता
वपि तत्रात्यसुखोपलंभेन साक्षित्वेनांतर्विंतस्य स्वरूप एवात्मास्तित्वं अन्यथा सुप्तोत्थितस्य सुखमहमस्वाप्स
मिति परामर्शायोगात् ननु सुषुप्तौ सन्नपि आत्मा न प्रकाशते तत्प्रकाशकस्य मनः संयोगस्याभाव
त् कर्त्तौ व्याप्रियमाणे हि करणे क्रियां साधयति न च सुषुप्तौ करणव्यापारोस्ति तस्मान्न्यस्तत्वात्स्य तत्
स्वेवात्मा सुप्तौ ज्ञानादिगुणहीनो प्रकाशमानोस्ति वेत्याशंक्याह ध्रुवं क्रियां साधयति न तु आत्मा किं
सत्तामात्रेणायस्कांतवत्करणानि प्रवर्त्तयति उक्तव्यापाराविष्टः नाद्यः कूटस्थ इत्येतेः त्वन्मते च
आत्मनः कर्तृत्वासिद्धिः नांत्यः अनित्यत्वात्पत्तेः व्यापारो हि स्पंदः अन्यच परिच्छि
न्नस्यैव वपुस्तेन विभो विभुत्वहानेः चाणुत्वानभ्युपगमात् मध्यमपरि
माणत्वे घटादिवदनित्यतापत्तिः तस्माद् ध्रुवं अच्युत स्वभा
वमक्षरमित्यर्थः ३

एवंविधमक्षरं कथमुपासनीयमित्याह संनियम्येति सर्वत्र काले सर्वदा एतेन ध्यानस्य नैरंतर्यमुक्तं इंद्रियग्रामं स
मनस्कानिंद्रियाणि संयम्य एकीभावेनात्मनि वशी कृत्वा स्वकारणे प्रविलाप्येत्पर्यः समाधावाचलस्य हीनां वुद्धि
र्येषां ते समवुद्धयो ये भवंति ते पि मामेव निर्विकल्पं परं ब्रह्म परां काष्ठां प्राप्नुवंति स्फूर्तिश्च यदा पंचावतिष्ठ
तिस्तानानि मनसा सह वुद्धिश्च न विचेष्टति तामाहुः परमां गतिमिति सर्वभूतहिते रता इत्यनेन सर्वभूता
भयदानेन संन्यासो विधानांगमिति विधीयते ४ अस्या गते दुःप्रापत्वमाह क्लेश इति यद्यपि सगुणविद्यामधि
कः क्लेशोस्त्येव तथा[illegible]पि ते सालंवना ध्यायंति सोपानारोहक्रमेण परां काष्ठां प्रविशंति येषां तु निरालंवन ध्यानं त्था
का संनियम्येंद्रियग्रामं सर्वत्र समवुद्धयः ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ४ क्लेशोधिकतर
स्तेषामव्यक्तासक्तचेतसां अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ५

शयुद्धसमं तेषां निर्विषये चेतः स्थिरीकरणेधिकतरः क्लेशोस्ति तत्र क्रमकध्यानप्रयोगः शुद्धे चिन्मात्रे विश्व
रूपमापपाध्यस्तत्तत्र च केवलमातिवाहिकं। कृत्स्नं जडमाधिभौतिकमध्यस्तं पश्चात्केवशिष्टेन आतिवाहि
क एवापंत्वादहंशोश्चितदेहकः आधिभौतिकयावुध्या गलितश्चिरभावनादिति प्रतिक्रम्य पाषाणोदीन वह
तिदृष्टदेशेनपत्यभिमानिनमित्यतिवाघं सर्वत्राप्रतिहततिगतिकंभूतस्ततस्मं तेन निर्ईत आतिवाहिकोपं कृ
त्स्नः प्रपंचं यः चित्तदेहकः चित्तमेव देहः स्वरूपमस्येति स्वप्नतुल्प एवसन्न चिरभावनातेवज्रपंजरवत्कौ
ठिन्येनायेति आधिभौतिकयास्फुरत्नभूतपाभावेन पागृहीत इति श्लोकार्थः एवं वत्तया तीव्राभिनिवेशेनानिरी
त्पमालोरजूरगः स्वयं शाम्यति तद्धिष्ठानभूतारजुश्चाविर्भवति तथा वस्तुतश्चियामपि साधवादि

मूर्त्तौजाउच्चमध्यस्थतामेवाभिनिवेशेनचिरकालंचर्मचक्षुषेवपश्यतस्तस्यांमूर्त्तौजाउंतिरोधीयतेचैतन्यमाविर्भवतिनिम्न
तएववालोदयः स्वाराध्यैःस्वाधर्स्वामिभिःस्तन्यायेनव्यवहरंतीतिसर्वत्रोपाख्यायतेएवंचेतस्यांमूर्त्तेरपितत्त्वंविश्वरू
पमेतिमेवात्यादरेणपश्यतस्तस्यातत्त्वंविश्वरूपमवगच्छतिपदपश्यपद्यशोदावासुदेवदेहेरावदेवविस्तितर्कजंप्रत्य
संप्रकृतोक्तंभगवतायोगप्रयोगभाष्यकारेणवादरायणेन ततोन्यतरंप्रत्यक्षमितितत्र्यश्चत्वान्नमानयोर्योगजा
मितिस्थूलालंवनः समाधिवितर्कः विश्वरूपस्यापिप्रस्मितामात्रमनवाप्तिप्यते प्रस्मितायामप्यशुद्धायांचित्तावि
ध्यस्तत्वात्तस्यामपिसमाहितेमनासिसहैवमनसास्मितातिरोधीयतेशुद्धाचितिरेवाविशिष्यतेइतिएवंव्यक्तास
क्तालोनारोहक्रमेणपरांकाष्टांप्राप्तिपद्यंतेयेतुअव्यक्तासक्ताः पद्भिवदकस्मादूर्ध्वपदमारुरुक्षंतीतितेलये
नविक्षेपेणचभ्रश्यध्यंतेलयमेवचकदाचित्समाधित्वेनाभ्युपगच्छंतीतितेषांपराभवसंभावनाया
स्तीतितदुक्तंक्लेशोधिकतरस्तेषामव्यक्तासक्तासक्तचेतसामितिहियस्माव्यक्तानिरालं
वनागतिः पदप्राप्तिहेतुर्वद्भिर्देहाभिमानिभिः दुःखंयथास्यात्तथाअवा
प्यतेतेनतस्मात्दुःखप्राप्येतिभावः ५

भा॰भा॰ टी॰ श्री॰

नन्वव्यक्तासक्तचेतसां क्लेशाधिक्येपि क्लेशांते सद्यः कैवल्यसिद्धिरस्तीति किं विलंबसाध्येन व्यक्तभावनेनेत्याशंक्या
हयेत्विति द्वाभ्यां सर्वाणि नित्यनैमित्तिकस्वाभावादीनि संन्यस्य समर्प्य मत्पराः अहमेव परा सर्वकर्मभिः प्राप्यो ये
षां ते मत्पराः मद्ध्यानपरा वा अनन्येन न अहमेव भगवान् वासुदेव इति परमेश्वरः अहंग्रहणलक्षणेन योगेन चेतःस
माधानेन मां ध्यायंत उपासते तेन तत्रैव ध्याने स्थैर्यं लभंते ६ तेषां प्राप्तिनां न चिरात् शीघ्रमेवाहं समुद्धरणकर्ता य
तस्ते मयि सगुणे विश्वरूपे आवेशितचेतसो भवंति अतः व्यक्तासक्ता अपि शीघ्रमेव पदमारोहमर्हंतीति न व्यक्तैः
येत्विति

संन्यस्यमत्प॰ १

ये तु सर्वाणि कर्माणि निवध्नंति धनंजय अनन्येनैव योगेन मां ध्यायंत उपासते ६ तेषा
महं समुद्धर्ता मृत्युसंसारसागरात् भवामि न चिरात्पार्थ मय्यावेशितचेतसां ७ मय्येव म
न आधत्स्व मयि बुद्धिं निवेशय निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ८ अथ चित्तं स
माधातुं न शक्नोषि मयि स्थिरं अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ९

निवेश्यामिति भावः ७ यस्मादेवं तस्मान्मय्येव विश्वरूपे ईश्वरे मनः संकल्पविकल्पात्मकं आधत्स्व स्था
पय मय्येवाध्यवसायं कुर्वतीं बुद्धिं निवेशय तत्फलं च निवसिष्यसि निश्चयेन महदात्मना मयि वा संकरिष्य
सि अतः शरीरपातादूर्ध्वं न संशयः ८ विश्वरूपधारणायामशक्तं प्रति प्राह अथेति मयि विश्वेश्वरे विश्वरू
पे अथ यदि चित्तं समाधातुं निवेशितुं अचलं धारयितुं न शक्नोषि तर्हि अभ्यासयोगेन चित्तस्यैकस्मिन्नालंब
[illegible]ंतरे वाध्येदाप्रतिष्ठाहवालंबनेन सर्वतः समाहृत्य पुनः पुनः स्थापनं अभ्यासस्तत्पूर्वको योगः समाधानलक्षणः ते

[illegible]

अभ्यासे इति। अभ्यासे पूर्वस्मिन्नोक्ते मत्कर्म श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं अर्चनं वंदनं दास्यं सख्यमा
त्मनिवेदनमिति नवविधभजनात्मकं भगवत्प्रीत्यर्थं कर्म मत्कर्म प्राहुः तं तदेव परमं आवश्यं यस्य तादृशो भव क
र्माणि श्रवणादीनि सिद्धिं सत्वशुद्धिं १० मद्योगं श्रवणादिनिष्ठां तर्हि पूर्वोक्तं श्रौतस्मार्तसर्वकर्मफलत्यागं कु
रु ११ अथ कर्मफलत्यागमेव श्रेयो हेतुत्वात्स्तौति श्रेयो हेतुत्वान् अभ्यासात् विविधासनात् ज्ञानं श्र
वणमननजं परोक्षं श्रेयः ज्ञानादपि ध्यानं विशेषेण श्रवणकीर्तनादि विशिष्यते ततोऽपि कर्मफलत्यागः

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव। मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि १०
अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ११
श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनं
तरं १२

श्रेयान् यस्माद् अनंतरं अव्यवधानेन शांतिर्मोक्षोऽस्ति चित्तशुद्ध्याद्युत्पादनद्वारेण अत्र चाभ्यं साधनं स्वक
रत्वात्सर्वं एवापि तत्पाप्रशस्तमित्युच्यते न चैव प्रकृत्यतिशायापायदोऽश्रवणमभ्यासात्परोक्षं ज्ञानं तद्वि
श्वयात्मकं श्रेयः ततोऽपि ज्ञातस्यार्थस्य साक्षात्कारार्थं ध्यानं श्रेयः ततोऽपि कर्मफलत्यागः योगी हि
सर्वकामतां प्रजहातीति यदा कामानिति प्रोक्तः अयमपि कर्मफलत्यागेन कामान् जहातीत्येतेन
समद्वतिस्तूयते १२

परमप्रकृतस्याक्षरोपासकं स्तौति तद्गुणकथनेन हि साधकानां तेषु गुणेषु आदरो भविष्यतीति बुध्या हं अद्वेष्टे
ति अद्वेष्टा चेदुदासीनः स्यात् तत्राह मैत्रो मित्रमेव मैत्रो न तूदासीनः कदाचिदपि नान्यास्मिन् शास्त्रे सति
कथं मैत्रत्वं स्यात् तत्राह करुण इति दुःखदातारमपि करुणया न बाधितुमिच्छः पितृवत्तमेव पश्यति एते
त न सर्वभूताभयप्रदः संन्यासी उक्तः अत एव देहे निर्मम इति विशेषणं युज्यते मुख्यमहंकारविदो लक्षणं निर
हंकार इति अहंकारो हि सर्वानर्थनिदानं स एव निर्गतो यस्मात् स निरहंकारः अत एव समदुःखसुखे
यस्मात् तत्र को मोहः कः शोक एकत्वमनुपश्यत इति श्रुतेः क्षमी क्षमावान् परिभवप्राप्तावपि स्वस्थचित्त अन्यो

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च निर्ममो निरहंकारः समदुःखसुखः क्षमी १३
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः १४

विघ्नमुत्तरेतानुधर्मान् अनुतिष्ठेदित्यर्थः १३ संतुष्टो यदृच्छालाभेनैव संजातालंप्रत्ययः सततं सर्वदा
योगी श्रवणादौ समाहितः चित्तः यतात्मा संयतशरीरेन्द्रियादिसंघातः दृढः स्थिरः आत्मतत्वविषये
निश्चयो यस्य सः दृढनिश्चयः असंभावनाशून्यः दृढं ब्रह्मवान् यमपि निर्गुणो ब्रह्मणि अर्पिते नि
हिते प्रविलापिते वा मनः संकल्पादिरूपं बुद्धिरध्यवसायस्ते अनेयेन सम्यगर्पितमनोबुद्धिरेतादृशो यो
मे मम भक्तः स मे मम प्रियः आत्मत्वादेव सपरप्रेमास्पदं ज्ञानीत्वात्मैव मे मतमिति उक्तं एतेन एकमस्यो
कौक्त्यायाः निरहंकारतायाः साधनान्युक्तानि १४

श्रीव
८)

स निरहंकारो द्विविधः समाप्त्योर्युक्तितः तपोर्लब्धलं क्रमेणोद्धत्याभ्यांप्रसमात्समाधिस्थत्वेन काष्ठसमाल्लोको
नोद्विजते न त्रस्यति लोकादपि यो मुनित्वान्नोद्विजते अत एव हर्षः इष्टलाभे मनस उत्फु[illegible]ल्लत्वं अमर्षः प्रसा
द्भुताभयं त्रासो भीष्टो दशा काउद्वेगस्तत्कृता व्याकुलता एतैर्निर्मितेस्तुल्यत्वादेव स्वच्छयमेव मुक्तस्तत्युक्तः ने
त्वेनानेह स्वयं त्यक्तुं इह ते साधनवान् ईदृशो यो मे भक्तः स च मे प्रियः १५ अस्पेक्ष्यस्वानावस्थामाह अनपेक्ष
इति सुखप्राप्तौ दुःखहानौ वा तत्साधनेवालिसा अन्यानपेक्षः शुचिः बाह्याभ्यंतरशौचवान् पुन्यापुण्या

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः १५ अ
नपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः १६ यो न हृ
ष्यति न द्वेष्टि न शोचति न कांक्षति शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः १७ समः शत्रौ
च मित्रे च तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः संगविवर्जितः १८ ॥ ॥

भ्यामलिप्रो वा दक्षः भगवद्भजनादौ अनलसः उदासीनो मानापमानादौ समवृत्तिः अतएव गतो व्यथा चेतः सपीडा
यस्य स गतव्यथः सर्वारंभपरित्यागी संन्यासिता देवयो मद्भक्तः स मे प्रियः १६ एतमेव श्लोकं व्याचष्टे त्रिभिः श्लोकैः
यो नेति इष्टलाभे सति न हृष्यति अनिष्टप्राप्तौ न द्वेष्टि इष्टवियोगे सति न शोचति इष्टसंयोगं अनिष्टपरिहारं वा न कां
क्षति अनपेक्षत्वात् शुभं कल्याणं पुण्यं च अशुभमंगलं पापं च ते उभे परित्युक्तं शीलं यस्य स शुभाशुभपरित्यागी
एतेन शुचित्वं व्याख्यातं भक्तिमानेन भक्तोसत तोयुक्त इति दक्ष इत्यर्थः १७ उदासीनत्वं व्याचष्टे सम
इति गतव्यथत्वमुपपादयति संगविवर्जित इति संगी हि व्यथते न तु तद्वर्जित इत्यर्थः १८ ॥

भ॰टी॰

सर्वारंभपरित्यागीनेत द्याचष्टेतुल्येतिशिष्टेषु विगीतोभस्यामिति स्यात्लोकेषुख्यातः स्यामितिवाऽहंभूयादितिवाको
मपमानः किंचिदारभ्यतेन तुल्यनिंदास्तुति स्तुल्यनिंदास्तु तित्वात्संतुष्टत्वाच्चमौनीसंन्यासीअप्रतएवानिकेतः
निकेतमस्य कुटीमपिचात्मार्थंनारभतेयतः स्थिरमतिः स्थितप्रज्ञत्वादुद्वेष्टासर्वभूतानामित्यादिनांग्रंथेनप्रति
पादितंधर्मजातंतदेवामृतस्यमोक्षस्यसाधनत्वादमृतंधर्मामृतंयथोक्तंउक्तोः नतुक्रमेणपर्युपासतेसाक
ल्येनानुतिष्टतिश्रद्दधानाश्रद्धायुक्तामत्परमाः अहमेवभगवान्वासुदेवोक्षराख्यः सर्वदेवविशेषराह

स्तुल्यनिंदास्तुतिर्मौनीसंतुष्टोयेनकेनचित अनिकेतः स्थिरमतिर्भक्तिमान्मेप्रियोनरः येत
धर्म्यामृतमिदंयथोक्तंपर्युपासते श्रद्दधानामत्परमाभक्तास्तेतीवमेप्रियः २० इतिश्रीभगवद्गीता
सूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेभक्तियोगोनामद्वादशोध्यायः १२

तःपरमानंदरूपःपरमःपार्यंतिकःप्राप्योयेषांतेमत्परामाभक्ताःमत्परमाश्रांतिदांतामत्सादिमंतोमद्भजनशीला
स्तेतीवमेममप्रियाज्ञानीतुभगवानात्मैवपरिशेषादतीवप्रियत्वंभक्तेष्वेवपर्यवसन्नंयोमुक्तानास्वाभवि
कोधर्मः समुपुत्ताएणयत्नतोनुष्टेयइत्यर्थः यथोक्तंवार्तिकेउत्पन्नात्मप्रबोधस्यद्यद्वेष्टत्वादयोगुणाःअय
त्नतोभवंत्येवनतुसाधनरूपिणइतिसम्यग्ज्ञउपासनप्रधानस्तत्परहार्थेविवेकः अतःपरंवाक्यार्थविचारो
जीवब्रह्माभेदप्रतिपादकोभविष्यति २० इतिश्रीभारतभावदीपेभीष्मपर्वणिभगवद्गीतार्थप्रकाशेद्वा
द्वादशोध्यायः १२ समाप्तश्चायमुपासनाकांडः

श्रीव
८८

प्रकृतिमिति १ ननु अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते नित्यः सर्वगतः स्थाणुरचलोयं सनातन इत्यादिना द्विती
येत्वंपदार्थः स्वरूपमुक्तं तथा द्वादशे येत्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रु
वमिति तत्पदार्थस्वरूपमुक्तं न चानयोर्भेदः संभवति लक्षणैक्यात् लक्षणं हि तयोरव्यक्तत्वमचिंतत्वमचलत्वं सर्व
गतत्वं चेत्यादि समानं न च द्वयोः सर्वगतत्वं संभवति अन्योन्यव्यावृत्तत्वेनासर्वगतत्वापत्तेः न चैतल्लक्षणभेदाभावेपि
प्रमाणाभावात् पितृन्देवात्मगता विशंति ये मुक्ता आत्मनां जीवेशयोश्चान्योन्यभेदमावहति स्वात्मानं चत्वाभयात्स्वपमे
वव्यावर्तयंतीति वाच्यं विशेषाणां सत्वे प्रमाणाभावात् ननु मा सन्तु विशेषा बंधमोक्षादिव्यवस्थान्यथानुपपत्त्या

अर्जुन उवाच प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव १ श्री
भगवानुवाच इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः २

तु आत्मनिर्विशेषेषु भेदः सिद्ध्यति यथोक्तं सांख्यवृद्धैः जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च पुरुषबहुत्वं सि
द्धं त्रैगुण्यविपर्ययाच्चैवेति जन्मादिव्यवस्थातः पुरुषबहुत्वस्य तद्दर्शनात् सात्विकराजसादिभेदाच्च पौरुषेका आत्मसर्वः
न ननु व्यापकात्मनादेः भगासांकर्यप्रसंगात् न ह्येकजांतःकरणो सुखादिरूपेण परिणमते न तत्प्रतिसंवेदीरा
व एव च तन्नियतिनियंतं शाकांस सर्वेषां सानिध्याविशेषेप्रतिसंवेदनात्स्यते रवर्जनीयत्वात् तं श्रोतस्येकापि सर्व
शष्कुलीरूपोपाधिभेदादेवांतः करणरूपोपाधिभेदात्तु एकस्याप्यात्मनाश व्यग्रह व्यवस्थावज्जन्मादि
व्यवस्थापि सेत्स्यतीति न पुरुषवत्कर्तव्यं तत अजीवीशयोर्लक्षणवाक्याभेदे सिद्धे किंनु नेरग्रंथेन तत्र

गी०भा०टी०

तिपादनार्थेनितिचेत् सत्यंपरत्वेस्यसर्वमात्मैवाभूत् तत्केनकंपश्येदितिश्रुतेर्वि
द्यावस्थायांश्रुतः प्रविष्टःशास्ताजनानांएषह्येवसाधुकर्मकारयतितंयमेभ्यो
लोकेभ्यउन्निनीषतइतिव्यवहारदशायांशास्यशासितृभावेनकर्तृकारयितृ
भावेनप्रसक्तस्यजीवेश्वरयोर्भेदस्यनिरासार्थत्वात् उत्तरग्रंथस्यारंभउप
पद्यतेतत्रादौउपदेशेनतत्पदार्थेनसहास्याभेदंवक्तुंयोग्यतायैवभास्यक
भावेनक्षेत्रात्क्षेत्रस्यकुंभाद्भास्वतइवविवेकंदर्शइतिइदमत्मत्वेनभासं
घटाद्यहंकारांतं शरीरंविशरणधर्मिहेकौंतेयक्षेत्रंक्षिणोत्यात्मानमवि
द्याइतिचविद्यतेइतिक्षेत्रंकर्मबीजप्ररोहस्थानंक्षेत्रशब्देनोच्यते
एतद्योवेत्तिमामयमितिचिदात्मानंक्षेत्रज्ञइतित्वर्थसंज्ञंप्राहुः
केप्राहुःतद्विदःक्षेत्रक्षेत्रज्ञविदः एतेनगच्छामि
पश्यामिभुंजेइतिप्रत्ययभवादेहेन्द्रियाहं
काराःप्रतीतितोभासककोटि
निविष्टाइवभांतितथापितेषां
तत्त्वज्ञोभासत्वलक्षणोमात्म
भावंसिद्धिः२

शिव

तमेवंलक्षणमुपाधितोनिकृष्टंक्षेत्रज्ञत्वात् क्षेत्रज्ञमपिमांपरमेश्वरमेवअभयमंतरेणसततोविद्धितत्वमस्यहंब्रह्मास्मिवृ
त्त्येवेदंसर्वखल्विदंब्रह्मेतिशास्त्रात् यस्मादुभयोत्माहंतस्मात् क्षेत्रक्षेत्रज्ञयोर्यत्ज्ञानंक्षेत्रस्यसर्वबाधावधिभूततत्वे
नचयत्ज्ञानंप्रपरोक्षेणतत्वनिश्चयस्तदेवज्ञानंममममक्षिषयंसम्यग्ज्ञानंएतयोरेवज्ञानंब्रह्मज्ञानमितिमतंनि
श्चितंब्रह्मविद्भिःनेहनानास्तिकिंचनेतिक्षेत्रस्यबाधात्नान्यतोस्तिद्रष्टेतिक्षेत्रज्ञातन्यस्यद्रष्टुर्निषिधाच्चयद्यपि
सर्वस्यब्रह्माभिन्नत्वात् यत्किंचिदपिज्ञानंतत्सर्वंब्रह्मविषयमेवभवतितथापिरज्जुसर्पात्मनापश्यतोरज्जुविष
म यंवासम्यक्ज्ञानंनास्तिनापितस्यज्ञानस्यरज्जुव्यतिरेकेणविषयांतरंवास्तवमस्तिकिंतुयदासर्पबाधेनरज्जुतत्वम

क्षेत्रज्ञंचापिमांविद्धिसर्वक्षेत्रेषुभारत क्षेत्रक्षेत्रज्ञयोर्ज्ञानंयत्तज्ज्ञानंमतंमम ३ तत्क्षेत्रंयच्च
यादृक्चयद्विकारियतश्चयत् सचयोयत्प्रभावश्चतत्समासेनमेशृणुः ४

धिगछतितदेवसर्पमिथ्यायमितिसम्यग्ज्ञानातिरज्जुंतद्विहायमुमर्पविदेवसम्यक्ज्ञानीत्यर्थः नहिभ्रम्य
तरस्यतत्वस्यज्ञातेकृतकृत्यनास्तिनहिसांख्यनिषेधात्मविदपिप्रपंचमबाधमानःअन्यवादीवप्रपंचंतुच्छत्वेन
पश्यन्नधिष्ठानंब्रह्मनास्तीतिब्रुवाणःकृतकृत्योभवतीतिवक्तुंयुक्तमतोद्वयोरपितत्वबोधकमेव ३ क्षेत्रक्षेत्रज्ञ
पदार्थौविशेषेणतुमारभतेतदितियच्चेदंक्षेत्रंनिर्दिष्टंतस्मादृक्यादृशंस्वकीयैर्धर्मैरस्तियद्विकारियेतस्यविकाराःयतश्चयत
यस्माद्विकाराद्यत्ज्ञायतइतिप्रपंचः तत्पूर्वोक्तंक्षेत्रंयद्यत्स्वरूपंयादृक्यत्प्रकारकंयद्विकारियेचतस्यविकाराःय
तश्चक्षेत्रावयवात्यज्जायतेततश्चतथासचक्षेत्रज्ञःयोयत्स्वरूपः यत्प्रभावश्चतदपिमत्तःशृणुः ४

भा॰
टी॰

वद्यमाणं ऐश्वर्यप्रमाणमाह ऋषिभिः रिति ऋषिभिर्वसिष्ठादिर्बहुधा गीतं योगवसिष्ठादौ प्रतिपादितं छंदोभिर्वेदैः मंत्रैर्वा
पृथक्प्रतिशाखं अनेकप्रकारं गीतं ब्रह्मसूत्रपदैः ब्रह्मणः सूचकानि पदानि समुच्चितवाक्यतामापन्नानि ब्रह्मसूत्रवाक्यैः ब्री
ह्मणवाक्यैरित्यर्थः तत्त्वमसीत्यादौः हेतुमद्भिः अन्नेन सोम्य शुंगेनापो मूलमन्विच्छ अद्भिः सोम्य शुंगेन तेजो मूलम
न्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः प्रजा इत्यादिना कार्यलिंगकानुमानानि ब्रह्माधिगमाय
प्रदर्श्यंतो हेतवः तद्वद्भिः निश्चितार्थैः क्षेत्रक्षेत्रज्ञयोः स्वरूपं तैः सर्वैर्यद्गीतं ततः स्मरणम् इति एवं वर्णसंबंधः ५ तच्च
पादद्वयोपाधिकारिचेतनं तः ध्याचष्टे महाभूतानीति चकारो भिन्नक्रमः बुद्धिश्चेति बुद्धिपदादुपरि द्रष्टव्यं यत्क्षेत्रं
शरीराख्यमुक्तं तत्त्रयुक्तमेकशारीरं रघमेवास्तीति श्रुतोः प्रयुक्तपदेन तस्यैव ग्रहणात् क्षेत्रस्वरूपमुक्ता प्रकारमा

ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः पृथक् ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ५
महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ६

ह महाभूतान्यहंकारो बुद्धिश्चेति सप्तप्रकारैरंकुरति महाभूतशब्देन पंचतन्मात्राणि अहंकारो बुद्धिरिति महत्तत्त्वमव्यक्तेस
मेवाहिरण्तानि एवकारणेन निभासंते तत्प्रकारं कारणं वमस्तगाणादितिरणतावत्प्रकारकमेवं क्षेत्रमित्युक्तं यदि कारीत्वस्यो
तरं इंद्रियाणीति दशैकं चेमे कादश पंचस्तानेंद्रियाणि श्रोत्रंत्वक्चक्षुरसनघ्राणानि पंचकर्मेंद्रियाणि वाक्पाणि
पादपायूपस्थाख्यानि मनश्चैते कादशेंद्रियाणां गोचराः विषयास्थूलाविपदादयः पंच अयं षोडशकोविको
रएव तान्येवसांख्यैःस्तु विंशतितत्त्वानि गुणंते एतावांस्माकं विशेषः तैः स्वतंत्रा सत्या च प्रकृतिरुच्यते अस्मा
भिर्मायारूपामिथ्याईश्वराधीनाचोच्यत इति तथा च श्रुतिमायांतु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति तस्मात्तसा

चेतनाश्च विकारा इत्युक्तं तदाह इच्छेति इच्छा सुखे तत्साधने जीवस्य स्पृहारूपा चित्तवृत्तिः इदं मे भूयादिति सा काम इ
ति राग इति चोच्यते द्वेषः दुःखे तत्साधने च इदं मे मा भूदिति स्पृहाविरोधिनी चेतोवृत्तिः सुखदुःखे प्रसिद्धे संघा
तः आत्मेंद्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिण इति श्रुतिः इंद्रियमनश्चिदात्मनामेकत्वोल्लीभावरूपो भोक्ता चेतना
या एवैका बुद्धिः सैव प्रबुद्धा सत्त्वमयत्वाद्विमलादर्शवच्चित्प्रतिबिंबग्राहिणी तप्तायःपिंडो वह्नित्वमिव स्वरूपमेव
चेतनात्वं प्राप्ता यतः स्थूलपिंडोपि चेतन एव प्रतीयते सैषं चेतना नाम धीसंज्ञिता सैव इच्छादिरूपा परिणतेतया

इच्छाद्वेषः सुखं दुःखं संघातश्चेतना धृतिः एतत्क्षेत्रं समासेन सविकारमुदाहृतं ७

श्रुतिः कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीरित्येतत्सर्वं मन एवेति कामादीनां मनोवृत्ति
त्वमाह एतत्क्षेत्रमव्यक्ताख्यं सविकारं विकारेण महदादिना तद्विकारेण चेच्छादिना सहितं उदाहृतं
उक्तं तन्विच्छाद्वेषो हि प्रत्ययविषयस्यात्मनो धर्मा इति काणादा वदंति सत्यमेव वदंति ते परं त्वस्माकं मुख्य
आत्मैव न भवति तस्य शुद्धरूपां चितिः अभेदेनाध्यस्तत्वादिति प्रागेवोक्तं अतः क्षेत्रांतर्गतस्याहमर्थस्य दृश्य
स्य तादृशा एव दृश्या इच्छाद्वेषो धर्माः सन्तु नाम किं विच्छिन्नं आत्मनो संगत्वमहंकारस्यानंतत्वं च अ
नुभवः सिद्धे श्रुती अपनुवदतः असंगो ह्ययं पुरुष इति अनंतेन हि प्रत्ययाइति ७

स. गी.
टी. भी

इदानीं ज्ञानसाधनान्यभिधत्ते अमानित्वमिति अमानित्वादयोपि चेतोवृत्तिविशेषा क्षेत्ररूपत्वात् क्षेत्रविकाराः एव.
संतः सत्वगुणकार्यत्वात् ज्ञानस्य साधनभूता अपि उपचारात् ज्ञानपदवाच्या भवंति एतद् ज्ञानमिति प्रोक्तमित्युपसं
हारात् तत्र विद्यमानैर्वा गुणैरात्मनः श्लाघित्वं मानः ख्यात्यर्थं स्वधर्मस्य प्रकटीकरणं दंभित्वं कायवाङ्मनो
भिः प्राणीनां पीडनं हिंसा तेषां वर्जितं अमानित्वं अदंभित्वं अहिंसा च रणादिकृतेपि तस्य निर्विकारत्वं क्षान्तिः आर्जवं अकौ
टिल्यं आचार्योपासनं स्पष्टं शौचं मृज्जलाभ्यां बाह्यं भावशुद्धिरांतरं स्थैर्यं मोक्षसाधने प्रवृत्तस्य व्यसनसद्भावेपि त

अमानित्वमदंभित्वमहिंसा क्षान्तिरार्जवं आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ८
इंद्रियार्थेषु वैराग्यमनहंकार एव च जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं ९ असक्ति
रनभिष्वंगः पुत्रदारगृहादिषु नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु १० मयि चा
नन्ययोगेन भक्तिरव्यभिचारिणी विविक्तदेशसेवित्वमरतिर्जनसंसदि ११

दार्ढ्यं आत्मविनिग्रहः देहेंद्रियादिप्रचारसंकोचः ८ इंद्रियार्थेषु दृष्टेषु आनुश्राविकेषु वा शब्दादिषु
वैराग्यं रागाभावः अनहंकारः दर्परहितत्वं अस्य योग्य व्यवच्छेदार्थ एवकारः समुच्चयार्थश्चकारः जन्मादिषु यक्नाय
मानं दुःखं दोषाश्च दैत्यादयस्तेषां परस्प वना अनुदर्शनं ९ असक्तिः रितिसक्तिः पुत्रादौ ममतामात्रं अनभिष्वंगः १
स्तेन सह तादात्म्याभिमानो यथा मे वाहमिति च पुत्रादेः सुखे अहमेव सुखी तस्य दुःखे अहमेव दुःखीति संगाभिष्वंगो टिं
नयोर्जनमित्यर्थः समचित्तत्वं हर्षविषादरहितत्वं कुतः इष्टानिष्टोपपत्तिषु इष्टप्राप्तौ हर्षाभावः अनिष्टप्राप्तौ विषादा ६ श्रीच

श्री

अध्यात्मशास्त्रेणेनेति ष्टावत्त्वं अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानस्य अर्थः प्रयोजनं अविद्यानिवृत्तिरानंदावाप्तिश्च तत् दर्शनं एतत् अमानित्वज्ञानार्थदर्शनांतं विंशतिकं ज्ञानं ज्ञानसाधनमिति प्रोक्तं वेदेषु अज्ञानं ज्ञानविरोधि ध्वस्तो मध्यापतत्तत् अमानित्वादिकमित्यर्थः तस्मात्तत्परित्यागेन अमानित्वादिकमेवोपादेयमिति भावः ॥१२॥ एवं ज्ञेय व्याख्यायस्वयोपत्वभावश्चेत्युक्तं ज्ञेयं ज्ञातस्वरूपं तस्य माधिकं प्रज्ञेयत्वं व्याचष्टे ज्ञेयमिति एतैर्ज्ञानसाधनैर्यत् ज्ञेयं तत्प्रवक्ष्यामि यत् ज्ञेयं ज्ञात्वा अमृतं मोक्षं अश्नुते प्राप्नोति तस्य स्वरूपं तावदाह अनादिमदिति आदिमत् अव्यक्तं तस्माद् व्यक्तमुत्पन्नमिति तदुत्पत्तिस्मरणात् तदन्यत् अनादिमत् अनादित्वेतावद्व्यक्तं प्रवाहनित्यत्व

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥१२॥
ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥१३॥

मवाक्षादीनामप्यस्तीति तेषामपि अनादितायां आप्तायां तत्प्रतिषेधार्थं अनादिमत् इत्युक्तं पद्या आदिमन्तं ततः परं ब्रह्म आदिमत्परे कार्यकारणे ताभ्यामन्यत् अनादिमत्परमिति अत एव परं निर्विशेषं न चापरं सविशेषं ब्रह्म त्रिविधपरिच्छेदशून्यं न सत् प्रधान्यपरमाण्वादिवत् सदिति नोच्यते नाप्यसत् शून्यवदसदपि नोच्यते तथा च नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यदिति श्रुत्युक्तं असच्छब्दितस्य शून्यस्य सच्छब्दितस्य प्रधानस्य रजःशब्दितानां परमाणूनां परव्योमशब्दितस्य आत्मसदभिन्नतस्या व्यक्तस्य मायाशः प्राक् निषेधं दर्शयति ॥१३॥

म.भा.
भी.टी.

धीवासनामयं समष्टिसूक्ष्मप्रपंचमवभासयति अस्य चोपाधिभूतं ब्रह्मांडगतमसकलप्राणि॥

एवं सच्चदित्येतत्तद्वेतज्ज्ञस्वरूपमपास्तसमस्तविशेषमुपपाद्य यत्प्रभावइति प्रतिज्ञातं तस्य प्रभावं वैश्वरूप्येण सं-
णिभ्यामुपपादयति सर्वत इति सर्वतः सर्वासु दिक्षु अग्रं तद्वीहि अस्य पाणयः पादाश्चास्य संतीति सर्वतःपाणिपादं दृशि-
अ वं च सर्वतः अक्षीणि शिरांसि मुखानि यस्य तत्सर्वतोक्षिशिरोमुखं सर्वतः श्रुतिमत् श्रवणवत् लोके सर्वं आवृ-
त्य व्याप्य तिष्ठति तथा स्वप्नदृक् तैजसो वासनामयेनैव पाणिपादादिना स्वाप्नं प्रपंचमनुभवति तस्य च जाग्रत्
काले उपाधिभूतं पिंडगतं बीजांकुरन्यायेनेन पारन्योन्यसद्भावोऽन्योन्यकारणत्वं चास्तीति एवं सकलप्रा-
णिधीवासनोपरक्तो ज्ञातो नोपाधिकश्चैतन्यं सकलप्राणिपाणिपादादिकमेव एवं च एवं वत् स्थूलसूक्ष्मयोरपि

सर्वतःपाणिपादं तत्सर्वतोक्षिशिरोमुखं सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति १४

समष्टिप्रपंचयोरन्योन्यं बीजांकुरन्यायेन कार्यकारणभावमन्योन्यात्मिन्भावं चाभिप्रेत्योक्तं भगवता भाष्यकारे-
ण सकलप्राणिकरणोपाधिद्वारेण ज्ञेयब्रह्मणोऽस्तित्वं प्रतिपाद्यत इति कार्यद्वारास्तित्वसिद्धेश्च कारणअवो-
प्यपोद्यतेऽनादिमत्परं ब्रह्म न सत्तन्नासदुच्यत इति ननु प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति न्याये-
न व्यर्थस्तर्हि कारणोपन्यास इति चेत् न तत्र विभुत्वाधिगमापयोगात् शाखाचंद्रन्यायेन हि सगुणं निर्गुणस्य
वस्तुनो ज्ञापकं यथोक्तं भाष्ये उपाधिकृतं मिथ्यारूपमप्यस्तित्वाधिगमाय ज्ञेयधर्मवत्परिकल्प्योच्यते स-
र्वतःपाणिपादमित्यादि तथा हि संप्रदायविदां वचनमध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यत इति १४

शिव
६२

रूपं विचित्रं यथा जलसूर्योऽध्यस्य स्वकंपतश्चाभासते न तु वस्तुतोऽध्यस्य कंपते वा तद्वत् आत्मा नोपास्य

ननु अपाहवनीयादिवल्लौकिकमपि ब्रह्म कार्यकारणप्रपंचविशिष्टं विचित्रमेव सर्वतः पाणिपादं तत् इत्या
दिना शास्त्रेण काम्येष तया समर्प्यते न च वाच्यं उपासनापरं शास्त्रं न ब्रह्मणो वैचित्र्यं प्रतिपादयितुमीष्टे इति देवता
धिकारेण न्यायेन देवताविग्रहादिवत् न हि चित्रस्यापि अर्थवादतया तात्पर्यविषयतया सिद्धेर्नाच देवताविग्रहादे
र्व्यावहारिकमेव सत्त्वं नापरमार्थिकं ब्रह्मज्ञानेन तस्य बाधात् इति वाच्यं सत्ताद्वैविध्यस्याप्रसिद्धेः तस्मात् सर्वतः
पाणिपादत्वादिकं ब्रह्मणो वास्तवमेवेति नापवादमर्हतीत्याशंक्याह सर्वेंद्रियेति सर्वाणि अंतराणि बाह्या
२ नि च इंद्रियाणि मनोबुद्ध्यहंकारचित्तानि श्रोत्रादीनि चेति ग्राहकमानं संगृहीतं गुणाः स्वविषयतां तेन
ग्राह्यमात्रं गृह्यते समस्तं ग्राह्यग्राहकवदाभासते न तु ग्राह्यग्राहकस्वरूपं ग्राहकाकारत्वमित्यर्थः कुत एतत् य

सर्वेंद्रियगुणाभासं सर्वेंयविवर्जितं असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च १५

तः सर्वेंद्रियविवर्जितं इंद्रियेति गुणानामप्युपलक्षणं न हि ब्रह्मणि किंचित् ग्राह्यरूपाणि ग्राहकं वा मनआदि[illegible]व
र्त्तते अशब्दमस्पर्शमरूपमव्य[illegible]यं अप्राणो हि अमनाः शुभ्रः पर इति रूपमग्राह्यमचक्षुःश्रोत्रं तदपाणिपादमित्यादिश्रु
त्यात् तस्मान्न प्रपंचवैचित्र्यं ब्रह्मणः कल्पितं हि सर्वं ब्रह्मेति शास्त्रमित्याशंक्याह असक्तं सर्वभृच्चैवेति अत्र सर्वभृदिति
सर्वाधारतोक्ता सर्वस्मात् पृथग्भूतमपि असक्तं सर्वस्य ब्रह्मणा सह आधाराधेयभावोपि किं घटरूपयोरिव समवाय
संबंधेन कुंडबदरयोरिव संयोगसंबंधेन वेत्याशंक्य संबंधं विनैव सर्वं धृत्वा ब्रह्मण इत्याह असक्तमिति ननु व्याहत
मेतत् असक्तमिति च सर्वभृदिति चेति नैष दोषः न ह्यपरभूमिर्मरीचिकोदकेन संसक्ता अथ च तदाधारभूता

रूपंमिथ्येतिकिंचनिर्गुणंगुणभोक्तृत्वमप्यस्यचिदाभासरूपस्योपपद्यतेप्रतिबिंबोपाधिंचतत्तनाधिकं

म·भा·
भी·टी·

न

प्रिभवंतितस्यदेतद्द्रविष्यतिनन्वेवंप्रपंचस्यमापततितथाचकर्मोपास्तिविधयउपरुध्येरन्नब्रह्मात्मैकत्वज्ञानेनयावत्
द्वैतंनवाध्यतेतावत्क्रियाकारकादिसर्वव्यवहारस्यसत्वतोपगमात् प्राणावैसत्वंतेषामेषसत्यमितिश्रुत्यावि
प्राणोपलक्षितस्यकृत्स्नस्यप्रपंचस्याव्यवहारिकंसत्यत्वमुक्त्वाततोपिधकंपरमार्थसत्यंब्रह्मेतिदर्शितंतसत्य
त्वंचावाध्यत्वंततत्किंचित्कालंप्राणानामास्ति ब्रह्मणस्तुसार्वदिकमितियथाश्रुतीनांभूपरितुल्येऐश्वर्या
ल्पत्वमप्यस्त्वेवंकृतोभेदस्यस्वप्नवमिहापिद्रष्टव्यंतस्माद्ब्रह्मणः सविशेषत्वेनिष्कलात्मबोधात्प्रागेवनतू
र्ध्वमिति ॥ प्रवश्यंतत्वज्ञानेनवाधितुंशक्यमितितुयावदैकंब्रह्मनकेनाचित्कार्यशेषतांनेतुंशक्यंतदधिग
मेक्रियाकारकादिद्वैतोपमर्दादुपासोपासकोपासनाभेदस्यवाधितत्वात् तस्माद्युक्तंउपाधिकृतंतथाचश्रुतिः
ध्यायतीवलेलायतेवेति बुध्द्योध्यायंतांतत्रप्रविष्टश्चिदाभासोध्यायतीवविषयान्बुद्धौलेलायंतांविषया
न्देशंगच्छंत्यांसोपिलेलायतीवनतुयतोध्यायतीलेलावतीएतेष्वपतेः प्रतिपादयतिएतेनअपाणिपादोजव
नोग्रहीतापश्यत्यचक्षुः सशृणोत्यकर्णइत्यपिब्रह्मणउपाधिगुणानुगुण्यभजनेशक्तिमत्वेनैवव्या
ख्येयं ॥ अपाणिपादोपिपादोजवतिजवनवानभवतीति ॥ अधोमणिमविंदधिदित्यादिवाक्येनज्ञा
तंवाज्ञानुसंधेयः तस्माद्युक्तमुक्तंनिर्गुणंगुणभोक्तृचेतिभाष्येतुनिर्गुणंस
त्वादिगुणरहितमपितेषांगुणानांसुखदुःखमोहात्मकत्वे.
नपरिणतानांभोक्तृचउपलब्धृचेतिव्याख्यातं १५
१५ १५ १५ १५ १५ १५ १५

श्री ६३

ननु च सत्कस्य संबंधे चेत्कथमुपलब्धः स्यादित्याशंक्याह बहिरिति भूतानां प्राणिनां एकादशेंद्रियाणि स्थूलभूतानि केवलं
विकारित्वेन व्यवहितत्वात् बहिरित्युच्यते महदहंकारपंचतन्मात्राव्यक्तानि प्रकृतिरूपत्वेन संनिहितत्वादंतरि
त्युच्यंते चराचरमिति तूभयनिष्कृष्टा चराचरोपाद्युपलक्षितः अवधिभूताः पुरुषाः चरमचरं चेत्यत्र चराचरं ज्ञे
यमिति समानाधिकरणेन पुरुषाणां ज्ञेयमिति षोडशसु विकारेषु अष्टासु प्रकृतिषु च ज्ञेयस्य संबंधः उक्तः
स च संबंधो यादृशो यक्षस्तादृशो बलिरिति न्यायेन अध्यस्तप्रकृतिविकृतिनिरूपितत्वेनाध्यस्त एव एवं च
पुरुषस्योपलब्धमात्रशरीरगुणैः सह अध्यस्तसंबंधसत्त्वात् गुणोपलब्धत्वमुच्यते यथा प्रकाशमात्रस्वरू
पस्य रवेः प्रकाशसंबंधापेक्षं प्रकाशयितृत्वं तद्वदित्यर्थः ननु नित्यापरोक्षः पुरुषः प्रकृतिसंबंधश्च तर्हि कुतो न सर्वै तो

बहिरंतश्च भूतानामचरं चरमेव च सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् १६

गृह्यते इत्याशंक्याह सूक्ष्मत्वात् तत् ज्ञेयं अविज्ञेयं दुर्विज्ञेयं यथा जपाकुसुमाव्यवहितस्य स्फटिकस्य शौक्ल्यं संनिहितम
पि रूपांतरविक्षेपेण तिरोहितं सन्न गृह्यते एवं नित्यापरोक्षमपि असंगं ब्रह्मोपाध्युपाधेयोपाधिविविक्ततया न गृहीतुं शक्य पुं॰
किंतु औपाधिककर्मोपेतमेव गृह्यते मूढैः विद्वद्भिस्तूपाधिप्रविलापनेन सुगममित्याशयः एतदेवाह दू
त रस्थं चांतिके चेति यथा मूढो जले सूर्यबिंबरूपी दूरस्थं मन्यते विद्वांस्तु उपाधिप्रतिहतनयनरश्मीनामुपपत्ते हि
स्तु तत्प्रगतानां बिंबग्राहकत्वं स्पष्टं बिंबस्याधः स्थितत्वग्रहणेन तत्पूर्वप्रवृत्ताधोमुखवृत्तिसंस्कारापेक्षमिति ज्ञानेन बिं हे
बदेशे एव प्रतिबिंबं पश्यति बिंबेन एव जलस्थत्वमध्यस्यते न तु जले प्रतिबिंब इति उपाधौ धर्मिण्या सकल्पनात् इति बिं शि
बस्योपाधिसंसर्गमात्राध्यासकल्पने लाघवात् एवं बिंबभूतं ब्रह्म ब्रह्मप्रतिबिंबभूताजीवान्मूढा विप्रकृष्टं विदुर्धांतु प्रत्यंतं कि

एतदेवोपपादयत्यर्थेन अविभक्तं चेति एकरावत्तु भूतानामभूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवदिति स्मृतेर्भू
तेषु कार्यकारणसंघातापन्नेषु जलपात्रेषु चंद्रस्येव ब्रह्मणः प्रतिबिंबजीवात्वोक्तेरीत्याविंनादृनन्यादृतितद्रूपेण
भूतेषु अविभक्तं च विभागसंप्राप्तमपि ज्ञेयं वस्तु भूतदृष्ट्या विभक्तमिव हरदेशस्थमिव चात विभिन्नमिव च स्थि
तं एवं तर्हि चंद्र[illegible]दुदपात्राणामिव भूतानां पृथक्मत्वापत्तिरित्याशंक्याह भूतभर्तृ चेति अधिष्ठानत्वेन सर्वा
णि भूतानि धारयतीति न वत तस्तेषां पृथक्त्वं तत्त्वास्निरज्जु तएव तदध्यस्तानां सर्पदंडधारादीनामित्यर्थः एतदेवा
ह ग्रसिष्णु प्रभविष्णु च यथा रज्जुस्तत्वज्ञानदशायां सर्पादीन् ग्रसति अज्ञानदशायां च तानेव प्रसूते तद्वत् ज्ञाने
ब्र सह्न सर्वभूतग्रसिष्णु ग्रसनशीलं अज्ञाने च सर्वभूतानां प्रभविष्णु उत्पादनशीलं १७ एवं ज्ञेयस्य तटस्थल

अविभक्तं च भूतेषु विभक्तमिव च स्थितं भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च १७
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितं १८

क्षणमुक्त्वा स्वरूपलक्षणं ज्योतिषामिति ज्योतिषां बाह्यानामादित्यादीनां मंतराणां च बुध्यादीनामेतरावभासकानाम
पि ज्ञेयं ब्रह्म ज्योतिरवभासकं चैतन्यं ज्योतिर्नतु ज्योतिरवभासकः तथा च श्रुतयः येन सूर्यस्तपति तेजसेद्धः तस्य भासा सर्व
मिदं विभातीत्याद्याः वसति च यदादित्यगतं तेज इति तमसोऽज्ञानाद्भूतग्रामप्रसवहेतोः परं दूरस्थं तदुक्तेनतु यथा
रि चंद्रस्य ज्योतिषो अवभासकं तत्सजातीयं सौरं ज्योतिरिति ज्योतिषां स्वप्रसिद्धं एवं सौरादिज्योतिषामवभासकं किंचित्तत्स
जातीयं ज्योतिरलौकिकं स्यादित्याशंक्याह ज्ञानमिति ज्ञानं वर्धमानशरीरं परं ज्योतिर्नतु भौतिकं तदेव ज्ञेयं तत्तु अमा
त्वी ज्ञानेन अप्राप्तमित्यत तमं कुतस्तर्हि तत्ज्ञानमत आह ज्ञानगम्यमिति यतस्तत् ज्ञानेन अमानित्वादिना ज्ञानेन सा
धनेन गम्यं प्राप्यं किं तर्हि ग्रामांतरवत् देशव्यवहितं वा बाल्ययौवनमिव अवस्थांतरवत् कालव्यवहितं वा न तत्प्रा हरि
प्यमस्तीत्यत आह हृदि सर्वस्याधिष्ठितमिति स्वात्मभूतमेव तदंते द्रष्टीनां सम्यक्प्रकाशितं स्पष्टं १८

उक्तमर्थजातमुपसंहरति इतीति क्षेत्रं महाभूतादि धृत्यन्तं तथा ज्ञानं ज्ञानसाधनं अमानित्वादि तत्त्वज्ञानार्थदर्शनान्तं ज्ञेयं च अना
दिमत्परमित्यादि धिष्ठितमित्यन्तं श्रुतिभिः स्मृतिभिश्च समासतः संक्षेपत उक्तं मद्भक्तः एतत्त्रयं विज्ञाय मद्भावा
य ब्रह्मभावायोपपद्यते युक्तो भवति भक्त्यैव प्राप्यं ब्रह्म न यत्नप्राप्यं ब्रह्मैव भवतीति च १९ तथा च श्रुतिः यस्य देवे परा भक्तिर्य
था देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति ब्रह्मविद्ब्रह्मैव भवतीति च १९ एवं क्षेत्रं शरीरारब्ध
मव्यक्तमुक्तं तत्प्रकाराश्च महदाद्यास्त्रयोविंशतिः तद्विकारादिच्छादयो ज्ञानानाशानपाद्विता अ[illegible]मानित्वमानित्वा

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते १९
प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् २०

द्वयः पुरुषश्च उक्तः इदानीं क्षेत्रक्षेत्रज्ञयोर्मिथो यस्माद्यज्ज्ञायते तेन च क्षेत्रस्य प्रभावश्चेति द्वयं वक्तव्यं विवृणोति
त्रिभिः प्रकृतिमिति सप्तमाध्यायेऽष्टधा या प्रकृतिर्या तु जीवभूता परा प्रकृतिरुक्ता सात्र पुरुषशब्देनोच्यते तौ
हि संपृक्तौ संसारं जनयतः वियोगश्च तयोर्मोक्षः तत्र तावुभावप्यनादी विद्धि तयोरादिमत्त्वे संसारस्याकस्मि
कत्वापातात् कृतहान्यकृताभ्यागमप्रसंगश्चेत्यन्यत्र विस्तरः विकारान् इच्छादीन् बुद्ध्यादींश्च प्रकृ
ति[illegible]संभवान्विद्धि २०

म.भा.
भी.टी.

उभयोरपिसंसारंप्रतिकारणत्वेद्वारमाहकार्येतिकार्यंशरीरंतदारंभकानिभूतानिविषयाश्चकारणंइंद्रियाणितदात्मत्वाश्रिताश्चसुखमोहात्मकागुणाश्चकरणमितिपाठेपिसएवार्थः एतयोःकार्यकारणयोःकर्तृत्वेनिमित्त्वेसतिकर्तृत्वेनेत्यर्थः हेतुःसंसारस्यकारणंप्रकृतिर्भवतितथापुरुषः सुखदुःखानांभोक्तृत्वेसंसारस्यहेतुरितियदिहकार्यकारणसुखदुःखस्वरूपहेतुफलात्मनाप्रकृतिनपरिणमेततदापुरुषः।किंनुपलभेताअनुपलब्धावाकथंसंसारीस्यात्अनुपलब्धःकावाप्रकृतिकुतोपपद्यतेतस्मादुपलभ्योपलब्धृसंयोगः संसारकारणमितियथाभाष्यंव्याख्यानंयद्वापुरुषस्यकार्यत्वेकारणत्वेकर्तृत्वेनप्रकृतिरेवपुरुषतादात्म्यंप्राप्ताहेतुर्भवतितथाप्र

कार्यकारणकर्तृत्वेहेतुःप्रकृतिरुच्यते पुरुषःसुखदुःखानांभोक्तृत्वेहेतुरुच्यते २१

कृतेसुखदुःखभोक्तृत्वेस्वछायाप्रदानेपुरुषः कारणंवह्निरिवलोहस्यस्वछायाप्रदानेनदग्धत्वेतथाहिकार्यत्वादयः प्राकृतदेहेंद्रियबुद्धिधर्मासंतआत्मन्यारोप्यंतेगौरोहंमनुष्यपुत्रोहंखंजोहंकरोम्यहमकार्यमहमितितथाचिछायापन्नाबुद्धिःचेतयाम्यहंसुखदुःखादीनुपलभेइतिमन्यतेसोयंप्रकृतिपुरुषयोरन्योन्यधर्माध्यासःसंसारस्यकारणमित्युपादितंभवतिसांख्याभिमतंपुरुषस्यभोक्तृत्वमपिनिरस्तंभवतिअन्यथाप्रकृतिकर्त्रीपुरुषोभोक्तेतिकर्तृत्वभोक्तृत्वयोर्वैयधिकरण्यमापद्यतेनचभोक्तुःपुरुषस्यनिर्विकारत्वमपिवक्तुंशक्यमित्यन्यत्रविस्तरोद्वंद्वांतेश्रूयमाणंपदंप्रत्येकमपिसंबध्यतइतिक्षिप्रत्ययस्यपूर्वाभ्यामभिसंबंधेकार्यत्वेकारणत्वेकर्तृत्वेचेतिविग्रहेद्वंद्वैकवद्भावश्चप्राप्तिरादिकार्याल्लिंगपरिमाणवचनमात्रेप्रथमेत्यादिवत् २१

श्रीः
२१५

ननु यथा वंधकर्तृत्वं पुंसि आरोप्यते । एवं योस्त भोक्तृत्वं बुद्धावस्तीत्येतं भ्रमं वारयति पुरुष इति हि प्रसिद्धं प्रकृतिस्थ देहेंद्रिय
मनःसंघातमध्यासेनैक्यं गतः इत्यर्थः प्रकृतिजान्सुखदुःखमोहात्मकान्गुणान्भुंक्ते उपलभते यदा तु समाधि
मूर्छादौ प्रकृतिस्थत्वं नास्ति तदा न सुखादीनुपलभते तेन उपाधिगतान्येव सुखादीनि तदभावेन प्रतीयंत इति सिद्धं
प्रकृतिरपि आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति इंद्रियमनोयोगादेवात्मनि भोक्तृत्वं दर्शयंती श्रुतिः स्वस्य केव
लस्य भोक्तृत्वं नास्तीति दर्शयति कुतस्तर्हि भोक्तुरस्य प्राकृतो वंध इति तत्राह कारणमिति अस्य पुरुषस्य सद
योनिजन्मानो जन्मसु तत्र सद्योनिजन्मानो देवाः असद्योनिजन्मानः सर्पा याः स्थावराश्च सदसद्योनिजन्मानो

पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् कारणं गुणसंगोस्य सदसद्योनिजन्मसु २२

मनुष्याः एतेषु त्रिविधयोनिजन्मसु प्राप्येषु अस्य पुंसः गुणसंगः सुखादिष्वभिषंगः कारणं हेतुः तथा हि सात्विका देवा भ
वंति राजसा मनुष्यास्तामसाश्च पशवः तेषां तद्योनिप्राप्तौ तत्तद्गुणप्राधान्यमेव कारणं वक्ष्यति च ऊर्ध्वं गच्छंति सत्त्व
स्था इत्यादि इत्थं प्रकृतिस्थो विद्वानविद्वान्वा गुणान्भोक्तेति पश्वादिभिश्चाविशेषादिति न्यायात् तत्र किं अविद्वान्
पि कुतो न मुच्यते अविद्वान्विद्वान्वा कुतो न बध्यते इत्याशंक्याह कारणमिति गुणेषु देहेंद्रियविषयेषु संगः अ
हमिदं ममेदमित्यभिनिवेशः स एव जन्मकारणं विदुषां तु तद्भावान्न जन्मेति समानेपि देहसंबंधे पशुपुरुषयोर्दे
हाभिमानं धत्ते तेन स एव देहपीडया पीड्यते न तु देह इति जीवो यद्यप्यहं देहाभिमानं धत्ते तथापि तेन नरः इति प्रसिद्धं सं
गसंबंधकत्वेन न तु सांनिध्यमात्रं बंधकं अतो विद्वदविदुषोः समानेपि देहसंबंधे संगासंगभावकृतो महा
विशेष इति भावः २२

गी
भी.१८।

सच्चयोयत्प्रभावश्चेति क्षेत्रज्ञतत्प्रभावौ व्याप्यव्यापकत्वेन प्रतिज्ञातौ तत्र क्षेत्रज्ञः प्रागेव वर्णितः तस्येदानीं प्रभावमा
हं उपद्रष्टेति तत्र पूर्वं गुणसंगो जन्मकारणमित्युक्तं तत्र संगश्चतुर्विधः पुरुषापत्त्या येन गुणमात्रप्रधान्येन वाऽ
त्मनो गुणप्राधान्येनैवेति तत्राद्ये देहेंद्रियमनआदिरूपं गुणसंघातमेवात्मत्वेन पश्यन्भोक्ता भवति यथा चार्वा
काद्देहिं ति यो गुणानां प्राधान्यादात्मनि वास्तवकर्तृत्वाद्यभिमानेन कर्मफलानां भर्त्ता संचेता भवति यथा तार्किका
दिर्दृतीयो गुणानां समप्राधान्येन गुणगतमपि भोक्तृत्वं असंगे आत्मनि दृष्ट्वा मलाजनुकं वदनुमन्यते यथा सांख्या
चतुर्थे सर्वथापि गुणधर्माणामात्मनि संक्रमं पश्यन्नुदासीनबोधरूपत्वेन गुणप्रचारदर्शी उपद्रष्टा भवति यथा
स्माकं साक्षी एतेषु चतुर्ष्वपि गुणसंगिषु उपद्रष्टा उत्तमः अनुमंता मध्यमः भर्त्ता अधमः भोक्ता अधमाधमः स

उपद्रष्टानुमंता च भर्त्ता भोक्ता महेश्वरः परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः २३

एवं गुणान्वशीकृत्य यथाक्रीडति तेन महेश्वर इत्युच्यते यः सर्गस्थित्यंतकर्ता प्रभुर्भगवांस्तं परमीसः एव सगुणा
नुपदार्तं तत्साक्षित्वेन स्थितो भवति तथापि तस्येव संघातोऽतेः प्रचारदर्शित्वाभावात् एकमूलत्वे संघातप्रचारद
र्शीति सर्वोत्कृष्टत्वात्परमो यथात्मा तमेनं वसति उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य वि
भर्त्यव्यय ईश्वर इति एतावपि गुणसंगिनोऽत्रैव मे करावदे हे अस्मिन्विधमानो पुरो गुणः तीतास्तात्मनिगुणात्प्र
विलाप्य हि प्रतोग्रखंडे करस आत्मा गुणसंगेन बद्धो भवति अथमेवास्य प्रभावात्तत्र अनुमंता भर्त्ता भोक्ता
भिः त्रिभीः रूपैरयं बध्यते उपद्रष्टृमहेश्वरपरमात्मरूपैस्तु नित्यमुक्त एक एवेति ज्ञेयं अत्र भाष्यादौ व्याख्यानं
संधेयो विस्तरभयात्तु न प्रदर्शितः २३

श्रीव
१८६

एवंमयोक्तलक्षणमेज्ञानेफलमाह य एवमितिगुणैः स्वविकारैः सर्वथाविहितेनविषिद्धेनवाकर्मणावर्तमानोपि
सभूयोनजायतेपुनर्जन्मनलभतेमुक्तोभवतीत्यर्थः २४ एवंविधात्मदर्शनेऽधिकारिभेदेनउपायविकल्पाना
ह ध्यानेनेति अत्रयेआत्मानंविविदिषंतितेनिष्कामकर्मणापरमेश्वरंआराधयंतिकर्मयोगिनः ततएवात्म
विविदिषावेदांतश्रवणेप्रवर्ततेतथाप्रमाणगतासंभावनानिवृत्यैसत्यातस्यैवार्थस्यमननेप्रवर्ततेप्रमेयगता
संभावनापानिवृत्यर्थंनेतरेअनात्मनिदेहादावात्मबुद्धिरूपायाविपरीतभावनायानिवृत्यर्थंनिदिध्यासनंवि

य एवंवेत्तिपुरुषंप्रकृतिंचगुणैःसह सर्वथावर्तमानोपिनसभूयोपिजायते २४
ध्यानेनात्मनिपश्यंतिकेचिदात्मानमात्मना अन्येसांख्येनयोगेनकर्मयोगेनचापरे २५

जातीयप्रत्ययतिरस्कारपूर्वकसजातीयप्रत्ययप्रवाहीकरणलक्षणंकर्तुंप्रवर्ततेततस्तत्परिपाकेआत्मनिबु
द्धवेनेआत्मानंपरमेश्वरंपश्यंतितेध्यायिनः ततयेकर्मसांख्ययोनिस्नातास्तेध्यानेनात्मनिदेहेआत्मानंपर
मेश्वरंआत्मनापरमेश्वरैबुद्ध्यापश्यंति अन्येकृतकर्माणः सांख्येनयोगेनध्यानद्वारापश्यंति अन्येपुनःकर्मयो
गेन॰॰चएवोक्तलक्षणेनसांख्यध्यानद्वारापश्यंतीतिसाधनत्रयस्यसमुच्चयोनतुविकल्पः २५

भी.टी. पश्चात्तरमाह अन्ये त्विति ये अन्ये ऊहापोहकौशल्यहीनास्तु शब्देन पूर्वोक्तेभ्यो विलक्षणाः एवं पूर्वोक्तप्रकारं अजानंतः
दे अन्येभ्य आचार्येभ्यः श्रुत्वा आत्मनो निर्विशेषब्रह्मचैतन्यस्वरूपत्वं तदुपासनाद्याधिगत्य उपासते यथोक्तप्रकारेण
ध्यायंतिते पि च मृत्युसंसारं तरंत्येव अपि शब्दात् पूर्वश्लोकोक्तांतरंतीत्यत्र किमाश्चर्यं गम्यते एवशब्दो तेषां मु
खक्रमाभावे पि तरणे संशयो नास्ति श्रुतिपरायणाः श्रुतिश्रवणं तदेव परं अयनं मोक्षसाधनं येषां ते तथा
ध्याने प्रवृत्तास्तिष्ठायाश्च तेषां चित्तस्य शुद्ध्यर्थं कर्मापेक्षा वेदांतेक तत्त्वे हि निश्चयाद्यासंभावनानिवृत्त्यर्थं श्रवणम
ननापेक्षेति भावः अप्रपंचब्रह्मसाक्षात्कारः संवादिभ्रमरूप इत्यन्ये तथा हि यथा कश्चिन्मणिप्रभां मणिबुद्ध्याभ्यपन्नौत

अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते तेपि चातितरंत्येव मृत्युं श्रुतिपरायणाः २६

एवं तथापि तद्ग्रहणकाले मणिं लभते अतः संवादि एवं त्वंपदार्थं तत्तदार्थं मणिप्रभास्थानीयं तदार्थबुद्ध्याभावयन् व्यवहार
तोभ्रांत एवं तत्साक्षात्कारः काले तदनन्यस्य तत्पदार्थस्य साक्षात्कारो पि संवादिभ्रमन्यायेन जायत इति तथा चैव विशिष्टः
न अप्रसत्त्वे सत्ये नासाधो शाश्वती परिदृश्यते श्रूयते न ध्यानयोगैः शाश्वतं प्राप्यते पदमिति व्यवहारतो निर्विशेषस्वरूपत्वेन अप्र
सत्ये आत्मनि तन्निर्विशेषत्वभावनं श्रूयतो निर्विषयोयं ध्यानयोगो विषितिं अग्निं ध्यानवत् तथापि तेन प्राप्ता श्वतीर त्वं तो
प्राप्याद् दृश्यत इति वशिष्ठवाक्यार्थः कल्पद्रुमाचार्यास्तु वेदांतवाक्यजध्यानभावनाजापरोक्षधीर्मूलप्रमाणदृढो
न नभ्रमत्वं प्रपद्यत इति प्राहुः २६ द्विव ९७

सर्वकार्यकारणकर्तृत्वे हेतुरित्यत्र च विद्वित्तेः पुंप्रकृत्योरन्योन्यधर्माध्यासरूपस्तस्यैव गुणसंगरूपस्य कारणं गुणसंगो
स्येति नानाजन्मत्वे चोक्तं तद्विशदयति यावदिति सत्वं जीवरूपं गुणसंगो च रूपाध्यासश्चात्मिने किंतु क्षेत्रक्षेत्रयोः संयोगो
न्योन्यात्मकताध्यासलक्षणो वोध्यः शेषं स्पष्टं २७ तन्नाशोपायमाह सममिति सममपरिणामिनं कूटस्थं नित्यं स
र्वेषु भूतेषु देहाद्याकारेण परिणतेषु तिष्ठंतं एतेनैव देहावत तदधिगमस्थानमित्युक्तं परमेश्वरं प्रतियामिणं सर्ग
स्थित्यंतकर्तारं प्रत एव प्रतंतर्मुखदृष्ट्या विनश्यत्सु तेषु भूतेषु रज्जुरगादिवत्कल्पितत्वात् प्रदर्शनं गच्छत्सु विभु

यावत्संजायते किंचित्सत्वं स्थावरजंगमं क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ २७ समं
सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति २८ समं पश्य
न्हि सर्वत्र समवस्थितमीश्वरं न हिनस्त्यात्मनात्मानं ततो याति परां गतिं २९ ॥

त्वात् आत्मत्वान्नित्यदृग्रूपत्वाच्च प्रविनश्यंतं सर्वासु प्यवस्थासु प्रदर्शनं गच्छंतं यः पश्यति प्रन्ये धाद्भूतर्थः २८
दर्शनफलमाह सममिति स्वदेहवि सर्वत्र देहमात्रे समवस्थितं ईश्वरं समं समं तपापश्यन्हि यतः स सर्वात्मद
र्शी प्रत्मनादेहादिना प्रात्मानं ईश्वरं न हिनस्ति नानायोनिसंकटेषु पातनेन न पीडयति किंतु ततः प
रां गतिं मोक्षं याति यद्वा एकात्मदर्शित्वात्स्वात्मानमिवान्यमपि न हिनस्ति सर्वत्र दयालुर्भवतीति भावः त
पश्च परां गतिं याति २९

ननुविषमस्वभावानिभूतानिनि[illegible]तानिकः समबुद्ध्यापश्यत्यग्निमिवशीतबुद्ध्येत्याशंक्याहप्रकृत्यैवेतिसर्वशः स
व[illegible]रेणकर्माणिवाङ्मनःकायैरारभ्यमाणानिप्रकृत्यैवक्रियमाणानीतियःपश्यतीतथाऽऽत्मानंचाकर्तारंयः
पश्यतिपूर्वोक्तरीत्यासएवसर्वत्रसमंपश्यतीतिपूर्वेणान्वयः ३० ननुकथंप्रकृतेरेवकर्तृत्वंनत्वात्मनइत्याशं
क्याहयदेतिभूतानांवियदादीनांजरायुजादीनांचपृथग्भावंनानाभावेनावस्थानंपरिदृश्यमानमिदंय

प्रकृत्यैवचकर्माणिक्रियमाणानिसर्वशः यःपश्यतितथात्मानमकर्तारंसपश्यति ३०
यदाभूतपृथग्भावमेकस्थमनुपश्यति ततएवचविस्तारंब्रह्मसंपद्यतेतदा ३१

दाएकस्मिन्नात्मनिस्थितंरज्जौसर्पादिवत्कनकेवाकुंडलादिवत्विलीनंशास्त्राचार्योपदेशमनुपश्यतिततए
वकस्मात्तविस्तारंचपृथग्भावस्यप्रबुद्धस्यावस्थामनुस्वप्नादिवत्पश्यतितदाब्रह्मसंपद्यतेब्रह्मैऽभवतिअ
यंभावः कर्तृत्वंहिक्रियापरिस्पंदःसचपरिच्छिन्नस्यपृथग्भूतस्यप्राकृतस्यबुद्ध्यादेरेवसंभवतिनतु
व्यापकस्यसर्वभूतपृथग्भावस्यसाक्षिणोऽत्मनइति ३१

नन्वात्मनो विभुत्वेन रूपेण कर्तृत्वं मा सा कारि देहाद्यवच्छिन्नेन तु रूपेण तद्धुकं अन्यथानुभवविरोधादित्याश
ङ्क्याह अनादित्वादिति अयं सर्वेषां प्राणिनां अपरोक्षः परमात्मा देहादिभ्यो परमेश्व अनात्मभ्योन्यः कोशपंच
कातीतः आत्मा परमात्मा अव्ययः न व्येति परिच्छिद्यते देशतः कालतो वस्तुतश्चेत्यव्ययः अव्यये हेतुः अना
दित्यादिति यद्धि आदिमदाकाशादि तत्तद्व्येति न अनादिनं च नादिभावस्यानंतनियमेनात्मनः कालतः परिच्छे
दो मास्तु तथा देशतः परिच्छिन्नस्य नाशावश्यंभावाद् अनादित्वयोगाद्देशतोपि परिच्छेदो ब्रह्मणो मास्तु न
नु परमाणुवद्भविष्यतीति चेन्न दशदिगवच्छेद्यप्रदेशभेदवतो द्रव्यस्य निरवयवत्वरूपाणुत्वासिद्धेर्नहि पर

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः शरीरस्थोपि कौंतेय न करोति निलिप्यते ३२

माणोः पूर्वदिगवच्छिन्नो भागः पश्चिमायामप्यवच्छेत्तुं शक्यते अनुभवविरोधात् देशतः परिच्छेदाभावादेव सजातीय
वस्तुसद्भावः कृतपरिच्छेदोपि मास्तु तथापि विभिन्नशक्तियुक्तस्य अभिनवप्रपंचरचनाघटीयंत्रस्य परस्य सर्वे
श्वरत्वसर्वज्ञत्वादीश्वरगुणयुक्तस्य स्वगतभेदो वश्यंभावि स्वशक्तिमायावच्छिन्नेन रूपेण जगत्कर्तृत्वं देहावच्छे
नाग्निहोत्रादिकर्तृत्वं चावश्यं वक्तव्यमित्याशंक्याह निर्गुणत्वादिति यो हि गुणवानाकाशादिः स संयोगं विभा
गं वोपाधिं प्राप्य स्वगुणांशं वं आविष्करोति न तु स्वस्मिन्नसतं स्पर्शं केनचिदपि उपाधिना दर्शयितुमीष्टे ए
वं आत्मा सर्वगुणहीनः स स्वप्यवच्छेदत्वाभे कर्तृत्वादिकं गुणमाविष्कर्तुं न समर्थ इति फलितमाह शरी
रस्थोपि स्यच्छायमेतत् ३२

निर्गुणत्वान्न करोतीति सिद्धं असंगत्वान्नोपलिप्यत इत्याह यथेति यथा आकाशो धूमादिना न लिप्यते सोऽस्यादसंगस्वभा
वत्वात् एवमात्मा पुण्यपापादिना नोपलिप्यत इत्यर्थः ३३ न करोति न लिप्यत इति द्वयमपि दृष्टांतांतरेण प्रतिपादयति
यथेति यथा सूर्यः स्वसत्तामात्रेण विश्वं प्रकाशयति न तु व्यापारा विष्टतया कुविंद इव घटं यथा चैष प्रकाश्यधर्मैर्दु
र्गंधादिभिर्न लिप्यते एवमयं क्षेत्री क्षेत्रज्ञः सूर्यवदेक एव सन् अनेकधा भूतं क्षेत्रं महाभूतानीत्यादिना चतुर्विंश

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ३३
यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ३४

तितत्त्वात्मकमिच्छा द्वेषादिविकारयुक्तं स्वसत्तामात्रेण प्रकाशयति हे भारत न तु व्यापारा विष्टतया संपादय
ति तत्कृतैर्वा पुण्यपापादिभिर्न लिप्यते सूर्यदृष्टांतेन एकत्वमकर्तृत्वं प्रयुक्तमलेपत्वं च दर्शितं तथा च श्रुतयो यथा
ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा सूर्यो
यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्य
ति ३४

अध्यायार्थं कृत्स्नमुपसंहरन्नाह क्षेत्रेति क्षेत्रक्षेत्रज्ञयोः पूर्वोक्तयोरेवमुक्तप्रकारेणान्तरं भेदं जडत्वाजडत्वकर्तृत्वाक-
र्तृत्वविकारित्वाविकारित्वकृतं वैलक्षण्यं ज्ञानचक्षुषा शास्त्राचार्योपदेशजनितात्मप्रत्ययेति ज्ञानेन ज्ञानचक्षुषा ये विदुस्ते
परं मोक्षं यान्ति प्राप्नुवन्ति किं संयोगनाश एव अस्माकमपि गुणपुरुषान्तरज्ञानादेव कैवल्यमुच्यते इत्याशंक्याह भूतप्र-
कृतिमोक्षमिति भूतानां विषयादीनां प्रकृतिरुपादानं त्रिगुणात्मिकाऽविद्या तस्याः मोक्षं निरस्त्वयोच्छेदं च ये वि-

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च ये विदुर्यान्ति
ते परं ३५ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्री
कृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञनिर्देशो नाम त्रयोदशोध्यायः १३ ॥

दुस्त एव परं यान्ति न तु क्षेत्रक्षेत्रज्ञयोरन्तरमात्रविद इत्यर्थः यद्येका नित्याविद्या च प्रकृतिस्तर्हि विमुक्तानामनुप-
दृष्टा बहूनां पुरुषाणां मुक्तानामपि तद्दर्शनमपरिहार्यं तथा च तेषामपि बन्धप्रसक्तिः यदि च मिथ्या तर्हि
यस्यैवात्मसाक्षात्कारो जातस्तद्दृष्ट्या सर्वैव रज्जूरगवद्बाधिता कालत्रयेऽपि नास्ति इतरेषां त्वनादिरनन्ता स्त्वे-
वेति वरं लुंचशाक्यं तस्मान्न प्रकृतिपुरुषान्तरज्ञानमात्रात्कैवल्यं किं तु प्रकृतिबाधनं रज्जुदर्शनात्तभयनि-
वृत्तिरिति सिद्धं ३५ इति नैलकण्ठीये भारतभावदीपे गीतार्थप्रकाशे त्रयोदशोध्यायः १३

पूर्वाध्याये तेभूतप्रकृतिमोक्षंचयेविदुस्तेपरंयांतीत्युक्तं तत्रकावाभूतप्रकृतिः किमाश्रयेण तस्याभूतजनकत्वं कथं
वा बंधकत्वं कथंच ततो मोक्षः किंच ततो मोक्षः किंच मुक्तानां लक्षणं इत्येतदर्थजातं विपरीतं चतुर्दशोध्याय
आरभ्यते तत्र रुच्युत्पादनार्थं परंज्ञानं स्तुवन् श्रीभगवानुवाच परमिति परं सर्वोत्कृष्टं ब्रह्मविषयत्वात् भूयः
पुनः असकृदुक्तमपि प्रवक्ष्यामि किंतत्स्वरूपमित्याह ज्ञानानां अमानित्वादीनां यज्ञादीनां संज्ञानसाध
नानां मध्ये यत उत्तमं ज्ञानं मोक्षफलत्वात् तदेतत् अहं घटं जानामीत्यत्राहमर्थस्य घटाकारवृत्तेर्घ
टस्य ज्ञेयं नमस्तीति विषयभेदात् ज्ञानं उपमस्ति तत्राद्यद्वये तात्तुरीयकं यच्च उत्तमं चरमं घटप्रकाशफलरू
पं ज्ञानं तदेव परं ब्रह्मेत्यर्थः यथोक्तं वार्तिककारैः परागर्थप्रमेयेषु या फलत्वेन संमता संवित्सेवेह मेयोर्थो

श्रीभगवानुवाच परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो ग
ताः १ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः सर्गेपि नोपजायंते प्रलये न व्यथंति च २

वेदांतप्रमाणत इति यत् तद् ज्ञानं ज्ञात्वा वेदांतवाक्यजन्यया धीवृत्त्या प्रत्यक्परोक्षीकृत्य परां सिद्धिं मोक्षं इतः संसारात् सं
सारं विहाय गताः प्राप्ताः १ इदं ज्ञानं विषयरूपविकल्पविनिर्मुक्तं उपाश्रित्य मम ईश्वरस्य साधर्म्यं सर्वात्मत्वसर्वनियं
तृत्वसर्वभावाधिष्ठातृत्वमित्यादिधर्मसाम्यं साधर्म्यमागता तथा च श्रुतयः एवं वेदाहं ब्रह्मास्मीति स इदं
२ सर्वं भवति सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानिति ज्ञान
फलं ज्ञानसाधर्म्यप्राप्तिमाहुः किंच मुमुक्षु उपभूतयो ज्ञानबलादेव सर्गेपि न जायंते प्रलयकाले च न तद्दुःखभावं गच्छंतो
न प्रलयासमादिभिः व्यथंते व्यथां प्राप्नुवंति इदं श्लोकद्वयभावं वक्ष्यमाणज्ञानं स्तुत्यर्थत्वेनैव व्याख्यातं तत् ज्ञानमुपाश्रित्य

अथेदानीं का वा भूतप्रकृतिः किमाश्रयेण तस्या भूतजनकत्वं तदाह ममेति मम शुद्धचिन्मात्रस्य योनिः प्रवेशस्थानं महत् तत्त्वस्व
प्रस्यम कार्यस्य ब्रह्म बृहत्कारणम् अव्यक्ताख्या कृतपरपर्यायं त्रिगुणात्मकं मायाख्यं तस्मिन् गर्भं स्वप्रतिबिंबरूपं दधामि धा
रयामि अहं चिदात्मा तेन मत्प्रतिबिंबगर्भिता या माया ततः सर्वेषां भूतानां भवनधर्माणां महदादीनां च संभवः उत्पत्तिर्भ
वति हे भारत एतेन चित्प्रतिबिंबसापेक्षत्वोपपादनेन प्रकृतेः सांख्याभिमतं स्वातंत्र्यं निरस्तं ३ किं च सर्वेषु भूते
षु उपादानभूतेषु उक्तच्छाया मोषधय इव याः मूर्तयः शरीराणि सुरनरतिर्यक्चरात्मकचतुर्विधानि संभवंति तासां मू
र्तीनां ब्रह्म महत् सर्वोत्कं महतो ब्रह्म ब्रह्म महत् राजदंतादित्वादुपसर्जनस्य परनिपातः मायैव योनिरित्यर्थः अहं तु तासां बीज

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहं संभवः सर्वभूतानां ततो भवति भारत ३ सर्व
योनिषु कौंतेय मूर्तयः संभवंति याः तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ४ सत्त्वं
रजस्तम इति गुणाः प्रकृतिसंभवाः निबध्नंति महाबाहो देहे देहिनमव्ययं ५

प्रदः पिता तासु स्वप्रतिबिंबसर्पयिता यथा पुरुषः भार्यायाम् अनुप्राय संप्रयत्य स्वं रेतो निषिंचति ततो भार्यायां पिंडोत्पत्तिरे
वं शांतस्तेन चैतन्या विशिष्टस्य पिंडस्य पिता अहं माता च मायेत्यर्थः ४ एवं ईश्वराश्रयेण प्रकृतिर्भूतानि सृजतीत्यु
क्तं इदानीं सा कथं भूतानि बध्नातीति तदुच्यते सत्त्वमिति प्रकृतेः सत्त्वरजस्तमसां साम्यावस्थानंतः सकाशात् परस्परा
गांगिभावेन वैषम्येण उद्रिच्यमाना प्रकृतिसंभवा इत्युच्यंते तेन नु प्रकृततोऽन्ये वैशेषिकाणामिव द्रव्याश्रिता गुणा अन्ये
एते हे महाबाहो देहे अव्ययमविकारिणमपि देहिनं स्वस्मिन्निव रशनाभूताः गुणाः निबध्नंति ॥ ५ ५

तत्र कः केन संगेन बध्नातीत्यपेक्षायां तेन चेति तत्र तेषु गुणेषु सत्वं निर्मलत्वात् दुःखमोहाख्यमलराहित्यात् प्रकाशकं ऽनालो
कं चत्सर्वार्थावद्योतकं ततो ऽनामयं रजस्तमोभ्यामनभिभूतं तेन त्सुखसंगेन ऽविद्यया तिरोहितस्वरूपज्ञानं ऽहं सुखी
ऽहं ज्ञानीत्यभिमानितो न ऽयं नेरणं हि तिधर्मयोः सुखज्ञानयोरात्मनि ऽध्यारोपेण बध्नाति हे ऽनघ ऽव्यसन् ६ रजो गु
णो रागो रंजनात्तं रागात्मकं विद्धि प्राप्यमानेषु पि ऽप्रार्थेषु ऽप्रतप्तिसंगः प्राप्ते विषये मनसा प्रीतिलक्षणः संश्लेषा
तयोः समुद्भवं निदानमभूतं तं तद्रजो हे कौंतेय कर्मसंगेन दृष्टादृष्टार्थेषु कर्मसु संगस्तत्परता तेन निबध्नाति देह

तत्र सत्वं निर्मलत्वात्प्रकाशकमनामयं सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ६ रजो रागा
त्मकं विद्धि तृष्णासंगसमुद्भवं तन्निबध्नाति कौंतेय कर्मसंगेन देहिनं ७ तमस्त्वज्ञान
जं विद्धि मोहनं सर्वदेहिनां प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ८ सत्वं सुखे सं
जयति रजः कर्मणि भारत ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत। ९

भिमानिनं ७ तमोगुणस्तु पूर्वाभ्यां विलक्षणं ऽज्ञानं मायाया ऽऽवरणशक्तिस्त तूद्भूतं ऽज्ञानजं विद्धि ऽतः सर्वेषां
देहिनां मोहनं भ्रांतिहेतु प्रमादे ऽनवहितत्वं सत्वकार्यं प्रकाशविरोधि ऽऽलस्यं जडतातत्स्वरजः कार्यप्रवृत्तिविरो
धि उमप कार्यनिरोधनीत मोगुणा वनावृत्तिनिद्रा ताभिरेतत्तमो नितरां बध्नाति हे भारत देहिनमित्यनुवर्तते ८
सत्वमुत्कृष्टं सत्सुखे दुःखकारणमभिभूय संजनयति संश्लेषं जनयति एवमुत्तरत्र ज्ञानं प्रकाशं ऽऽवृत्य प्रमादे ऽऽव

सत्वादयः कदा स्वस्वकार्यं प्रभवंतीत्याशंक्य इतरेतरयोरभिभवे सतीत्याह रजइति रजस्तमसी अभिभूय सत्वं भवति वर्द्धते
एवं रजोपि सत्वतमसी अभिभूय भवति तथा तमोपि सत्वरजसी अभिभूय भवतीत्यर्थः १० तत्र उद्रेके भव लिंगान्या
ह त्रिभिः सर्वेति अस्मिन्देहे यदा सर्वेष्वपि द्वारेषु बाह्यांतरकरणेषु प्रकाशः स्वस्वविषयावरणविरोधी परिणामविशे
षो जायते तेन च ज्ञानं शब्दादिविषयस्य पापात्मकेन प्रकाशी यदा जायते तदा सत्वं विवृद्धमिति विद्याज्जानीया
त् उत अपि सुखादिलिंगेनापि जानीयादित्यर्थः लोभादिके प्रवृत्तिरग्निहोत्रादेरारंभो गृहादिः कर्मणां अ

रजस्तमश्चाभिभूय सत्वं भवति भारत। रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा १० सर्व
द्वारेषु देहेस्मिन्प्रकाश उपजायते ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत ११ लोभः प्र
वृत्तिरारंभः कर्मणामशमः स्पृहा रजस्येतानि जायंते विवृद्धे भरतर्षभ १२ अप्रका
शोप्रवृत्तिश्च प्रमादो मोह एव च तमस्येतानि जायंते विवृद्धे कुरुनंदन १३ यदा सत्वे
प्रवृद्धे तु प्रलयं याति देहभृत तदोत्तमविदां लोकानमलान्प्रतिपद्यते १४ ॥

शमः सतामसतां वा कार्याणामनुपरमः स्पृहः दृष्टे परधनादावुपादित्सा रजसि विवृद्धे सति एतानि लिंगानि जायंते
हे भरतर्षभ १२ सत्यपि बाधके गुर्वादौ अप्रकाशः सत्वकार्यप्रकाशानुदयः अप्रवृत्तिः सत्यपि प्रवृत्तिनिमित्ते रजःका
र्यप्रवृत्त्यनुदयः प्रसादः कार्याकार्यविवेकराहित्यं मोहो निद्रालस्यादिरूपा १३ प्रलयं मरणं उत्तमविदां हिर
ण्यगर्भाद्युपासकानां देवानां वा लोकान् अमलान् निर्दुःखान् १४

कर्मसंगिषु श्रेष्ठा तस्मात्कर्मानुष्ठातृषु मनुष्येषु मूढयोनिषु तिर्यक्स्थावरचंडालादिषु १५ सुकृतस्य सात्त्विकस्य कर्मणः फलं निर्मलं दुःखाज्ञानमलरहितं सात्त्विकं ज्ञानवैराग्यादिकं रजसो राजसस्य कर्मणः फलं अज्ञानं सात्त्विकादिकर्म लक्षणं च नियतं संगरहितमित्यादिना वक्ष्यति १६ एतादृशफलवैचित्र्यं सर्वोत्तमवहेतुमाह सत्त्वादिति १७ यतः सत्त्वादिभ्यो ज्ञानादीनि जायंते ततः सत्त्वादिवृद्धिकाले प्रलयं गछंतः क्रमेणोत्तममध्यमाधमासु योनिषु जायंते इत्याह ऊर्ध्वमिति ऊर्ध्वं देवभावं मध्ये मानुषमर्त्यं अधः नरकतिर्यक्स्थावरभावं जघन्यं निं

रजसि प्रलयं गत्वा कर्मसंगिषु जायते तथा प्रलीनस्तमसि मूढयोनिषु जायते १५
कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलं रजसस्तु फलं दुःखमज्ञानं तमसः फलं १६
सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च प्रमादमोहौ तमसो भवतोऽज्ञानमेव च १७ ऊर्ध्वं
गछंति सत्त्वस्था मध्ये तिष्ठंति राजसाः जघन्यगुणवृत्तिस्था अधो गछंति तामसाः १८ ना
न्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगछति १९ ॥

घन्यगुणवृत्तिनिकृष्टस्य प्रमादादि तत्रस्थास्तामसाः १८ कथं प्रकृतिः पुरुषं बध्नातीत्यस्योत्तरमुक्तं कथं वा तन्मोक्षः मुक्तिरित्यस्योत्तरमाह नान्यमिति गुणेभ्यः कार्यकारणविषयाकारपरिणतेभ्यो न्यं द्रष्टाप्रमाता चेन्न आत्मानं द्रष्टा जीवः कर्तारं नानुपश्यति किंतु गुणा एव कर्तार इत्येवं पश्यति न त्वहं कर्तेति तथा गुणेभ्यः परं गुणव्यापारसाक्षिभूतं मां यदा वेत्ति तदा स वेत्ति मद्भावं ब्रह्मभावं गच्छति अन्यथा तु गुणभावं गतो भवति १९

कथंत्वद्भावं गच्छतीति तत्राह गुणानिति एतान् गुणान् महदादित्रयोविंशतिविकारात्मना परिणतान् देहसमुद्भवान् देह
स्य समुद्भवो येभ्यस्तान् अतीत्य जीवन्नेवातिक्रम्य निर्विकल्पकसमाधिभ्यासेन बाधित्वा अमृतं मोक्षम् अश्नुते प्राप्नोतीत्यर्थः ते
न अन्तदा बाधितैर्गुणैस्तस्य प्रयोजनमुक्तं यतो मुक्तो जन्ममृत्युजरादुःखैर्विमुक्तः सन्निति तत् अनर्थनिवृत्तिरुक्ता २० प्र
तिनु मुक्तिप्रकारे उक्ते मुक्तलक्षणं निपृच्छन् अर्जुन उवाच कैरिति कैर्लिङ्गैः अस्मिन् देहे त्रीन् गुणान् एतान् व्याख्यातान्
अतीतो भवति पुमान् हे प्रभो स च किमाचारः कोसावाचारः कथं केन च प्रकारेणैतान् गुणान् अतिक्रम्य वर्तते २१
तत्राद्यस्योत्तरमाह प्रकाशमिति प्रकाशप्रवृत्तिमोहाः सत्वरजस्तमसां कार्याणि मुख्यानावस्थायां तानि सम्यक्
प्रवृत्तानि सामान्येन पुंसकत्वात् संप्रवृत्तानि न द्वेष्टि नापि समाध्यवस्थायां तानि निवृत्तानि संति कांक्षति सोयं नित्यसमा

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान् । जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते २० अर्जुन
उवाच कैर्लिङ्गैस्त्रीन् गुणानेतानतीतो भवति प्रभो । किमाचारः कथं चैतांस्त्रीन् गुणानतिवर्तते २१
श्रीभगवानुवाच प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव । न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति २२

धस्यो ब्रह्मविद्वरिष्ठः पेप्रकांतिस्त्री भागवते स्मर्यते देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यतीति अत्र वाशिष्ठे
योगभूमयः पठ्यन्ते ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता विचारणा द्वितीया तु तृतीया तनुमानसा सत्वापत्तिश्च
चतुर्थी स्यात् ततो संसक्तिनामिका पदार्थाभाविनी षष्ठी सप्तमी तुर्यगा स्मृतेति तत्र प्रथमोक्तसाधनसंपत्त्या मुमुक्षु
ता प्रथमा श्रवणमननात्मिका विचारात्मिका द्वितीया निदिध्यासनरूपा तृतीया एतासां साधनभूमयः सत्वापत्तिः ब्रह्म
साक्षात्काररूपा चतुर्थी फलभूता अस्यां योगी कृतार्थो पि जीवन्मुक्तिसुखपुष्कलेनानुभवतीति सो जीवन्मु
क्ते रवान्तरभेदाः तत्रापि पञ्चम्यां भूम्यां स्वतः स्वयमेव व्युत्तिष्ठति षष्ठ्यां परप्रयत्नेन सप्तम्यां तु न स्वतः परतो वा

गी॰ भा॰
भा॰ टी॰

॥अथ षष्ठ्यां पदार्थाभावन्यां गतो ब्रह्मविद्वरीयानुच्यते उदासीनवदिति यो यं समाधौ उदासीनवदास्ते स्वात्मसुखानेकिमपि प्रयोजनं मम परस्येदं मम कर्तव्यमस्तीति वासनाशून्यत्वात् यश्रास्ते एव न तु परप्रयत्नेनांतरेण कदाचिदपि गुणैर्विचाल्यते परेण व्युत्थापितोऽपि गुणा न पश्यन् गुणा वर्तंत इत्ये[illegible]व स्मृत्वापि एव तिष्ठति स्तब्ध एव वर्तते न तु गणं कुते मिष्टामिष्टस्पर्शे इंगते चलति प्रयमर्थः यथा कश्चित् भुंजानो रसनामोत तत् स्वयं प्रकाशादि रसं न विंदति परेण त्थापितोऽपि किंचिद्रसविशेषमुपलभ्यापि तत्रोदासीन एवास्ति ऊर्ध्वमित्येव विशेषदर्शनस्य तिरोधानात् न तत्कृतं सुखं दुःखं वा पश्यतीति तद्वयं तेषाः २३ ॥अथ पंचम्यां भूमावशक्ति नामिकायां स्थितो

उदासीनवदासीनो गुणैर्यो न विचाल्यते गुणा वर्तंत इत्येवं योऽवतिष्ठति नेंगते २३
समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तुतिः २४

ब्रह्मविद्वरीयानुच्यते समाधौ समदुःखसुखे यस्य स समदुःखसुखः स्वस्वे स्वेनैव स्वे छ येवतो ष्ठतीति स्वस्थः यदा तु न समाधौ इच्छा तदा स्वयमेव व्युत्तिष्ठतीति भावः सोऽपि व्युत्थानावस्थायां समलोष्टाश्मकांचनः नो विरक्त इत्यर्थः तुल्यप्रियाप्रियस्तुल्यनिंदात्मसंस्तुतिश्च प्रियाप्रिययोर्निंदास्तुत्योश्च प्राप्तयोः तुल्यो हर्षविषादशून्यो यत्र हेतु धीर इति य‥ कश्चिद्धीरस्ती ब्रमहाभरण वेदनार्तोऽपि न व्यामुह्यति न धैर्याद्वेदनां चानुभवतीति तद्वदयं हर्षविषादावनुभवन्नपि धैर्यान्न चलति एवं स्य तु जातायामपि वेदनायां हर्षाद्युदय एवास्ति तत्सर्वस्य तु वेदनैव नास्तीति भेदः ताभ्यां न श्लोकत्रयेण सर्वेषां जीवन्मुक्तानां समाधौ लिंगानि तत्संवेद्यानि आचाराश्च परसंवेद्यानि लिंगानि‥ १०

अथचतुर्थ्यांभूमौसत्वापत्तिसंज्ञायांस्थितस्ययोगिनःसमाधिसुखाभावेनस्वसंवेद्यलिंगाभावात्तत...ति
द्ध्वयेनद्वैतस्यबाधात्लिंगमाचारश्चपरमंवेद्यएवतदाहसमानेतियद्याहिपरीक्षकः कूटकार्षापणस्यला
भेविनाशेवाहर्षविषादशून्योनचतद्लाभार्थंयत्नमारभतेमूढस्तुताभ्यांबाध्यतेनलाभार्थंयत्नंवाप्यते
एवंविद्वान्महमरीचिकानेहृदसमानंपश्यन्तत्रमानापमानयोर्मित्रारिपक्षयोर्वातुल्यएवनत्वन्यतरला
भायपरिहारायवायत्नमारभतेअतोगुणातीतइत्युच्यतेसर्वत्रपदार्थ २५ अथकथंत्रीन्गुणानत्यतिवर्तते

मानापमानयोस्तुल्यस्तुल्योमित्रारिपक्षयोः सर्वारंभपरित्यागीगुणातीतःसउच्यते २५
मांचयोव्यभिचारेणभक्तियोगेनसेवते सगुणान्समतीत्यैतान्ब्रह्मभूयायकल्पते २६

इत्यस्योत्तरंविवक्षन्नुसाधनभूताःतिस्रश्चभूमिषुतृतीयांतनुमानसामाहमांचेतियश्चसाधकोमांप्रत्यगात्मानंच
कारस्तत्त्वंयेसर्वभूमिस्थापेक्षयापस्यैवेलक्ष्णंयोजयतिअव्यभिचारेणवृत्त्यंतरानंतरतेनभक्तियोगेनमयिभगव
तितैलधारावदविच्छिन्नवृत्तिप्रवाहमनःप्रणिधानरूपेणयोगेनसेवतेध्यायतेसएवसम्यक्लीकृतचित्तःए
तान्गुणान्समतीत्यचपाच्यपरिपाकांतेसत्वमपिबाधित्वाब्रह्मभूयायब्रह्मभावायकल्पतेयोग्योभवतिमु
क्तोभवतीतिभवतेःकाए २६ य

विषयं प्रदर्शनद्वारा विचारणाख्यां द्वितीयां भूमिमाह ब्रह्मणो हीति ब्रह्मणो वेदस्य प्रतिष्ठा तात्पर्येण वस्थानं अहं
म[illegible]ल्व कर्मब्रह्मोपदर्शनद्वारा मन्तसाधनस्य अप्रमस्य अनादित्वादनंत्वाच्चापौरुषेयत्वेनाप्रामाण्यशंकाकलं
कस्पृष्टस्य स्वतः प्रमाणभूतस्यैत्यर्थः एतेनोपक्रमोपसंहारादिपर्यालोचनया वेदाविरुद्धतर्केणोपकरण
याकृत्स्नस्य वेदस्य तात्पर्यं मद्दर्शकर्मातिनिर्णीतव्यमिति विचारणाख्या द्वितीया भूमिरुक्ता हेतुफलोपद
र्शनमुखेन शुभेच्छाख्यां प्रथमां भूमिमाह शाश्वतस्येति काम्यधर्मवत्फलदानेन नाशाभावात भगवत्स

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च २७
इति भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे प्रकृतिगुण
भेदो नाम चतुर्दशोऽध्यायः १४

प्रियो नित्यो धर्मः शाश्वतः विविदिषादिपारंपर्येण मोक्षाख्यस्य शाश्वतफलहेतुत्वात शाश्वतस्य च धर्मस्य प्रतिष्ठा
परमं प्राप्यं फलमहमेव तथा एकांतिकं विषयसंगाजन्यसुखमव्यभिचारि स्वरूपभूतं मोक्षसुखं तस्यापि प्र
[illegible]काष्ठाहमेव एवं निष्कामधर्मेण विशोधितचित्तस्यैकांतिकसुखे [illegible]भवति [illegible]शुभेच्छाख्या
प्रथमा भूमिः प्रत्रपरां भूमिमारोदुमशक्तस्य पूर्वापूर्वी भूमिरूपदिश्यते यथाध्यानेनात्मनि पश्यंतीत्यत्र नि
दिध्यासनाशक्तस्य कर्मयोग उपदिश्यते तद्वत २७ इति नीलकंठीये भारतभावदीपे भीष्मपर्वणि गीतासु टीका

...ध्यायांते सुखस्यैकांतिकस्य प्रतिष्ठा परा काष्ठा हमित्युक्तं तत्र किंलक्षणं तत्सुखं केन वा प्राप्तं केन वा साधनेन प्राप्यत इत्य
...ंगके न्वातत्कारिणां तत्प्राप्यमित्यादि वर्णयितुं पंचदशोऽध्याय आरभ्यते ऊर्द्ध्वमूलमिति आनंदाध्यैव खलिमानि भूता
नि...यंते इति श्रुतिप्रसिद्धमनुष्यानंदमारभ्योत्तरोत्तरशतगुणं विवृद्धानंदसोपानपंक्तिरूपरिस्थितं परमानंदात्मानं
वस्तु ऊर्द्ध्वं तदेव मूलं मूलकारणमस्य संसाराश्वत्थस्य तमूर्द्ध्वं तदेवमूलं अधः शाखं ऊर्द्ध्वदिशोऽधःसोपानस्थानी
याः शाखा अव्यक्तमहदहंकारपंचतन्मात्राषोडशविकारादिहिरण्यगर्भविराट्प्रजापतिसुरगंधर्वासुरनरतिर्यगस्था
वररूपाः शाखा यस्य सोऽधःशाखस्तं न श्वोपि स्थातेत्य...ं अश्वत्थं संसारवृक्षं तथापि प्रवाहरूपेणानंतं अ

श्रीभगवानुवाच ऊर्द्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययं छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् १ अधश्चोर्द्ध्वं
प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके २

नादिनं तं प्राहुर्वेदाः ऊर्द्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातन इत्यादयः छंदांसि वेदास्तु उपलक्षितानि ऋचादयः पर्णा
नि पर्णसंघातवत् शोभाहेतवो यस्य तरोः तमश्वत्थं यो वेद मिथ्यात्वेन स एव वेदवित् विदितवेदार्थः अत्राश्वत्थस्वरूपके
ण संसारो वर्ण्यते १ अधश्च मनुष्येभ्यः तिर्यक् स्थावरादयः अर्वाचीनाः ऊर्द्ध्वं च मनुष्येभ्य एवोपस्थित गंधर्वप्रजापत्यादिहिरण्य
गर्भपर्यंतं प्रसृताः प्रसरं प्राप्ता तस्य शाखा गुणैः सत्वादिभिः प्रकर्षेण वृद्धा गुणवृद्धाः विषया एव रंजकतया कोमलप
ल्लवरूपाः प्रवालानि यासां ताः संसारवृक्षस्य परं मूलं ब्रह्म उक्तं अधश्च इह मनुष्यलोके तस्य मूलानि वासनारूपाणि अ
वांतरमूलानि संततानि प्रवाहरूपेण स्थितानि यतः कर्मानुबंधीनि कर्मैव धर्माधर्मात्मकं अनुबंधः पश्चाद्भावी येषां तानि कर्मा
नुबंधीनि वासनाभ्यः कर्माणि कर्मभ्यो वासना इत्यनवरतसंतानो वंवृक्षस्यार्थः २

ननु मध्योऽपि स्यान्नमन हि अश्वत्थाख्यपक्षे तूक्ते प्रतिक्षिप्तः किंनाश विज्ञानसंतानरूपोवाश्री ह्यादिवत्स्व वाहनित्योवाद्यपंसंसारस्तर्हि दुरुछेदो
[illegible]नात्मनां कर्मणांवबीजांकुरुवदन्योन्येजन्महेतुस्यावर्जनीयत्वादित्याशंक्यासत्वासत्वाभ्यामनिर्वचनीयोयमित्येतंपक्ष
माश्रित्यपरिहरति नरूपमिति रजूरगस्येवास्यरूपंतस्यगृष्टावीत्यमाणंसतन्नोपलभ्यते इहजीवत्येव देहे यथापूर्वमज्ञानं
दशायांतथानोपलभ्यते ज्ञानदशायांचास्यमषात्वेमनुभवैकवेद्यमित्युक्तं एतेनअनुपलभ्यरूपत्ववचनेनस्वप्रकाशायांनां
विज्ञानानांरूपवतांबीजादीनांचशशदृश्यत्वं वृत्तिः तर्हिशशविषाणतुल्यएवायंस्यादित्यतआहनांतोनचादिरितिउ
पाद्यानस्यमलाज्ञानस्याद्यंतशून्यत्वादन्यमकिंप्राद्यंतशून्याइत्यर्थः तर्हिअज्ञानवदपरिहार्यस्यादित्याशंक्याहनचसंप्रति
ष्टा अस्यप्रतिष्टास्थितिलयस्यानंदृदास्यभूमिरिवनास्ति नचायंब्रह्मणोविकारोयेननत्रैवलीयतेनचेष्टापतिः ब्रह्मणःको

नरूपमस्येहतथोपलभ्यते नांतोनचादिर्नचसंप्रतिष्ठा
अश्वत्थमेनंसुविरूढमूलमसंगशास्त्रेणदृढेनछित्वा ३

टस्थभंगापत्तेः किंतर्हि तुछमज्ञानमस्योपादानंतस्मिंश्च ज्ञानेनविनष्टेसमूलस्यास्योछेदोभवति अज्ञानस्यतुछत्वंतुछेनाप्यपि
हितंयदासीदितिश्रुत्वोत्तेत्कार्यस्यरज्जुरगादिप्रलयेनतदनुपलंभस्यानुभवेनचसिद्धं तस्मादस्यसंप्रतिष्टानोपलभ्यतइतियुक्तमेवो
क्तंसममस्वल्पंवासनानांअन्योन्यसुविरूढमूलंदृढंतदामूलमपिअसंगशास्त्रेणसंजोदेहादितादात्म्यबुद्धिस्तदर्जनमसंगः तेनदृ
[illegible]परिपक्वेनछित्वाततःपदंतत्परिमार्गितव्यमितिउत्तरेणान्वयः यद्यपिस्थूलसूक्ष्मयोः संसारयोरसंगः सुषुप्तौस्वयमेवजा
यतेतेनतन्मूलवासनाभिरप्यात्मनोऽसंगोनुमीयतेतथापिवासनामूलस्याज्ञानेनानुछेदात्तनासंगधीर्दृढाभवतितस्मान्नि
र्विकल्पसमाध्यभ्यासेनकारणशरीरस्याप्यसंगः साध्यः तेनवासंगशास्त्रेणास्यछेदोमूलोछेदः लवणोदकवत्तर
रगवत्प्रविलापनरूपः कर्तव्यः नतुसंख्यानामिवस्वरूपेणसतःपरिवर्जनमात्रं ३ श्रीव

२८५

ना... ममस्वरूपं छित्वा किं कर्तव्यमत आह तत इति न केवलं निर्विकल्पसमाधिना तदसंगमात्रेण कृतार्थता किं तर्हि ततो संगात्र
रं तत्श्रुतिप्रसिद्धपरं पदनीयं ब्रह्म परिमार्जितव्यं श्रुतिमुक्तिवलेनाहमेव ब्रह्मास्मीति ज्ञातव्यं यस्मिन पदे निर्विकल्पेन गताः प्राप्ताः
संतो न निवर्तंते न पुनर्निवृ- र्तंते प्रास्यनंतरं माद्यं पुरुषं पुरुषाकारीरेखापानमपि प्रपद्ये शरणागतोस्मीति भावयेत भगवन् एवाचोचन्
...वनं लोकशिक्षार्थं वर्तए वच कूर्मणीतिवत् कोसौ पुरुषः यतः पुराणी आद्याप्रवृत्तिः सो कामयत बहुस्यां प्रजायेयेति इ
...तिं रूपाप्रसृता अस्यास्वपि वृत्ताः अतो वयमपि इदानीं कामयामहे धनादिनाव पंभ्यासः स्याम प्रजाप्रजायेमहीति चेति येने

ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तंति भूयः तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः सृता पुराणी ४
निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पद
मव्ययं तत् ५

प्रवृत्तिर्दर्शिता प्रमाणेनैव सा निवर्तयिष्यत्यर्थः ४ एवं एकांतिकस्य सुखस्याच्छादकं संसाराश्वत्थं छेदकमसंगशस्त्रं चोक्त्वा तस्
य सुखस्य प्राप्त्यधिकारीं तस्य स्वरूपं चाह द्वाभ्यां निर्मानेति मानो दर्पः मोहो विपर्ययस्तद्रहिता निर्मानमोहाः जितः संगः
रूढं जित्वाभिमानः दोषो रागादिरूपैस्ते जितसंगदोषाः अध्यात्मनित्या निष्ठावंतः आत्मध्यानपरा इति यावत् विनिवृ
त्ताः कामाः त्यक्तसर्वपरिग्रहा द्वंद्वैः सुखदुःखेति उपलक्षणं शीतोष्णादीनामपि तैर्विमुक्ताः यतोऽतस्ते तिद्वावंत इत्य
र्थः अमूढा अविद्यानाशं कृतवंतः तत्पदं अव्ययं अपुनरावृत्तिं गच्छंति ५

भ०
गी०
१०६

ननु यदि तदूर्ध्वपदं गच्छंति तर्हि ततः पातोप्यवश्यंभावी पतनांताः समुच्छ्रया इति न्यायात् तत्र तस्य यस्मिन् गता न निवर्तंतीत्यनुपपन्नमित्याशं
क्य तस्य पदस्य स्वरूपमाह न तदिति तत् सूर्यो न भासयति रूपादिहीनत्वेन चक्षुरयोग्यत्वात् एतेन सर्वेषां बाह्येंद्रियाणां नि
वृत्तिः प्रदर्शिता रूपादिविषयं तस्य सूर्येण चक्षुरनुग्राहकेन भास्यं इदं तु न तथेत्यर्थः न शशांकश्चंद्रोपि न भासयति यन्मनोग्राह्यं व
स्तु तच्चंद्रेण मनसोनुग्राहकेन भास्यं इदं तु न तथा यन्मनसा न मनुत इति श्रुत्या अस्य मनोग्राह्यत्वनिषेधात् नापि पावकः भास
यति यद्वाचा ग्राह्यं तत् तदनुग्राहकेन पावकेन वाच्यं इदं तु तथा न यद्वाचानभ्युदितमिति श्रुत्या अस्य वाग्गोचरत्वनिषेधात्
न चक्षुषा गृह्यते नापि वाचेत्यादिश्रुत्यंतरे च यतश्च सर्वमनोवाचागम्यं तेन स्थूलसूक्ष्मस्य कारणप्रपंचातीतं प्रत्यगद्वयं
नांतःप्रज्ञं न बहिःप्रज्ञमित्यस्थूलमनण्वित्यादिश्रुतिभिः सर्वविशेषाविहितं यत्प्रतिपादितं तत् परमं धाम वृत्ति
रूपज्ञानादपरमा[illegible]ज्योतिश्चिन्मात्रं मम मे इति संबंधो राहोः शिर इतिवत् उपचारात् मद्भिन्नं ज्योतिः स्वयंप्रकाशमित्यर्थः

न तद्भासयते सूर्यो न शशांको न पावकः यद्गत्वा न निवर्तंते तद्धाम परमं मम ६

अत एव यद्गत्वा प्राप्य ज्ञात्वेत्यर्थः न निवर्तंते निवृत्तिकारणस्य मूलाज्ञानस्याभावात् एवं व्याख्याय यदा ह्येवैष एतस्मिन्नदृश्ये
अनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदतेऽथ सोऽभयं गतो भवतीति श्रुत्यर्थानुगमो दृश्यते अदृश्ये इति दृग्योग्यत्वेन सूर्यभा
स्यत्वं परिदृश्यते अनात्म्ये आत्मनो मनसो योग्यं आत्म्यं तदन्यच्च अनात्म्यं इति मनसोप्ययोग्यत्वेन चंद्रभास्यत्वं निरस्यते अ
निलयने विलीयतेऽस्मिन् सर्वं स्थूलसूक्ष्ममिति निलयनं कारणं तद्भिन्नेऽत एवानिरुक्ते निर्वचनायोग्ये वागगोचरे इत्य
र्थः तेन पावकाद्यभास्यत्वाद् इति सिद्धं येन सूर्यादिप्रकाशं अर्चिरादिमार्गगम्यं सत्यलोकादप्युपरितनं प्राकृतं वैष्णवं पदं नित्यं दे
शांतरेऽस्तीति तद्गत्वा पुनर्नैव निवर्तंत इति व्याचक्षते तेषां न रूपमस्येह तथोपलभ्यत इति दृश्यत्वेन च्छित्त्वा देवतादृश्यस्या
नित्यत्वमपरिहार्यं दृश्यत्वाविशेषात् तस्माद्यथोक्त एव श्लोकार्थः ६ ६ ॥

श्री
१०६

नन्वादित्यादिसर्वावभासकज्योतिरूपस्त्वं क्षेत्रज्ञं चापि मां विद्धीति स्वस्यैव क्षेत्रज्ञत्वं ब्रूषे तर्हि क्षेत्रज्ञस्य सतः तव घटादिप्रकाशे किमिति
सूर्याद्यपेक्षा दृश्यते न हि यः सस्वयंज्योतिरूपः स्वविषयावभासने ज्योतिरंतरमपेक्षते दीपादिवद्दर्शनादित्याशंक्याह त्रिभिम
मेवेति यत ईश्वरो जगत्स्रष्टा शरीरं यदवाप्नोति स एव तदनुप्रविष्टः प्राणस्वाग्रेभ्यः तत्सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुति
भ्यः ईश्वर एव शरीरधारीति तथा यद्यस्मात् हेतोः अपिशब्दो व धारणार्थश्च समुच्चयार्थः कस्मिन्न्वहमुत्क्रान्ते उत्क्रान्तो भवि
ष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति श्रुतेः प्राणिधारणेनोपाधिनाऽईश्वर एव चतुत्क्रामतीति ततो हेत
रूपात् जीवलोके संसारे यो जीवभूतः प्राणैस्सनातनः सर्वदैकरूपोऽहमेवेति वक्ष्यमाणयाऽग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्ये
वमेवैतस्मादात्मनः सर्व एव प्राणा व्युच्चरंतीति वह्नेर्विस्फुलिंगा यथा तन्ममैवांशा इत्याशयेनाभिसंधायोक्तिः यद्यपि वह्नौ भेदः प्रतिभा

ममैवांशो जीवलोके जीवभूतः सनातनः मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ७ शरीरं यदवा
प्नोति यच्चाप्युत्क्रामतीश्वरः गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ८

णौ च स्वगतेन दृश्यते तथा त्वयाधिगतमेव तद्द्वभयं तत्राप्युपचर्यते अस्मादग्नेर्भिन्नेऽग्नेर्यमनस्य स्फुलिंग इति यस्मादल्पइ
ति एवमस्य लमनन एव हृस्वमदीर्घमिति श्रुतिश्चतुर्विधपरमाणमस्यैव ब्रह्मणो ममैवांशा इति ग्रंथांशो सिनाविनद्धेद्दात
मत्वमहत्त्वे चोपचारादौपाधिके पते तथा च श्रुतिः बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्ट इति समः सर्वेण समो मस
केन समो नागेन सम एव एभिस्त्रिभिर्लोकैरिति च यथा च विस्फुलिंग वह्नेरेव न तु वह्नेर्भ्रंशः एवं जीवोऽपि ब्रह्मैव न तु ब्रह्मांशः
ब्रह्म दासा ब्रह्म तेकितवा उतेति दासादिषु पिंडेषु जीवस्यैव कृत्स्नेन एकैकस्मिन्ब्रह्मभावपरिसमाप्तिदर्शनात् निरंशोप्रा
च्छिकल्पना यान्त्र्योगाद्वस एवं जीवबन्त ईश्वरो ममैवांशादुर्वाशो रूपमेदो मनः षष्ठं येषु तानि मनसा सह षडिंद्रियाणि
प्रकृतिस्थानि इंद्रियाणां स्वभावादविषयप्रावण्यं तत्रास्थितानि कर्षति सुप्तिप्रलयसमाधिकालेषु संकोचयति तथैतो
न्यदशात्पात्स्वाल्पस्यानात् गृहीत्वा संयाति विषयदेशं प्रतिगच्छति प्रबोधसर्गव्युत्थानकालेषु तत्र दृष्टांतः वायुर्गंधानिवा

ग

२१८

गी॰ भा॰
१०७

कानि तानि मनःषष्ठानि तानि गृहीत्वा चायं किं करोतीत्यत आह श्रोत्रमिति अधिष्ठाय व्याप्य वर्तित्वा विषयान् शब्दादीन् उप
भुंक्ते प्रकाशयतीत्यर्थः यथा दीपः स्ववृत्तिलाभाय तैलवर्त्याद्यपेक्षमाणोपि स्वविषयावभासने स्वयमेव प्रभुः एवं जीवो घटाकार
वृत्तिलाभाय मनःषष्ठानींद्रियाणि स्पर्शादींश्चापेक्षते तथापि घटावभासं स्वयमेव करोति तेतराणि इंद्रियस्पर्शादीनि स्व
भास्यत्वात् तैलवर्त्यादिवदित्याशयः ९ तमेवंभूतं मनःषष्ठानींद्रियाणि चाधिष्ठाय तेषामुत्क्रमणेनोत्क्रामंतं वा
स्थितं तन्निष्ठं तं तेषां भोगेन भुंजानं तेषां सत्त्वरजस्तमोगुणयुक्तत्वेन गुणान्वितं घटाकाशमिव घटगमनैर्दिशां गमनादि न

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च अधिष्ठाय मनश्चायं विषयानुपसेवते ९
उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितं विमूढा नउपश्यंति पश्यंति ज्ञानचक्षुषा १०
यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितं यतंतोप्यकृतात्मानो नैनं पश्यंति चेतसः ११

नैतं स्वतस्तूत्क्रमणादिस्वरूपमपि विमूढास्त्वविवेकरूपेणानुपश्यंति ज्ञानचक्षुषस्तु पश्यंति उपाधेरेवोत्क्रमणादिकं न तु
परिहितस्यात्मन इति ज्ञानं तस्येवेत्यर्थः १० यतंतो यत्नशीला योगिनश्चैनमात्मनि बुद्धौ अवस्थितं विनुमुक्तोत्सादिवि
हीनं अप्रसंगं पश्यंति यतंतोपि अकृतात्मनो यज्ञादिभिरशोधितचित्तास्तं न पश्यंति यतः अचेतसः अनिर्जितचि
त्ता पाषाणतुल्या इत्यर्थः ११

शिव

कथं तर्हि सूर्यादीनामपि भासकत्वं लोके दृश्यते तदपि मदाश्रयादेवेत्याह यदादित्येति अत्रात्मादिपदैः करणाधिष्ठात्र्यो
देवतास्तदधिष्ठेयानि करणानि च तंत्रेणैव गृह्यंते पदाधिष्ठातृषु तदधिष्ठेयेषु वा चक्षुरादिकरणेषु च गतं यत्प्रमाणं तेजो वि-
षयप्रकाशनसामर्थ्यं तत्तेजो मामकं मदीयं विद्धि येन सूर्यस्तपति तेजसेद्धः येन चक्षुः पश्यतीत्यादिश्रुतिभ्यः एवं
मनश्चंद्रमसोर्यदंतरप्रपंचप्रकाशनसामर्थ्यं तदपि मामकमेव तथापि वागग्न्योः सर्वं जगद्भासयते अश्च व्याकृत्यादि
विषयप्रकाशनसामर्थ्यं तदपि मामकमेवेत्यर्थः अखिलं योजनास्पृष्टा ॥१२॥ न केवलमादित्यादिगतं प्रकाशनसामर्थ्य
मामकं अपि तु पृथिव्यादिगतं भूतधारणाद्यायनसामर्थ्यमपि मदीयमेवेत्यर्थः गामिति गां पृथिवीमाविशन्नाधि-
कृत्वा भूतानि अहमेव धारयामि ओजसा बलेन अन्यथा पृथिवी सिकतामुष्टिवद्विदीर्येत तथा च मंत्रवर्णः येन द्यौ-

यदादित्यगतं तेजो जगद्भासयतेऽखिलं यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं ॥१२॥ गामाविश्य
च भूतानि धारयाम्यहमोजसा पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥१३॥ अहं वैश्वानरो
भूत्वा प्राणिनां देहमाश्रितः प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधं ॥१४॥

ह रुग्रा पृथिवी च दृढेति स दाधार पृथिवीमिति च तथाहमेव सोमो भूत्वा रसात्मको जलात्मकः रसो अमृतं रसो हि अस्य नेकार्यमम-
लमयो भूत्वा सर्वा ओषधीः पुष्णामि विवर्धयामि पुष्टिकरोमि सोमो हि सर्वरसानां प्रवेशेन सर्वा ओषधीः पुष्णातीति
॥१३॥ अहं वैश्वानरो जाठरोऽग्निर्भूत्वा प्राणिनां सर्वेषां देहमाश्रितः सन् प्राणापानाभ्यां वायुभ्यां समायुक्तः सन् भुक्तं
न चतुर्विधमन्नं दर्शयेन भक्ष्यं दंतखाद्यं अपूपादि जिह्वया विलोड्य लेह्यं पायसादि लिह्य गुडशर्करादि चोष्यं निष्पीड्य चूष्य
उपमानं स्तनंदुआदि एतेन सर्वत्र सर्वा शक्तिर्या दृश्यते सा मदीयैवेति भावः तदेवं भोक्ता वैश्वानरोऽग्निर्भोज्यमन्नं सोम
स्तदेतदुभयमग्नीषोमौ सर्वमिति पश्यतो न दोषलेपो न भवतीत्यपि द्रष्टव्यं ॥१४॥

किंचसर्वस्यप्राणिजातस्याहंहृदिसंनिविष्टअंतर्यामीत्यर्थः अतोमत्तश्चात्मनस्तेषांस्मृतिर्ज्ञानंचपुण्यवतांपापिनांतुतदपो
पोहनंविस्मरणंमत्तःज्ञानंचभवतीत्यर्थःसर्वैर्वेदैः कर्मोपास्तिज्ञानकांडात्मैरहमेवपरमात्मावेद्योवेदांतोक्तविद्या
संप्रदायकृत वेदवित् वेदार्थविच्चाहमेवएतेनवेदांतविहितविद्यस्यसर्वज्ञभूतिरित्युक्तंभवति १५ सर्वशास्त्रहृदय
संगृह्णातिद्वावितिलोकेप्रसिद्धौइमौद्वावेवपुरुषौक्षरोविनाशीसचसर्वाणिभूतानिप्राणिवंतिकर्मरूपकेवं
उपाधिनाशमनुविनाशशीलोजीवोब्रह्मप्रतिबिंबभूतोजलार्कोयमः प्रज्ञानएवैतेभ्योभूतेभ्यःसमुत्था

सर्वस्यचाहंहृदिसन्निविष्टोमत्तःस्मृतिर्ज्ञानमपोहनंच वेदैश्चसर्वैरहमेववेद्योवेदांतकृद्वे
दविदेवचाहं १५ द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच क्षरःसर्वाणिभूतानिकूटस्थोक्षर
उच्यते १६ उत्तमःपुरुषस्त्वन्यः परमात्मेत्युदाहृतः योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः १७

न्येवानुविनश्यतीतिश्रुतेः कूटस्थोनिर्विकारोमायोपाधिरक्षरः तदुपाधेरकर्मजत्वेननाशासंभवात्उपाधिदोषेणाव
शीकृतत्वाच्चसोनरहतिस्वरूपान्नचावर्ततेइत्यक्षरः १६ एताभ्यांकार्योपाधिकारणोपाधिभ्यामन्योनित्यशुद्धस्वरूपः
पुरुषः योसौपरमात्मेतिउदाहृतः शास्त्रेयोसौमायापाईश्वरोभूत्वालोकत्रयंउत्तममध्यमाधमशरीररूपंआ
विश्यधारयतिशरीरत्रयंअयोपिअव्ययः सर्वज्ञत्वेनईश्वरधर्मत्वेनजीवधर्मेणवाणवीतिवर्धतेक्षीयते
वेत्यर्थः १७

श्रीद

यस्मादिति क्षरं उपाधिमतीतोऽप्रतिक्रमं स्थितोऽहं अतोऽहं अक्षरादपि उत्तमः उत्कृष्टतमः जडः क्षररूपः उपाधेः उत्कृ
ष्टस्तदुपहितो जीवश्चेतनत्वात् ततोऽप्युत्कृष्टतरो मायोपाधिः स्वतंत्रत्वात् ततोऽप्युत्कृष्टतमो निरुपाधिः अनागंतुक
रूपत्वात् अन्यत्स्पष्टार्थः स्पष्टः १८ एतद्विज्ञाने फलमविभक्तिरेवेत्याह योमामिति असंमूढः मम पुरुषोत्तमत्वे संशय
विपर्यासादिहीनः स एव सर्ववित् य एतं मां पुरुषोत्तमं जानाति तत्फलं च मां सर्वभावेन सर्वात्मना सर्वप्रकारैर्भजं
ति १९ अस्मिन्नध्याये भगवत्तत्त्वज्ञानमोक्षफलमुक्त्वा इदानीं तत्स्तौति इति एतत् गुह्यतमं अत्यंतरहस्यं

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः १८ यो मामेवमसं
मूढो जानाति पुरुषोत्तमं स सर्वविद्भजति मां सर्वभावेन भारत १९ इति गुह्यतमं शास्त्रमिदमुक्तं मया
नघ एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत २० इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पंचदशोऽध्यायः १५

शास्त्रं यद्यपि इदं पंचदशाध्यायीकृत्स्नं शास्त्रं तथापि अस्मिन्नध्याये कृत्स्नस्य शास्त्रार्थस्य प्रदर्शनात् इदमपि शा [illegible]
अत्र हि कार्यकारणविभागः संसारवृक्षस्य अनित्यत्वं भगवतो विभूतयः यस्तं वेद स वेदवित् वेदैश्च सर्वैरहमेव वे
द्योऽहं इत्यादिना सर्वः शास्त्रार्थः दर्शितोऽस्ति इदं मया उक्तं हे अनघ निर्व्यसन रहस्यं बुद्ध्वा बुद्धिमान् ज्ञानी स्यात् आत्माव
बुद्ध्वेतावता कृतकृत्यः सर्वं हि कृत्यं परमात्मावगतिपर्यंतं तत्रैव कृत्स्नपुरुषार्थसमाप्तेः स्यात् भवति नातः परं कर्तव्यम
वशिष्यते इत्यर्थः इति नैलकंठीये भारतभावदीपे भीष्मपर्वणि भगवद्गीतार्थप्रकाशे पंचदशोऽध्यायः १५

नवमेऽध्याये राक्षसी आसुरी दैवी चेति तिस्रः संपद उक्ताः तासु राक्षसीमासुर्यामेवांतर्भाव्य द्वे एव संपदावत्र प्रस्तूय-
घेते द्वया ह प्राजापत्या देवाश्चासुराश्चेति श्रुतेः अभयंसत्वसंशुध्यादिलक्षणो दैवाः दंभदर्पाद्यावृत्तयोऽसुरा
इति द्वैराशिदर्शनात् पूर्वाध्यायांते सदसत्कर्मयानयोः तत्स्वरूपं संबोधयतः अनघत्वे दैवसंपत्तिमत्त्वं तद्विपर्ययत्वासुरीसंपदि-
ति दर्शयितुं श्रीभगवानुवाच अभयमिति अभयं संत्रासोच्छेदबुध्यभावः सत्वसंशुद्धिः चित्तनैर्मल्यं ज्ञानं श्रवणादिजं यो-
गात्मानुसंधानं च तयोः प्रणिधाय व्यवस्थितिः निष्ठा एषा मुख्या दैवी संपत् दानं यथाशक्ति संविभागोऽन्नादीनां दमो बा-
ह्येंद्रियनियमः यज्ञः श्रौतस्मार्तादि स्वाध्यायो वेदाध्ययनं तपो वक्ष्यमाणलक्षणं शारीरादि त्रिविधं आर्जवं ऋजुत्वं
सर्वदा १ किंच अहिंसा प्राणिपीडावर्जनं सत्यं अप्रियानृतवर्जनं यथाभूतार्थभाषणं अक्रोधः परैराकुष्टस्यापि तत्स-

क्रोधस्योपशमनं त्यागः सर्वकर्मसंन्यासः पूर्वं तस्योक्तत्वात् शांतिः अंतःकरणोपशमः पैशुनं तद्वर्जनमपैशुनं तथा दुःखि-

श्रीभगवानुवाच अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः दानं दमश्च यज्ञश्च स्वाध्यायस्तप
आर्जवं १ अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनं दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलं २
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता भवंति संपदं दैवीमभिजातस्य भारत ३

तेषु भूतेषु कृपा अलोलुप्त्वं इंद्रियाणां विषयसंनिधावप्यविक्रिया मार्दवं मृदुता ह्रीः लज्जा अचापलं असति प्रयोजने वाक्पा-
णिपादादीनां विक्रियाराहित्यं किंच तेजः प्रागल्भ्यं न त्वग्मता क्षमा आक्रुष्टस्य ताडितस्य वांतर्विक्रियानुत्पत्तिः उत्पन्ना-
नां विक्रियाणां देहेंद्रियेष्ववसादं प्राप्तेषु तस्य प्रतिबंधकोंऽतःकरणवृत्तिविशेषो यया उत्तंभितानि देहादीनि नावसीदंति शौ-
चं द्विविधं मृज्जलाभ्यां बाह्यं आभ्यंतरं मनोवृत्तेर्नैर्मल्यं मायारागादिकालुष्याभावः नातिमानिता अत्यंतं मा-
नराहित्यं एतानि अभयादीनि दैवीं सत्वप्रधानां संपदं अभिलक्ष्य जातस्य स्वभावतो भवंति हे भारत ३

अथेदानीं रजस्तमोमयीं आसुरीं संपदं दर्शयति दंभ इति दंभो धर्मध्वजत्वं दर्पः धनाभिजननिमित्तश्चित्तोत्सेकः अभिमानः आत्मनि पूज्यत्वबुद्धिः क्रोधः प्रसिद्धः पारुष्यं निष्ठुरभाषणं अज्ञानं अविवेकजनितो मिथ्याप्रत्ययः एतेऽप्यासुरीं संपदमभिलक्ष्य जातस्य भवंतिहेपार्थः ४ अनयोः संपदोः कार्यमाह दैवीति पूर्वोक्ता अर्जुनस्य शंकां किमहमासुर्यां संपदि जातोस्मीति तामपनुदति माशुच इति ५ द्वौ द्विसंख्यौ भूतसर्गौ भूतानां स्वभावो मे मद्वचनात् शृणु ६ प्रवृत्तिं विधिवाक्यं निवृत्तिं निषेधवाक्यं न विदुः धर्माधर्मयोरिष्टानिष्टहेतुत्वज्ञानरहिता इत्यर्थः ७ असत्यं सत्यवर्जितं जगत्प्राणिजातं तथा

दंभो दर्पोभिमानश्च क्रोधः पारुष्यमेव च अज्ञानं चाभिजातस्य पार्थ संपदमासुरीं ४ दैवी संपद्विमोक्षाय निबंधायासुरी मता माशुचः संपदं दैवीमभिजातोसि पांडव ५ द्वौ भूतसर्गौ लोकेस्मिन् दैव आसुर एव च दैवो विस्तरशः प्रोक्तः आसुरं पार्थ मे शृणु ६ प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः न शौचं नापि चाचारो न सत्यं तेषु विद्यते ७ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं अपरस्परसंभूतं किमन्यत्कामहैतुकं ८ एतां दृष्टिमवष्टभ्य नष्टात्मानोल्पबुद्धयः प्रभवंत्युग्रकर्माणः क्षयाय जगतोहिताः ९

प्रतिष्ठं धर्माधर्मरूपा प्रतिष्ठा आश्रितयस्तत्तथा अनीश्वरं अनियंतृकं आहुः अपरस्परसंभूतं अपरस्पराक्रियायाः संप्रदूतिसृष्टवीजांकुरवत्परस्परकारणीभूतानां धर्माधर्मातद्वासनानां पत्सात्तत्संतस्मात्संजातं किमन्यल्लोकेस्ति न किंचिदपि अ माधपेक्षं वउत्पत्तौ किंतु सर्वं कामहैतुकं स्त्रीपुंसयोर्मिथुनीभावः कामस्तदुत्थस्वभावादेव जंतुर्जायते न त्वदृष्टादीत्यर्थः ८ एतामनुपदोक्तां लोकायतिकानामभिप्रेतां दृष्टिं अवष्टभ्य तामाश्रित्य नष्टात्मानः कामादिवसत्वेन नष्टधीयोपि पत्नोल्पेऽदृष्टसुखे एव बुद्धिर्येषां ते अल्पबुद्धयः अहिताहिंस्राः ९

असद्ग्राहान् वश्याकर्षणनिधिंजनकायसिध्यादिसाधनेषु असमीचीनेषु ग्राह्याः निर्बंधात् तांस्तान् अभिनिवेशपात् गृहीत्वा अशुचीनि मद्यमांसादीपापेत्याणि व्रतानि नियमविशेषा येषां ते तथाभूताः संतः कुमार्गप्रवर्तनेन प्रवर्तनेन ठात् सपायेति संवंध: १० चिंतायोगक्षेमाविषयां प्रलयांतामरणावधिं एतावत देह एवात्मा कामभोग एव पुरुषार्थ इतो पन्नास्तीति निश्चिता निश्चयवंतः तथाल्वार्हस्पत्यसूत्रं चैतन्यविशिष्टःकायः पुरुषः काम एवैकः पुरुषार्थ इतिच ११ अन्या

काममाश्रित्य दुपूरं दंभमानमदान्विताः मोहाद्गृहीत्वासद्ग्राहान् प्रवर्तंतेऽशुचिव्रताः १० चिंतामपरिमेयांच प्रलयांतामुपाश्रिताः कामोपभोगपरमा एतावदिति निश्चिताः ११ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ईहंते कामभोगार्थमन्यायेनार्थसंचयान् १२ इदमद्य मया लब्धमिदं प्राप्से मनोरथं इदमस्तीदमपि मे भविष्यति पुनर्धनं १३ असौ मया हतः शत्रुर्हनिष्ये चापरानपि ईश्वरोहमहं भोगी सिद्धोहं बलवान् सुखी १४ आढ्योभिजनवानस्मि कोन्योस्ति सदृशो मया यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः १५

येन परवंचनादि अर्थसंचयान् धनराशीन् ईहंते लिप्संति आशापाशान् विवृणोति इदमद्येति १३ क्रोधपरायणत्वं कामपरायणत्वं च स्वैर्ति दाभ्यामाह असाविति ईश्वरः समर्थः सर्वेषां निग्रहे सिद्धः लब्धाखिल भोगसाधनो बलवान् विषयोपभोगसमर्थः अत एव सुखी १४ आढ्यो धनी अभिजनवान् कुलीनः अज्ञानेनाविवेकेन मोहिता विविधं भ्रमं प्रापिताः १५

श्रीव

अहंकारो हमेव सर्वश्रेष्ठ इति बुद्धिः बलं शारीरं ज्ञातिधनाभिजननिमित्तेच दर्पं परावज्ञां कामं क्रोधं च संश्रिताः

अनेकं नास्ति एवं चिन्तनीयं पस्यतत् अनेकं वस्तुषु विषयेषु पूर्वोक्तेषु लग्नं चित्तं येषां ते अनेकचित्ताः तेच ते विभ्रांता
श्च किमिदमादौ साधनीयमिदमादौ साधनीयमिति विशेषेण भ्रान्त्याकुलाः अनेकचित्तविभ्रान्ताः मोहो ऽसत्स्व
पि सद्बुद्धिः तदेव जालं तेन आवृताः प्रसक्ताः प्रकर्षेण लग्नाः अशुचौ विरामूत्रादिमये १६ आत्मनैवात्मानं
मन्यन्ते ते आत्मसंभाविताः स्तब्धाः अप्रणताः धननिमित्तो मानो गर्वो मदो मत्तता ताभ्यां अन्विताः धनमानमदान्वि
ताः नामयज्ञैर्नाममात्रैर्यज्ञैः दंभेन धर्मध्वजितया अविधिपूर्वकं यथोक्तधनदानं स्वल्पमात्विकपन्न्यादिशुद्धि

अनेकचित्तविभ्रांता मोहजालसमावृताः प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ १६ आत्म
संभाविताः स्तब्धा धनमानमदान्विताः यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकं १७ अहंकार
बलं दर्पं कामं क्रोधं च संश्रिताः मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः १८ तानहं द्विषतः क्रू
रान् संसारेषु नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु १९

रहिता यजंते ७ मां सर्वदेहेषु आविष्टं आत्मदेहे स्वदेहशोषणेन कर्षयंतः शरीरस्थं भूतग्राममचेतसमाचैवांतः
शरीरस्थं तान्विद्ध्यासुरनिश्चयानिति वक्ष्यमाणात् स्वपरदेहे च हिंसादिना प्रद्विषंतः अभ्यसूयकाः सर्वत्र गुणे
षु समादिषु असत्त्वादिलक्षणं दोषमारोपयंतः १८ तेषां फलमाह तानिति सर्वभूतसमोऽप्यहं तान् वेदोक्त
शासनातिगान् भूतद्रोहकृतः अहमेतदात्मानं न तटस्थोऽपनमेवैषम्यं स्यात् पूर्वपूर्वसंस्कारानेतनथैव पापं
कुर्वंति दैतेन स्वल्पं फलं च प्राप्नुवंतीत्यर्थः १९

आसुरीयोनिप्राप्तेरपिफलमाह आसुरीमितिअधमांनारकीतिर्यक्स्थावरादिरूपंवा २० संक्षेपमासुर्याःसंपत्तेराह
त्रिविधमिति २१ कामादिपरित्यागेकिंस्यादतआह एतैरितितमोद्वारैः तमसोनरकस्यदुःखमोहात्मकस्यद्वार
भूतैर्विमुक्तःसन्नात्मनःश्रेयःकल्याणंभगवदाराधनादिकंआचरतिततश्चपरांगतिंमोक्षंयातितस्मात्कामादि
त्रयंत्यजेदिति २२ नकेवलंकष्टेनपरित्यक्तकामादित्यागमात्रेणउच्छास्त्रवर्तीसिध्यतीत्याहयइतिशास्त्र

आसुरीयोनिमापन्नामूढाजन्मनिजन्मनि मामप्राप्यैवकौंतेयततोयांत्यधमांगतिं २०
त्रिविधंनरकस्येदंद्वारंनाशनमात्मनः कामक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेत २१
एतैर्विमुक्तःकौंतेयतमोद्वारैस्त्रिभिर्नरः आचरत्यात्मनःश्रेयस्ततोयातिपरांगतिं २२
यःशास्त्रविधिमुत्सृज्यवर्ततेकामकारतः नससिद्धिमवाप्नोतिनसुखंनपरांगतिं २३

विधिंशास्त्रेणइष्टसाधनतयानिष्टसाधनतयाचज्ञापितंब्राह्मणोयजेतनसुरांपिबेदित्यादिनाविहितं।
निषिद्धंचउत्सृज्यविहितमकरणेननिषिद्धंआचरणेनचउत्सृज्ययोवर्त्ततेकामकारतःइच्छयासससिद्धिं
चित्तशुद्धिंसुखवैराग्यादिजनितांतृप्तिंपरांगतिंमोक्षंचनावाप्नोति २३

श्रीव
११९

यस्मात् शास्त्रातिक्रमः सिध्यादिकं नु पंनाप्नोतीति तस्मात्तेन वा सिध्यादिकामस्य शास्त्रमेव प्रमाणं किं कार्यं किं न कार्यमिति व्यवस्थायां एवं तावत् शास्त्रं इदं कर्तव्यमिदं न कर्तव्यमिति शास्त्रे वेदस्मानस्य विधानं च दुर्लंघितं प्रतिसमाधानं अग्निहोत्रादिकरणे ५ पंदोषस्तत्परित्यागार्थमिदं कृच्छ्रादिकं प्रायश्चित्तं ब्रह्महत्यादिकरणे ऽपंदोषस्तत्परिहारार्थमिदं वा स्वस्वमे धादि प्रत्ययप्रायश्चित्तं शास्त्रे च विधानं च तानुक्तं कर्म इह मनुष्यलोके कर्तुमर्हसि लोकांतरे कर्मस्वनधिकारं दर्शयितुमिह इत्युक्तं तदेवं शास्त्रानुवर्तिन एव चित्तशुध्यादिकं नान्यस्येति सिद्धं २४ इति नैलकंठेये भारत भाव दीपे भीष्मपर्वणि गीतार्थप्रकाशे षोडशोध्यायः १६ तस्माच्छास्त्रं प्रमाणं त इति प्रश्नवीजमुपलभ्यार्जुन उवाच य इति ये पुरुषाः शास्त्रविधिं शास्त्रपदेनात्र श्रुतिस्मृतिशिष्टाचार कुलाचारा गृह्यंते सर्वेषां धर्मे प्रमाणं

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि २४ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे देवासुरसंपद्विभागो नाम षोडशोध्यायः १६ अर्जुन उवाच ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः १

त्वात् ... ये विधिर्विधेयं तदुत्सृज्य सर्वात्मनापरित्यज्य यजंते ऽस्त्र यंते तानत्कूपादीनमपि न्वा कृतोयं कूपो गंगाशतादप्यधिको ऽत्रैव स्नानपानावगाहनानु पारिचर्यप्रदक्षिणप्रक्रमत्वादेतत्सेवनादिहमिदं फलमवश्यं प्राप्स्यामीति दृढतरया श्रद्धयान्विताः संतः तेषां निष्ठा इयं का कीदृशी किं सत्वं सात्विकी वापि अत्र कूपे श्रद्धाधिकयदर्शनात् किं रजः राजसी वा तेषां निष्ठा शास्त्रातिक्रमेण कामकरत्वसत्वात् आहो इति प्रश्ने किं तमः तामसी वा सा निष्ठा रोगे रजत धीयि वाशास्त्रीयाग्रत्येम हत्वंबुद्धेर्विषयाहृत्यायाः दर्शनात् पदर्पितुमाख्येन्द्र व्यवहारदर्शनादेवश्रद्धानत पादेवादीन् यजंत इत्युक्तं तत्राविविगी

एवंसमान्यतः पृष्टेसामान्यमेवोत्तरंश्रीभगवानुवाचत्रिविधेतिस्वभावः प्रागभावीयोधर्माधर्मोत्ततोजातास्वभावजापूर्वदिष्टःभावी
सात्विकोदेवताद्यर्जनादिधर्मोऽनेनानुष्ठितस्तर्हितस्यश्रद्धासात्विकीएवश्रद्धाभवतियदिराजसोयक्षादिपूजारूपस्तर्हिराजसीएव
यदितामसोभूतप्रेतादिपूजारूपस्तर्हितामसीश्रद्धाभवतिएवंत्रिविधाश्रद्धादेहिनांदेहाभिमानवतांभवतितांमयाव्याख्या
स्यमानांशृणु २ ननुश्रद्धावितोमत्वात्मनोवात्मानंपश्येदितिश्रद्धायाज्ञानदर्शनसाधनेषूंतरंगत्वमुच्यतेकथंतस्या
राजसत्वंचोच्यते दृत्याहसत्वेतिश्रीकर्मसंस्कारोपेतंयादृशंबुद्धिसत्वंसात्विकंराजसंतामसंवातदनुरूपैवसात्वि
क्यादिरूपदेवतादिपूजासुफलापत्रेयंभावनिश्चयाश्रद्धापिभवति तथायंपुरुषोपिश्रद्धामयः श्रद्धाप्रधानोयोपद्ध

श्रीभगवानुवाच त्रिविधाभवतिश्रद्धादेहिनांसास्वभावजा सात्विकीराजसीचैवतामसीचेतितांश्रृणु
२ सत्वानुरूपासर्वस्यश्रद्धाभवतिभारत श्रद्धामयोयंपुरुषोयोयछ्रद्धःसएवसः ३

योयोयश्रद्धयोपेतःसएवसइतिसात्विकश्रद्धायाउपेतः सात्विकः एवंराजस्याराजसस्तामसस्यातामसइति
एवंसतियदितातकूपभक्तःपूर्वपुल्यवशात्तदेवबन्मन्यतेतर्हितंसात्विकंपुंडरीकमिवदेवाअनुगृह्णंतिनित्यकर्मत्या
गनिमित्तमपिदोषमेस्याप्यनुदेतियदित्वेतामंवत्तंत्रादिनासिद्धंपूर्ववासनावशात्यक्षादिरूपंमन्यतेतदातंयक्षाए
वानुगृह्णंतिनास्यकामकएवतोनित्यकर्मत्यागजंदोषमपनेतुमर्हंतिनहिदेवतापराधीयक्षोस्त्यातुंशक्यतेयदित्व
तंप्रेतः पितामत्कुटुंवमावाधिष्टेतिसर्वंधर्मंत्यक्त्वाएनमस्याप्रियंकूपेपूजयामीतिमन्यतेतदातंपितरीप्रेतत्व
बुद्धियोगाद्विपर्यस्तंतदासंप्रेताएवानुगृह्णंतिदुःखभोगैःदेवाश्चनरकेपातयंति ३

एतदेवं कल्प्यते यस्मात्तस्मात्सात्विकादयो देवादीनेव यजंते इत्याह यजंत इति यजंते पूजयंति ४ सात्विकानां दंभ्य
मानि प्रेत्याह अशास्त्रेति शास्त्रं वेदादि तद्विरोधिना कौलिगाद्यागमेन विहितं घोरं स्वमांसहोमेन ब्राह्मणलोहिता दि
ना वा देवतासंतर्पणरूपात्मकं ये जनाः तपस्तप्यंते तानासुरनिश्चयान्विद्धीति द्वयोः संबंधः दंभो धर्मध्वजित्वं
अहंकारः अस्मिन्नूर्जितबुद्धिः ताभ्यां संयुक्ताः कामरागो विषयाभिलाषः बलं साहसेनापि विषयसाधनेऽ
साहः ताभ्यामन्विताः ५ कर्षयंतः कृशं कुर्वंतः भूतग्रामं कारणसमूहं अचेतसो मूढाः मां चैवांतः शरी

यजंते सात्विका देवान्यक्षरक्षांसि राजसाः प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ४ अ
शास्त्रविहितं घोरं तप्यंते ये तपो जनाः दंभाहंकारसंयुक्ताः कामरागबलान्विताः ५ कर्षयंतः शरी
रस्थं भूतग्राममचेतसः मां चैवांतः शरीरस्थं तान्विद्ध्यासुरनिश्चयान् ६ आहारस्त्वपि सर्वस्य त्रि
विधो भवति प्रियः यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ७

रस्थं भोक्तृशरीरांतःस्थं मां परमेश्वरं वा भोगस्य शरीरस्य कृशीकरणेन मदाज्ञालंघनेन वा कृशी कुर्वंतः तान्वि
द्ध्यासुरनिश्चयान् ६ अत्र सात्विकानां स्वाराध्याहारयज्ञतपोदानानां परिग्रहार्थं राजसतामसानां वर्जना
र्थं च तेषु प्रत्येकं त्रैविध्यं विधीयते तथापि स्वाराध्यैः त्रैविध्यं स्वाराध्यं च प्रागेवोक्तं आहारादीनां त्रैविध्यं प्रतिज्ञा
पूर्वकमाह आहारस्त्विति आह्रियत इत्याहारोऽन्नं अतः परं प्रायेण पदार्थ स्पष्टः तथापि कश्चित्क
चित्किंचित्किं व्याख्यायते

गी॰ भा॰
टी॰
११३

आयुर्जीवनं सत्वमुत्साहः बलं शक्तिः आरोग्यं रोगराहित्यं सुखं चित्तप्रसादः प्रीतिः अभिरुचिः एषां विवर्धनाः
वृद्धिकरा ते आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः रस्या रसोपेताः स्निग्धाः स्नेहवन्तः स्थिराः देहे रसांशेन चि
रकालस्थायिनः हृद्याः दृष्टमात्रा एव हृदयप्रियाः आहाराः घृतक्षीररसितादयः सात्विकप्रियाः ८ कट्विति
प्रतिशब्दः सर्वत्र संबध्यते अतिकटुर्निंबादिः अत्यम्लो तिलवणोऽत्युष्णः अतितीक्ष्णो मरीचादिः अतिरूक्षः स्ने
हशून्यं कंगुकोद्रवादि दुःखं तात्कालिकी पीडा शोकः पश्चाद्भावि दौर्मनस्यं आमयो धातुवैषम्यापादनरोगाः स्तत्प्र

आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः ८
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ९ यात
यामं गतरसं पूति पर्युषितं च यत् उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं १० अफलाकांक्षिभि
र्यज्ञो विधिदृष्टो य इज्यते यष्टव्यमेवेति मनः समाधाय स सात्विकः ११ अभिसंधाय तु फलं
दंभार्थमपि चैव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं १२

दाः ९ यातयामं प्रहरात्प्राक्पक्वं शीततां गतमित्यर्थः यातयाममर्द्धपक्वं निर्वीर्यस्य गतरसेनैवोक्तत्वा
दिति भाष्यं गतरसं रसविमुक्तं पूति दुर्गंधि पर्युषितं पक्वं सद्रात्र्यंतरितं उच्छिष्टं अमेध्यं यज्ञानर्हं भोजनं ता
मसप्रियं १० यज्ञं त्रिविधमाह फलं नेति विधिदृष्टः अवश्यकर्तव्यतया विहितः यष्टव्यमेवेति यज्ञस्वरूप
मद्दृष्टं वा फलं प्राप्तव्यमिति मनः समाधाय समाहितं कृत्वा यो यज्ञ इज्यते स सात्विकः ११ राजसं यज्ञमाहाभिसं

श्रीः
११३

विधिहीनं शास्त्रोक्तविधिहीनं असृष्टं न दत्तं अन्नं यस्मिन् असृष्टान्नं १३ देवाः विष्ण्वाद्याः द्विजाः ब्राह्मणाः गुरवः [illegible]पित्रा
चार्यादयः प्राज्ञा ब्रह्मनिष्ठाः तेषां पूजनं आर्जवं अकौटिल्यं १४ प्रियं च तत् हितं च प्रियहितं श्रवणकाले परिणामे वा सुखदं
मित्यर्थः मनःप्रसादः रागद्वेषादिरहितत्वं सौम्यत्वं परहितैषित्वं मौनं वाक्संयमः आत्मविनिग्रहः मनोनिरोधः भावसं
शुद्धिः परैर्व्यवहारकाले मायारहितत्वं इति एवंप्रकारं अन्यत् दयादिकं एतत् मानसं तप उच्यते त्रिविधं कायकं वाचिक

विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं श्रद्धाविरहितं यज्ञं तामसं परिचक्षते १३ देवद्विजगुरुप्रा
ज्ञपूजनं शौचमार्जवं ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते १४ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं
च यत् स्वाध्यायाभ्यासनं चैव वाङ्मयं तप उच्यते १५ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः भाव
संशुद्धिरित्येतत्तपो मानसमुच्यते १६ श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः अफलाकांक्षिभिर्यु
क्तैः सात्विकं परिचक्षते १७ सत्कारमानपूजार्थं तपो दंभेन चैव यत् क्रियते तदिह प्रोक्तं राजसं
चलमध्रुवं १८ मूढग्राहेणात्मनो यत्पीडया क्रियते तपः परस्योत्सादनार्थं वा तत्तामसमुदाहृ
तं १९

मानसभेदेन युक्तैः अनवहितैः १७ सत्कारः लोके साधुरयमिति वाक्यं मानः अभ्युत्थानाभिवादनादिः कायि
की पूजा लाभादि एतदर्थं दंभेन च यत्तपः क्रियते तत् राजसं चलं विनाशि अध्रुवं अनिश्चितफलं मूढग्राहेण अवि
वेककृतेन दुराग्रहेण आत्मनः शरीरस्य उत्साधनार्थं विनाशार्थं १९

भ॰गी॰
१२४ दातव्यमेवेति बुध्या यद्दानं प्रदेयद्रव्यं दीयते न तु फलमुद्दिश्य दीयते कस्मै अनुपकारिणे प्रत्युपकारासमर्थाय देशे कुरुक्षेत्रा-
दौ काले संक्रान्त्यादौ यद्दीयते तत्सात्विकमिति संबंधः अथवा दानं पात्रे समर्पणं तदपि सात्विकमिति योजना अत्र प्राच्यो दा-
नशब्दः कर्मव्युत्पन्नः प्रदेयद्रव्यवाची द्वितीयान्तः तत्संयोगात्संप्रदाने च चतुर्थ्यपेक्षा द्वितीयस्तु भावव्युत्पन्नः त्याग-
मात्रवाची तेन तत्र भूतेषु न चतुर्थ्यपेक्षा कर्मणा यमभिप्रैति स संप्रदानमिति पारिभाषिक्याः संप्रदानसंज्ञायाः अत्र कर्म-

दातव्यमिति यद्दानं दीयतेनुपकारिणे देशे काले च पात्रे च तद्दानं सात्विकं स्मृतं २० यत्तु
प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतं २१ अदेश-
काले यद्दानमपात्रेभ्यश्च दीयते असत्कृतमवज्ञातं तत्तामसमुदाहृतं २२

विभक्त्यभावेनाप्रवृत्तेः तेन पात्रे इति च चतुर्थ्यर्थे सप्तमी इति वा पात्रशब्दस्य चतुर्थ्यर्थमिति वा कल्पनं व्यर्थमेव दानशब्दस्या-
वृत्त्या च देशकालानुपकारित्वविशिष्टेन दानमित्येका कोटिः पात्रे दानमित्यपरा उभयसमुच्चये तु महान् गुण इ-
ति भावः २० परिक्लिष्टं कथमेतावत् द्रव्यव्ययः कर्तव्य इत्याकुलेनायुक्तं यथा स्यात्तथा दीयते इति क्रियाविशे-
षणं २१ असत्कृतं प्रियभाषणपादप्रक्षालनादिपूजासत्काररहितं अवज्ञातं पात्रपरिभवयुक्तं दानं प्र-
देयं हिरण्यादि २२

दिव

अथ सर्वेषां यज्ञदानतपःप्रभृतीनां संकल्पसंकायां साद्गुण्यापत्ति धर्मप्रायश्चित्तमुपदिश्यते ॐ तत्सदिति ॐमि
तितदितिसदितिच त्रिविधस्त्रिप्रकारोयं ब्रह्मणो निर्देशो नाम्नापाठः यथा सहस्रनामानि एवमस्मिन्नर्थे नामपा
ठेत्रीण्येवनामानि तथाहि ओमिति ब्रह्मेति तैत्तिरीये तदिति येतस्य महतो भूतस्य नाम भवतीत्यैतरेयके सदेव
सोम्येदमग्र आसीदिति छांदोग्ये च एतेषां शब्दानां ब्रह्मनामत्वप्रसिद्धेः तेन नाम्ना येन ब्राह्मणादयो विहिताः पुरास

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुराः २३
तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः प्रवर्त्तंते विधानोक्ताः सततं ब्रह्मवादिनां २४

र्गादौ ब्रह्मणा एतन्नामत्रयोच्चारणसामर्थ्येनैव विधात्रा विप्रादयो विहिताः प्रकाशिता इत्यर्थः यस्मादेतत्त्र
यं नामपूर्वकं एतेषां विधानं सर्गादौ दृष्टं तस्मात् त्रिष्वपि तेषु नामसु ओमित्येकमेव नाम उदाहृत्य ब्रह्मवादिनां वैदि
कानां विधानोक्ताः यज्ञादयः क्रियाः सततं प्रवर्तन्ते तथा च श्रुतिः ओमिति ब्रह्मा प्रसौति ओ[illegible]मिति शस्त्राणि
शंसंति ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति ओमिति सामानि गायंतीति यज्ञे सर्वेषामृत्विजां क्रियाणां का
रपार्थिकां इत्येतद्दर्शयति २४

ओमिति नाम्नः काम्याकाम्यकर्मसाधारण्येन यज्ञादौ विनियोगमुक्त्वा तदिति नाम्नो निष्कामे मुमुक्षुकर्मसु विनि-
योगं दर्शयति तदिति मोक्षकांक्षिभिः फलं अनभिसंधाय विविधाः यज्ञतपःक्रियाः दानक्रियाश्च क्रियंते इति प्रयोज-
नानुसंधाने फलं चेन्नाभिसंधीयते तर्हि किमभिसंधाय क्रियंत इत्याकांक्षायामाह तदिति क्रियंते इति सर्वाः क्रिया
स्तदिति ब्रह्मेति क्रियंते यथा ब्रह्मवादिभिर्ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ब्रह्मैव तेन गंतव्यं ब्रह्मकर्म-
समाधिनेत्युक्तदिशा सर्वाः ससाधनफलाः क्रियाः ब्रह्मैवेदं सर्वमिति बुध्या क्रियंते तथा मुमुक्षुभिरपीत्यर्थः य-
द्येवं हि मुक्तानां स्वभाविकं शीलं न तदेवं मुमुक्षूणां शास्त्रेण विधीयत इति प्रसिद्धः फलमनभिसंधायेति सांनि-
ध्यात्तदित्यत्रापि सामर्थ्यादभिसंधायेति लभ्यते तेन फलमनभिसंधाय तदित्यभिसंधाय क्रियाः प्रवर्तंत इत्यन्व

तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः २५
सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते २६
यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते कर्म चैव तदर्थीयं सदित्येवाभिधीयते २७

योऽपि सुलभ एवेति तदिति ब्रह्माभिधानमुच्चार्येति भाष्यपिंडदाहृत्येति पूर्वश्लोके क्रियानुवृत्त्या योजनमस्मद्गुरू-
भिप्रायेण व्याख्येयं उच्चारणस्यापि ब्रह्मानुसंधानार्थत्वादिति दिक् ॐ तत्सच्छब्दयोर्विनियोगमुक्त्वा सच्छब्दस्य
विनियोगमाह द्वाभ्यां सद्भाव इति सद्भावे अस्तित्वे साधुभावे समीचीनत्वे च सच्छब्दः सच्छब्दितं कर्मणि प्रशस्ते
कर्मणि सत्सत्त्वे वेदोक्तत्वेऽस्त्येवेति तथा सच्छब्दः प्रयुज्यते आस्तिकैः २६ किं च यज्ञादौ स्थितिर्निष्ठा सदिति समी-
चीने निरुच्यते तदर्थे यज्ञाद्यर्थे कृतं तदर्थीयं परमेश्वरप्राप्त्यर्थं कृतं कर्म सत्त्वेन समीचीनमित्येवाभिधीयते
लोके तदेवं प्रशस्तात्त्विकं त्रिगुणं वा यज्ञादिकं श्रद्धापूर्वकं ब्रह्मणोऽभिधानत्रयोच्चारणेन सात्त्विकं संपूर्णं भवे

गी टीका

सर्वत्र च श्रद्धैव साद्गुण्यहेतुरिति व्यतिरेकमुखेनाह अश्रद्धयेति हुतं होमः दत्तं दानं तपः तप्तं अनुष्ठितं अखिलं कृतं अ
श्रद्धया विहितं भवं नाम तत्र यस्मरणमपि यद्यसत् सर्वमसत् अभावमित्युच्यते पार्थ अत एव न तत्प्रेत्य मृत्वा पर
लोके नोपयुज्यते इह अस्मिन् लोके वा नैवोपयुज्यते तस्माच्छ्रद्धया सात्त्विकीभावेन सुखकामैः शरणीकरणीयेति
भावः २८ इति नैलकंठीये भारतभावदीपे गीतार्थप्रकाशे सप्तदशोऽध्यायः १७ अथास्याष्टादशाध्यायस्य प्रथ
मेऽध्याये तेनानां द्वितीये सत्त्वानां षट्के भृत्यादितानामर्थानां कात्स्न्येनोपसंहारार्थोऽयमंतिमोऽध्याय आरभ्यते तत्र एवोध्याया
अ ऽतेऽध्यायोक्तं तत्र वक्तव्यमित्युक्तं तत्र फलावस्थं भावनिश्चयः श्रद्धासात्त्वफलवतां कर्मणामेवांगं तु कर्मविरहस्वरूपस्य

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह २८ इति श्रीभगवद्गीतासूपनिषत्सु
ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धाविवेकयोगो नाम सप्तदशोऽध्यायः १७ अर्जुन उवाच
सन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुं त्यागस्य च हृषीकेश पृथक्केशिनिषूदनः १

सन्यासन्यभावस्य फलवर्जितस्य अभावाद्भावोत्पत्तेरयोगात् तस्मात् श्रद्धासापेक्षं कर्म कर्मी यच्च याश्रद्धास्त्रानपे
क्षः स संन्यासः प्लेषान्न चास्य वरूपस्य श्रद्धत्र विधिप्रयुक्तं सात्त्विकादिभेदेन त्रैविध्यं संभवति येन फलेतारतम्यं
स्यात् तत्फलस्य दृष्टिविक्षेपनिवृत्तिरूपस्य सर्वत्र तुल्यत्वात् स च सन्यासोऽयं द्विकर्मत्याग एव तर्हि हि तिष्ठेनः समी
हितं यदितु तौ भिन्नौ तर्हि तयोर्वैलक्षण्यं विचार्यमित्याशयेनार्जुन उवाच सन्यासस्येति हे महाबाहो हृषीकेश
हे केशिनिषूदनेति बहुकृतः संबोधयन् जिज्ञासितेऽर्थे त्वादरं दर्शयति सन्यासस्य तत्त्वं याथात्म्यं त्यागात् पृथ
गभूतं वेदितुमिच्छामि त्यागस्य याथात्म्यं सन्यासात् पृथग्भूतं वेदितुमिच्छामीति चकारेणानुकृष्यते १

म.भा.
११६

अत्रोत्तरं श्रीभगवानुवाच काम्यानामिति काम्यानां रागतः प्राप्तानां पुत्रकामेष्ट्यादीनां ननु फलस्य कामनाविषयात्
सर्वस्य कर्मणः फलवत्त्वनियमात् सर्वं काम्यमेवेति। नित्यादीनामपि मुमुक्षोः त्यागः स्यादिति सिद्धेनः समीहितं
नित्याशंक्याह सर्वेति सर्वेषां नित्यनैमित्तिकानां काम्यानां कर्मणां फलत्यागमेव त्यागं विचक्षणाः प्राहुर्न स्वरू
पतस्त्यागं प्राहुरतो न त्वदिष्टः संन्यासः सिध्यतीत्यर्थः अयमाशयः यद्यपि संन्यासत्यागशब्दौ निर्वृत्तिमेवेष्ट
तः तथापि वैराग्याद्याकायक्लेशभयाद्यामोहाद्या भवतीति तत्कारणानां सात्त्विकादिभेदेन भिन्नत्वात्तस्यापि सा
त्त्विकराजसतामसभेदेन त्रैविध्यं त्रिविधश्रद्धाप्रधानत्वं च दुर्वारं चैवाविरक्तो श्रद्धधानस्तु त्यक्तकर्मा

श्रीभगवानुवाच काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः २

त्विष्टं विक्षेपहीनो दृश्यते यथोक्तं वार्तिकाचार्यैः प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः संन्यासिनो
पि दृश्यन्ते दैवसंदूषिताशयाः इति तस्माद्विरक्तः कृतसंन्यासापेक्षया निष्कामकर्माचरणमेव श्रेय इत्याशये
न भगवता काम्यकर्मत्यागः संन्यासत्वमित्यादि कर्मणां फलाभिसंधानं च त्यागत्वेन स्वरूपत इति तस्माद
श्रद्धया कृतः स संन्यासोऽप्यसन्नेवेति संन्यासाद्भ्रष्टत्वेन स्यानमिति स्मृतः स्वफलं दातुं न समर्थ इति युक्तमु
क्तं भगवता अश्रद्धया कृतं सर्वमपार्थमिति यत्तु नित्यानामेव यदि त्यागो काम्यानां तत्स्वरूपतोऽपि त्यागः
...इति त्यार्थः सर्वेषां कर्मणां फलतस्त्याग इत्युत्तरार्द्धं इति व्याख्यानं पक्षद्वयप्रदर्शनपरं तदग्निमेण श्लो

[illegible]नेव[illegible]इ्यमाहुस्त्याज्यमितिएकेमुख्याः मनीषिणोमनोनिग्रहसमर्थाः परमात्मनिष्ठत्वात् विविदिषाणांदोष
वत् रागादिवपोयस्मात्त्याज्यमस्ततइतंकर्मत्याज्यमितिप्राहुः अपरेतु विविदिषार्थिनायज्ञादिकंनत्याज्यमितिचाप्रा
ह इतिअनुवर्ततेतथाचाहुःद्विविधाःश्रुतयउपलभ्यंतेनकर्मणानप्रजयाधनेनत्यागेनैकेनअमृतत्वमानशुः कुर्वन्नेवेह
कर्माणिजिजीविषेच्छतंसमाःइत्याद्याः अविद्याद्विषयमेवैतत्पक्षद्वयंविदुषांतुकर्मसुप्रवृत्तिकारणस्याज्ञानस्यने

त्याज्यंदोषवदित्येकेकर्मप्राहुर्मनीषिणः यज्ञदानतपःकर्मनत्याज्यमितिचापरे ३
निश्चयंशृणुमेतत्रत्यागेभरतसत्तम त्यागोहिपुरुषव्याघ्रत्रिविधःसंप्रकीर्ति
तः ४

ष्टत्वात् स्वतःसिद्धएवत्यागइतिताश्प्रतिकर्मविधि वीनत्यागविधिर्वीनप्रवर्ततेयथोक्तंनक[illegible]लिप्यतेघोस
कर्मभिस्त्यज्यतेह्यस्याविति निश्चयमितितत्रकर्मणांत्यागात्यागविप्रतिपत्तौसत्यां प्रथमंतावत्त्यागेविषयेमेमद्व
णाश्रयंशृणु हि यस्मात्हेपुरुषव्याघ्रत्यागस्त्रिविधः सात्विकराजसतामसभेदेनत्रिप्रकारः परिकीर्तितः
शास्त्रेदृष्टवैराग्यपूर्वकःकर्मसंन्यासःसात्विकः अप्रायासभयात्त्यागोराजसः मोहात्त्यागस्तामसःइति
तेस्माद्ह नत्वात्त्यागोनिश्चयेनविचारणीयइत्यर्थः ४

श्रुत्वैवीकृताहन्यायेन त्यागस्वरूपकथनात्मकं परमतमत्यागपक्षं उपन्यस्यति यज्ञेति यज्ञादिकं कर्म न त्याज्यं किंतु कार्यमेव विधिगृहीतेन पुंसा अवश्यं अनुष्ठेयमेव तत्र अकरणे प्रत्यवायप्रसङ्गः वर्णनात् चकारो हेत्वर्थः यस्मात् यज्ञो दानं तपश्चैव मनीषिणां निष्कामाणां दम्भादिरहितानां पावनानि चित्तशोधकानि तथा च श्रुतिः त्रयो धर्मस्कंधा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचर्याचार्यकुलवासी तृतीयः सर्व एते पुण्यलोका भवंतीति यज्ञादीनां गृहस्थधर्माणां तपसो वनस्थधर्मस्य आचार्यकुलवासस्य ब्रह्मचारिधर्मस्य च पावनत्वं दर्शयति अत्रापि यज्ञदानशब्देन गृहस्थधर्माणां तपसो वनस्थधर्मस्य आचार्यकुलवासस्य ब्रह्मचारिधर्मस्य च पावनत्वं दर्शयति अत्रापि यज्ञदानशब्देन गृहस्थधर्मो ज्ञेयः तपः इति वानप्रस्थधर्मः परिशेषात् धर्मेति ब्रह्मचारिधर्मो विज्ञेय ५ एवं त्यागपक्षमुक्त्वा गीतोस्तु क्या प्रथमं

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् यज्ञो दानं तपश्चैव पावनानि मनीषिणां ५ एतान्यपि
तु कर्माणि संगं त्यक्त्वा फलानि च कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं ६

स्वाभिमतं त्यागात्यागसमुच्चयपक्षं दर्शयति अपि शब्द एवकारार्थः एतान्येव कर्माणि यज्ञदानतपांसि संगं त्यक्त्वा अहमेतेषां कर्ता मयावश्यमेतानि कर्तव्यानीत्यभिमानं वपोवर्णाद्यध्यासनिमित्तं त्यक्त्वा एतैरनुष्ठितैरहं स्वर्गं वा चित्तशुद्धिं वा ज्ञानं वा प्राप्स्यामीति फलानि त्यक्त्वा च कारादेषामकरणे मम प्रत्यवायो भविष्यतीत्येतमपि अभिसंधिं त्यक्त्वा ब्रह्मनिष्ठवदसंगस्वभावेन पुरुषेण कर्तव्यानि इति एवं प्रकारं मे मम मतं उत्तमं पूर्वं मतात् श्रेष्ठं तत्र हि कर्तृत्वाभिमानरूपेण संगेन प्रत्यवायो वाप्यो भयात् स्वकर्मानुष्ठानं विहितं अत्र तु तमभावात् संगत्यागांशेन कर्मणां त्यागः स्वरूपेण अत्याग इति भेदः ६

प्रतिज्ञातं त्यागत्रैविध्यमाह नियतस्येति तु शब्दः पूर्वोक्तपक्षद्वयवैलक्षण्यार्थः तस्मादधिकृतस्य मुमुक्षोः नि
यतस्य अवश्यानुष्ठेयस्य कर्मणः सन्यासः स्वरूपेण त्यागो नोपपद्यते न युज्यते अज्ञस्य शुद्ध्यपेक्षत्वात एवं सति यो
मोहादज्ञानात्तस्य नियतस्य कर्मणः परित्यागः स तामसः परिकीर्तितः आवश्यकं च त्यज्यते चेति विप्रतिषेधात ७
एवं तामसमुपपाद्य राजसं त्यागमाह दुःखमिति दुःखरूपमेवेदं कर्मेति मत्वा कायक्लेशभयात यत त्यजेन्नित्यं सपु
मान तस्मादेव हेतोः राजसं रजोगुणनिर्वृत्तं त्यागं कृत्वा त्यागफलं चित्तशुद्धिमसौ नैव लभेत ८ एवं द्वाभ्यां
श्लोकाभ्यां तामसराजसौ नमुखत्वेन त्यागावुक्तौ तामसराजसयोरसंभवस्य भगवते वा मोहात्तस्य परित्याग

नियतस्य तु संन्यासः कर्मणो नोपपद्यते मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ७
दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत
८ कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन संगं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः ९

इति कायक्लेशभयात्त्यजेदिति स्ववचनात्तन्न घटेवं संभवति मूढश्च करोति चेति विप्रतिषेधात यदि वा गीततेव
मूढः यदि मूढस्तर्हि नैव करोति नैव कायक्लेशाद्बिभेति तस्मात्करोति कायक्लेशाद्बिभेति चेति विप्रतिषि
द्धं अतस्तामसराजसयोरयुक्तत्यागयोरसंभवान्नैवोक्तौ सात्विकस्यानुष्ठेयस्त्यागः संभवति यथा स्फु
टिके जपाकुसुमाश्रिते लौहित्यं विवेकिनो प्रतीतित एवास्ति न वस्तुत एवमात्मनि ईश्वराधीने विवेकिनां
कर्तृत्वं प्रतीतित एवास्ति न वस्तुत इति वक्तुं शक्यं एवं च कर्तृत्वाभिनिवेशशून्यः पुमान प्रतीतितः करोत्ये

ग

वेनवस्तुतः संभवतिमुख्योपिसात्विकस्यांशइतितमेवमुख्यत्यागेधिकारहेतुंप्रथममाहकार्यमितिकार्यंकर्तव्यमित्ये
वयत्कर्मनियतंनित्यंक्रियतेहेर्जुनसंगंत्यक्त्वाचेतिअवधारणंप्रागुक्तस्यत्यागपक्षस्यव्यावृत्त्यर्थंसएवंभूतस्त्या
गःसात्विकोमतःवेदेदृष्टः तथाचश्रुतिः ईशावास्यमिदंसर्वंयत्किंचिज्जगत्यांजगत् तेनत्यक्तेनभुंजीथा
मागृधः कस्यस्विद्धनमितिईशापरमेश्वरेणसर्वकारणकर्त्रात्मकेनइदंजगत्स्थावरजंगमंजगत्यांपृथिव्यां
स्थितंवास्यमाच्छादितंव्याप्तंयेनहेतुनासर्वंतदधीनंतेनकारणेनत्यक्तेनत्यागेनकर्तृत्वाभि[illegible]
२ वर्जनेनभुंजीथाः विषयांभुंक्ष्वमागृधः गर्धमाकार्षीःकस्यचिद्धनंकस्यापितत्स्वामि[illegible]तिह्येव
तत्रगर्धइत्यर्थः एवंकर्माण्यपियज्ञादीनिकर्तृत्वाभिमानंत्यक्त्वाकुर्वतस्तवलेपोनभविष्यति एतद्व्यति
रेकेणत्वक्पापातरंनास्तीतिअग्रिममंत्रेणप्रदर्श्यतेकुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाः एवंत्वयिना
न्यथेतोस्तिनकर्मलिप्यतेनरेइतिइदमेवमुख्यस्वमतंभगवताप्रदर्शितंएतान्यपितुकर्माणीतिश्लोकेन
नानेनयानेनफलमेवनास्तिकिंत्यक्तव्यमितिचेत् इतएवभगवद्वचनात्तेषामपिफलमस्तीतिज्ञानीहि नि
स्फलस्यवेदेनानुष्टानासंभवात्तथाचापस्तंवः तद्यथाम्रेफलार्थेनिमित्तेछायागंधइत्य
नुत्पद्यतेएवंधर्मंचर्यमाणमर्थामनूत्पद्यंतइति अनुषंगिकंफलंनित्यानांदर्शयति
अकरणेप्रत्यवायस्मृत्यापितेषांप्रत्यवायपरिहारः फलमितिप्रदर्श्य
तेधर्मेणपापमपनुदतीत्यादिनाचानित्येष्वपिकर्मसुफलं
दृश्यतेतदेवत्यक्तव्यमितिनकोपिविशेषः ९

एवमयमुक्तः सात्त्विकस्त्यागमुक्त्वा मुख्यं तमाह न द्वेष्टीति सत्त्वेन सम्यगाविष्टो व्याप्तस्त्यागी मुख्यः सात्त्विकस्त्यागी संन्यासी स्वधर्मः अकुशलं असुखप्रदं कर्म त्रिषवणस्नानचातुर्मास्योपवासभिक्षाटनादि प्रयासरूपं न द्वेष्टि कुशले मिष्टान्नभिक्षादौ नानुषज्जते न संगं प्रीतिं करोति यद्वा कर्म कुशले सेवादि कर्म कुशले शिष्यादौ न सज्जते तत्राकुशलं वा न द्वेष्टि एतेन रागद्वेषशून्यत्वमस्य दर्शितं तत्र हेतुरित्यपेक्षायामाह मेधावीति ऊहापोहकुशलत्वेनात्मानित्यानित्यवस्तुविवेचनादौ प्रज्ञावान् अत एव छिन्नसंशयः किं कर्मणैव मुक्तिसाधनं नान्यद्वा संन्यास एवेति विचिकित्सारहितः एवं त्यागीत्यनेन पञ्चदशानां तपः कर्म न त्याज्यमित्युक्तो दत्त्यागो व्याख्यातः मेधावीत्यनेन नमोऽन्यस्य परित्याग इत्युक्तो नाम स त्यागो व्याख्यातः पूर्वार्धेन रागद्वेषाभावप्रतिपादनेन कायक्लेशभयात्यजेदित्युक्तो राजसत्या

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः १०

गो व्याख्यातः छिन्नसंशय इत्यनेन कार्यमित्येव यत्कर्मेत्युक्तो दसुख्यः सात्त्विकत्यागो व्याख्यातः न ह्यसौ कर्मणामनुष्ठानं संन्यासस्य महाभाग्यत्वं ततो वेदवेद्यच्चेत्क्षणमपि कर्मस्तु न तिष्ठते नहि दाहापरमार्थी निकटस्थः ... दं ज्ञानेन ग्रीष्मो ष्मप्रतप्तपाद्यशिलातले क्षणमपि रमेत संशयछेदे पिहेतुः सत्त्वसमाविष्ट इतिपदं सत्त्वेन सम्यगाविष्टोऽयं न तु अयं सत्त्वमात्रेण इति महान्विशेषः एवं च ... सात्त्विकत्यागरूपस्य कर्मयोगफललाभः तोयं तु मुख्यः संन्यासो विविदिषाणामनुष्ठेयो यदहरेव विरजेत्तदहरेव प्रव्रजेत् एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीति श्रुतिभ्यः भाष्ये तु न तु कर्मपरित्यागस्त्रिविधः संन्यास इति प्रकृतः तत्र तामसो

२२८ राजसश्चत्यागः कथमिह संगफलं त्यागस्तृतीयत्वेनोच्यते त्रपोवृक्षणेऽप्यागतास्तत्र च ऊंगा विदो त्तत्रियस्तृतीय इति
न हन्तैष दोषः त्यागसामान्येन सत्त्व त्रयार्थत्वात् अस्ति कर्मसन्यासस्य फलाभिसंधित्यागस्य च त्यागत्वसामान्यं त
त्र राजसश्चत्यागः कथमिह संगफलं त्यागस्तृतीयत्वेनोच्यते त्रपोव्राह्मणेऽप्यागतास्तत्र च ऊंगा विदो हृत्रियस्तृ
तीय इति तद्धन्तैष दोष त्यागसामान्येन सत्त्व त्रयार्थत्वात् अस्मिकर्मे तामसत्वेन कर्मत्याग निंदया कर्मफलाभिसं
धित्यागः सात्विकत्वेन स्तूयते संत्यागः सात्विको मत इति ग्रंथेन त्यागत्रैविध्यं समाधाय एवं संगफलत्यागपू
र्वकं नित्यकर्मानुष्ठानेन विशुद्धांतः करणस्य स्वज्ञानाभिमुखस्य संनिष्ठां कर्मकथनार्थायं श्लोकाद्युक्तः म
तथैव श्लोकं व्याख्याय एवं वीक्षस्य कर्मयोगस्य प्रयोजनमनेन श्लोकेनोक्तमित्युपसंहृतः अन्येतु फलाभिसंधिवि
शिष्टस्य कर्मणस्त्यागस्त्रिविधः । विशेषणाभावात् । विशेष्याभावात् उभयाभावात् आद्योनैव विधिस्थितः
द्वितीयस्तु तामसाराजसभेदेन द्विविधोपत्रैव निर्दिष्टः तृतीयस्तु कर्मानधिकारिणा विविदिषुणा च कर्तुं
योगो द्विविधः तत्राद्यः । स्थितप्रज्ञलक्षणादौ प्राग्व्याख्यातं द्वितीयस्तु नैष्कर्म्यसिद्धिं परमामित्यत्र वक्ष्य
ते तत्र भाष्ये तु राबेंद्र त्यागविधाः प्रतिज्ञाय द्वय यावतत्प्रदर्श्य तृतीयापि केवलं चिन्त्या
मान्य प्रतिपादिता अत्र तु एकस्यां द्वयोरंतं भवितृत्वाद्वैविध्ये
पपाद्य तृतीयप्रदेशांतरे प्रसिद्धित्येति प्रकृते प्रतिपत्ता
याग्रनिर्वाह इति शेषः १०

स्वयमेवसात्विकंत्यागंअनूद्यतत्प्रयोजनमाह नहीति देहभृता देहाभिमानिना हि यस्मात् अशेषतः क
र्माणित्यक्तुं नशक्यंअशक्यंप्राणयात्रालोपप्रसंगात् तस्मात् अधिकृतः सन्यः कर्मफलत्यागशीलः तुशा
स्त्रएवार्थः सएवत्यागीत्यभिधीयते यस्त्वशेषतः कर्माणित्यक्तुंशक्नोति परमार्थदर्शी समुख्यस्त्यागीत्यर्थः
११ एवंभूतस्यत्यागस्यफलमाह अनिष्टमिति अनिष्टंनरकतीर्यग्गादिरूपं इष्टंदेवतादिरूपं मिश्रंमानुषभावइति
कर्मणः कर्मजातीयस्यफलं त्रिविधंप्रेत्यमरणानंतरं त्यागिनां पूर्वोक्तमुख्यसन्यासहीनानांभवति मुख्यसन्या

नहिदेहभृताशक्यंत्यक्तुंकर्माण्यशेषतः यस्तुकर्मफलत्यागीसत्यागीत्यभिधीयते ११
अनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणः फलं भवत्यत्यागिनांप्रेत्यनतुसंन्यासिनांक्वचित १२

सिनांतुनकथंचिदपि तु द्रवतितेषांकर्तृत्वाभिमानाभावात् अन्येतुगौणसन्यासिनामेवायं कर्मालेपइत्याहुः ते
षांचव्याख्यातंकार्यमित्येवयत्कर्मेत्यसन्यासिनागौणसन्यासिनांचविशेषोनस्यात् नचैवंमुख्यसन्यासिनांगौ
णसन्यासिनांचविशेषापत्तिरितिवाच्यं उभयेषामुत्तरकर्माश्लेषसाम्येतिपूर्वकर्मदाहादाह कृतस्यविशे
षस्यसत्वात गौणसन्यासिनां जन्मांतरादिकमपिपूर्वकर्मदाहादाह कृतसूत्रेभिरेवमविष्यतिअप्रयत्नेदे
क प्रतिदर्शनेनयोगभ्रष्टातिवन्नांतरीयकंननुतस्यप्रधानंफलंस्वर्गादिभवितुमर्हत्यनुदित्वादिति १२

भ॰भा॰

१२ ननुआत्मनः कर्मलेपनिमित्तंयदकर्तृत्वानुसंधानंतत्किंयोषिदग्निदृष्ट्यादिवदाहार्यंनुनवास्तवमेवसद्विद्याप्यपनं.
तिरीक्ष्या नेनकर्तृत्व नकर्तृत्वेनोपात्तमितिशास्त्रदृष्ट्याकर्तृत्वमेवभाव्यतेइत्याशंकायग्निलेनदृष्टायोयोषितिदग्धत्वादर्शनेनकल्पिते
नाकर्तृत्वेनवास्तवकर्मलेपस्यासंभवात आद्यंनिरस्यद्वितीयमुपपादयिष्यन्पीठिकामाचरतिहेमहाबाहोसर्वकर्मी
णांसिद्धयेइमानिवक्ष्यमाणानिनिर्वर्तकानिमेमद्वचनान्निबोधबुध्यस्ववचनेविस्मयोत्पादनार्थंकारणानांसम्यक्
त्वमाहसांख्येकृतांतेप्रोक्तानीतिसम्यकविविच्यख्यापंतेप्रकटीक्रियंतेतत्त्वानियेनात्मानात्मपदार्थरूपाणियस्मिन्त
त्सांख्यंवेदांतशास्त्रंतदेवविशिनष्टिकृतंतस्यकर्मणोंतःपरिसमाप्तिर्यस्मिन्सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्य
तइतिआत्मज्ञानेसतिसर्वकर्मणांसमाप्तेर्दर्शनात्तस्मिन्सांख्येकृतांतेप्रोक्तानि १३ तान्येवपंचगणयतिअधिष्ठ

पंचैतानिमहाबाहोकारणानिनिबोधमे सांख्येकृतांतेप्रोक्तानिसिद्धयेसर्वकर्मणां १३
अधिष्ठानंतथाकर्ताकरणंचपृथग्विधं विविधाश्चपृथक्चेष्टादैवंचैवात्रपंचमं १४

नेइच्छाद्वेषसुखदुःखज्ञानादीनामभिव्यक्तेराश्रयोदेहः तस्मात्मत्वेचार्वाकव्यतिरिक्तसमस्तवादसिद्धंतथाकर्तावुद्धि
विशिष्टचिदाभासः प्रमाताहेनाहंप्रत्ययविषयोहंकारः तथैत्यनेनतद्वदेवआत्मातेषत्रेपाहपुरुषेदेहस्थेवसत्येप्रत्ययेच त्मा
तेविज्ञानघनएवैतेभ्योभूतेभ्योसमुत्थायतान्येवानुविनश्यतीतियथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेतस्मादात्मनः
सर्वएतआत्मानोव्युच्चरंतीतिविशिष्टस्यचाननतिरेकादनात्मत्वंसिद्धंकरणंचक्षुरुपलब्धिसाधनंपृथग्विधंना
दशविधंपंचकर्मेंद्रियाणिपंचज्ञानेंद्रियाणिमनोवुद्धिश्च तथाविविधाश्चपृथक्चेष्टावायवीयाःप्राणादि
रूपाः देवंपुण्यपापरूपंततत्करणानुग्राहकसूर्यादिदेवतारूपंपंचमंपंचानांपूरणं १४ शिवं २०

शरीरेति न्याय्यं धर्म्यं शास्त्रीयं विपरीतमन्याय्यं अधर्म्यमशास्त्रीयं ननु शरीरादिभिस्त्रिभिरारभ्यते पंचैते तस्य हेतव इति चेष्टा
विप्रतिषिद्धमुच्यते नैष दोषः अत्रापि शरीरपदेनाधिष्ठानस्य नरपदेन कर्तृ वाङ्मनः इति करणस्य आरभत इति चेष्टा
नां न्याय्यमिति धर्माधर्मरूपस्य च संग्रहात् सर्वेषु कर्मसु पंचानां समानेपि प्रयोगे विधिप्रतिषेधलक्षणं त्रिविधमे
व कर्म शास्त्रे प्रसिद्धमिति इदं शारीरं कर्मेदं मानसमिदं वाचकमिति व्यपदेशो देहादीनां प्राधान्यापेक्ष इति न कश्चि
द्विरोधः १५ एवं प्रतिपादनफलं कर्तृत्वस्यारोपितत्वसिद्धिरकर्तृत्वस्य स्वाभाविकत्वसिद्धिश्चेति द्वाभ्यां श्लोकाभ्यां

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः १५
तत्रैवं सति कर्तारमात्मानं केवलं तु यः पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः १६

दर्शयति तत्रेति तत्र तस्मिन् कर्मणि एवमुक्तरीत्या पंचभिर्निर्वर्त्ये सति केवलं तं अकर्तारमपि आत्मानं चेतनं साक्षी चे
ता केवलो निर्गुणश्चेति श्रुतेः अधिष्ठानादिपंचकप्रचारदर्शिनमुदासीनमपि यः कर्तारं कर्तृत्वाश्रयं पश्यति स दुर्म
तिः पापाभिभूतमतिर्न पश्यति अंध एव सः अदर्शने हेतुः अकृतबुद्धित्वादिति शास्त्राचार्योपदेशशमदमादिसंस्कृ
स्ता ता बुद्धिर्यस्य स कृतबुद्धिः अकृतबुद्धेर्भावस्तत्त्वं तस्मात् यथा स्वमुखस्योदपात्रसंसर्गित्वं पश्यता जले चांचल्य
मपि तत्रारोप्यते एवमात्मनो बुद्धिसंसृष्टत्वं पश्यता बुद्धिधर्मः कर्त्रादिरप्यात्मन्यारोप्यत इति भावः १६

द्धितीयं प्रयोजनमाह यस्येति यस्य प्रमातुर्भावः प्रत्ययमात्रत्वस्वरूप आत्मा नाहंकृतः अहमिव कृतो अहंकारतादात्म्यं प्रापितो हंकृतः तथा न यस्य बुद्धिर्लिप्यते आत्माभावेन रंजिता न भवति यस्य बुद्धेर्व्यतिरिक्तमात्मानं पश्यतो बुद्धिधर्माः कर्तृत्वादयो नात्मनि प्रतीयंत इति कर्तात्मवादितार्किकनिरासः यस्य च आत्मधर्मो ऽध्येतन्यादयो बुद्धौ संसृजंत इति बुद्धिमेव चेतनां वदतो बौधस्य निरासः चिदचितोरन्योन्यस्मिन्नन्योन्यधर्माध्यासो यस्य नास्तीत्यर्थः अत्र न हंतीत्यात्मनि कर्तृत्वाभावो दर्शित न निबध्यत इति दुःखादिसंसर्गनिषेधेन भोक्तृत्वाभावो दर्शितः हत्वापि स इमाँल्लोकान्न हं

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते
हत्वापि स इमाँल्लोकान्न हंति न निबध्यते १७

ति न निबध्यते इति तु स्तुतिमात्रं कर्तृत्वस्यैव बाधेन हंतृत्वायोगात् दग्धपटवत्कर्तृत्वानुवृत्ता वपि हननक्रियायां प्रवर्तकस्य रागद्वेषादेरभावाश्च एतेन आत्मनस्तात्विकमकर्तृत्वं भावं यता कृतं कर्म अतात्विककर्तृत्वाभिमाननिमित्तं स्वफलं संप्राप्तुं नार्हतीति दर्शितं न हि रज्जुबुद्ध्या कृत्वा प्रहरतः सर्पत्वो भजंशादेन फलं भवति सर्पे तु तथा कुर्वतस्तद्भवत्येव तद्वदिदमपि ज्ञेयं (१७)

शिव

समाप्तः सात्विकत्यागोपपादनो योगी आत्मनोऽकर्तृत्वोपपादनप्रकारः अत्राह सांख्येपि यदुक्तं पंचैनेतस्य हेतव इति य
च्चोक्तं न हंतीति तन्न स्पष्टामहे न स परिणामी चेतनः परिस्पंदात्मकस्य कायि[illegible]पिकादिभेदेन त्रिविधस्य कर्मणः कर्ता भ
वतीति वक्तुं युज्यते यस्तु न निबध्यते इति भोक्तृत्वमपि प्रत्याख्यातं तन्न मृष्यामहे नहि कुलालादयो प्रयुक्ताः स्व
घटादीन्निर्वर्तयंति किंतु भोक्तृपुरुषप्रयुक्ताः अन्यथा भोक्तृणामभावे व्यर्थैव तत्प्रवृत्तिः स्यादिति एवं प्रधान
मात्रभूताः कार्यादयः पुरुषस्य भोगापवर्गसाधनप्रयुक्ताः सर्वाणि निर्वर्तयंति तस्मात्पुरुषस्य भोक्तृत्वस्य भा
वात् अकर्तृत्वानुसंधानपूर्वकमपि कृतं कर्म भोक्तव्यमेव भोक्तव्यमिति सात्विकत्यागेपि कर्मालेपवचन
मसंगतमिति अत्र प्रतिविधत्ते ज्ञानं ज्ञेयमिति ज्ञानं ज्ञायते प्रकाश्यते वस्तुतत्वमनेनेति प्रत्यक्षादिप्रमाणजन्यो ध

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना कर्मणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः १८

ऽपिप्रकाशः वर्तमानप्रतीतं वा ज्ञेयं बोधविषयो घटादिः परिज्ञाता विषयोसाभासधीरूपो भोक्तृमित्युच्यते एवं रू
पप्रकारत्रयवती त्रिविधा कर्मणां चोदना त्रयसमुच्चितं सत्कर्मणि प्रवर्तकमित्यर्थः सत्यपि ज्ञेये ज्ञातरि वा ज्ञाने
प्रवृत्त्यनुपपत्तेः ज्ञाने ज्ञातरि च सति देशकालव्यवहिते ज्ञेये प्रवृत्त्यनुपपत्तेः सत्यपि संस्कारात्मके ज्ञाने ज्ञेये
च संनिहिते तस्यापि प्रमात्रभावात् प्रवृत्त्यदर्शनादेतत्त्रयं त्रिविधं भवदन्योन्यापेक्षं स्वरूपं कार्यं जनयतीति ज्ञानो
पादानापेक्षा बुद्धिस्त्वात ज्ञाता[illegible]नुकूले व्यापारे प्रवर्तयंतीति कर्तृपदाभिधेयमित्यर्थः चोदनेति कर्तृविनिंवा
दिसत्सप्रयातं तेन चोदनाशब्दः कर्तृवाचि निगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति वा तथा करणं सेंद्रियं
कर्मेंद्रियनाक्षिप्यमाणं विषयग्रहणं कर्तृपूर्वोक्त एव परिज्ञाता तत्त्रयं समुदितं सत्कर्मसंग्रहः ईप्सिततम

लं.भा.

१२२ तमस्य भोग्यस्य संग्रहः संगृह्यतेऽस्मिन्निति संस्वपस्यानं भोक्तृत्यर्थः सत्यपि भोक्तरि करणे च क्रियां विना भोगासं
भवात् क्रियायाश्चाश्रयं विना स्वरूपालाभादाश्रयस्य करणं विना भोगकर्तृत्वानुपपत्तेश्च एततनित्मिति तंसत
भोक्तेत्युच्यत इत्यर्थः तथा च श्रुतिः आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति इंद्रियप्रसिद्धमन इत्येन नवु
द्धिरेव गृह्यते युक्तं इंद्रियद्वारा मतेर्भोग्येन सह संबंधक्रिया इंद्रियं च मनश्च युक्तं चेति विग्रहे इंद्रियमनोयु
क्तमिति द्वंद्वैकवद्भावः एवं च यं भोक्तोत्यात्मेत्याहुर्मनीषिण इति श्रुत्यर्थः एवं द्विश्रुतिस्तत्त्वव्याख्यानेन तयो
र्मूलेन त्वतिभावो युज्यते नान्यथा तथा च कर्तृत्ववत् भोक्तरपि स्वनात्मगणपतितत्वात् भोक्तृत्वं भोगकर्तृत्वं भोक्तृ
भावमिति निर्वचनात् यः कर्ता स एव भोक्तेति प्रतिपादनात् अहं कर्ता भोक्तेति चानुसंधानपूर्वकं क
र्माणि कुर्वतः कर्तृत्वभोक्तृभावकृतकर्मलेपो नास्तीति सिद्धं भाष्यस्य चायमेवार्थः येन कारणं क्रियायाः
साधकरूपं दशविधं बाह्यं मनो बुद्धिरूपमांतरं करणसंग्रहः कर्म कर्तुरीप्सिततमं क्रियया व्याप्यमानमुत्पा
द्यमाप्यं विकार्यं संस्कार्यं चेति चतुर्विधं कर्ता चेतनः प्रयोजकश्चिदितुरपि एतत्त्रयं कर्मसंग्रहः कर्माश्रयः कर्ते
त्यर्थः ज्ञानं विषयप्रकाशनशक्तिः ज्ञेयं विषयः परिज्ञाता ज्ञानाश्रयो भोक्ता एतत्त्रयं कर्मणि प्रवर्तकमिति व्या
वहारे तेषामपि आत्मा न कर्ता नापि सांख्यानामिव भोक्तृत्वेन प्रकृतेः प्रवर्तक इत्येवाशयः तथापि क्रिय
या व्याप्यमानस्य वलयां समानि कारणे दानहीस्य घटादिकं यस्य कर्मणः कर्तृकोटौ प्रवेशयोगः तस्य नि
याम्यत्वमात्रविवक्षायां प्रकृते कथमनुपयोग इत्यत्र स्तधः अस्माकं तु घटादिव्यापकक्रियया कर्मणः कर्त
हि व्यत्वे तु व्याकौ प्रवेशश्च क्रियायाः क्रियावतो धर्मधर्मिणोरभेदापेक्षया युज्यते तथा ज्ञाने प्रकाशमक्रिये
ति मते क्रियारूपेऽस्मिन् प्रवर्तकज्ञानीतरस्यापेक्षेति तत्र तत्र त्वयस्यान्यस्यापेक्षेत्यनवस्थापुर्वारा १८ १८

एवंरूपो कोऽसौ ज्ञानादिषट्के परिज्ञाता कर्ता चैक एवेति परिशिष्टः पंचत्वे षां प्राकृतत्वेन त्रिगुणात्मकत्वे प्राप्ते ज्ञेयकरण
योर्घटकुटारकल्पयोः परिसंख्यार्थं त्रयाणामेव त्रत्वे कति विधत्वं विपरीतं तु प्रतीयानीति ज्ञानं कर्म च कर्ता चेति
त्रयमेव गुणभेदतस्त्रिधा न तु ज्ञेयकरणे गुणसंख्याने कापिले शास्त्रे यद्यपि तत्र एकस्यां प्रमदायां भर्तुः सुखं
जायते तं प्रति तस्याः सत्वोद्भूतत्वात् तामविंदतश्चैत्रस्य दुःखं जायते तं प्रति तस्याः रजउद्भूतत्वात् तस्यामे
वसपत्न्या द्वेषः तां प्रति तस्याः स्तमसउद्भूतत्वात् प्रमदयैव सर्वभावव्याख्याता इति कापिलानां ज्ञेयकरण

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्य
पि १९

यद्यपि त्रैविध्यं प्रसिद्धं तथापि प्रमदादय एकस्यैव पुंसो निमित्तभेदेन प्रीतिदुःखद्वेषविषया अपि भवंती
ति पूर्वोक्तव्यवस्थाया निर्मूलत्वात् प्रीत्यादीनां कर्तृसमवायितया प्रतीयमानानामालंबनभूतायाः
प्रमदायाः प्रीत्याद्यात्मकं कल्पयितुं न शक्यते इति न भगवता तयोस्त्रिविधत्वं व्याख्यायतेऽप्रंस्तरार्थः
स्पष्टः १९

एवं ज्ञानादित्रयस्य त्रैविध्यं वक्तुं प्रतिज्ञाय ज्ञानत्रैविध्यं तावदाह सर्वभूतेष्विति तथा कटककुंडलादिषु व्या-
वर्तमानेषु तत्त्वविदेकं कांचनमेवेदमिति पश्यति एवं येन ज्ञानेन सर्वभूतेषु विभक्तेषु नानारूपभेदभिन्ने-
ष्वव्ययमपरिणामिनमेकं भावं चिन्मात्ररूपं ईक्षते ब्रह्म सर्वं ब्रह्मैवेति पश्यति तत् ज्ञानं सात्त्विकं विद्धि एका-
त्मज्ञानमेव सात्त्विकमित्यर्थः २० भेददर्शनस्य राजसत्वमाह पृथक्त्वेनेति यत् यत पृथक्त्वेन भिन्नत्वेन ना-
नाज्ञानं तद्राजसमिति संबंधः पृथक्त्वेनेत्येतद्विवृणोति सर्वेषु पांचभौतिकत्वेनाविशिष्टेषु नानाभा-
वान् सुरनरतिर्यक्स्थावरत्वभेदेन नानाभावानिति बहुवचनेनानंतभेदप्रदर्शनार्थं पृथकविधान् एकजा-

सर्वभूतेषु येनैकं भावमव्ययमीक्षते अविभक्तं विभक्तेषु तत् ज्ञानं विद्धि सात्त्विकं २०
पृथक्त्वेन तु यत् ज्ञानं नानाभावान् पृथग्विधान् वेत्ति सर्वेषु भूतेषु तत् ज्ञानं विद्धि राजसं
२१ यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहेतुकं अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतं २२

तिष्वपि नरादिषु प्रत्येकं विभिन्नप्रकारान् यत् ज्ञानातीति विषयीकरोतीति येन ज्ञानेन वेत्तीति वक्तव्ये एधांसिप-
न्तीतिवत् ज्ञानं वेत्तीति करणे कर्तृत्वोपचारो बोध्यः तेन आत्मनां परस्परभेदात् तेषामीश्वरात् भेदः तेभ्यो ईश्वरादन्योन्य-
स्य च जडवर्गस्य भेद इति अनौपाधिकभेदज्ञानं कुतार्किकाणां राजसमेवेत्यभिप्रायः २१ यत्तु ज्ञानं एकस्मिन्
कार्ये देहप्रतिमादौ वा कृत्स्नवत् परिपूर्णवत् देवतावानेव आत्मा ईश्वरो वेति सक्तं अभिनिवेशयुक्तं अहेतुकं नि-
रुपपत्तिकं अतत्त्वार्थवत् परमार्थावलंबनशून्यं अल्पं तत्त्वाविषयत्वात् अल्पफलत्वात् यदेवंभूतं ज्ञानं

अथ कर्मत्रैविध्यमाह नियतमित्यादिना नियतं नित्यं संगरहितं अभिमानवर्जं रागः इष्टे प्रीतिः द्वेषोऽनिष्टे अप्रीतिः
ताभ्यां कृतं इष्टानिष्टप्राप्तिपरिहारार्थं कृतं रागद्वेषतः कृतं तदन्यत् अरागद्वेषतः कृतं निष्काममित्यर्थः प
लं वाञ्छीयते वेति फलं क्रियया प्राप्यमनावस्तु तदन्यद् अफलमनागन्तुकं परिपूर्णमविनाशि आत्मतत्वं तत्प्रेप्सु
ना कृतं विविदिषंतिपज्ञेनेति श्रुत्या आत्मलाभार्थं यज्ञादेर्विनियोगात् तत्कर्म सात्विकमुच्यते २३ यत्तु
कामेप्सुना फलार्थिना साहंकारेण यद्यपि सात्विकोऽप्यनात्मवित् साहंकारस्तथापि अस्य लोभेव कर्म कुशलोऽमह

नियतं संगरहितमरागद्वेषतः कृतं अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते २३
यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः क्रियते बहुलायासं तद्राजसमुदाहृतं २४
अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषं मोहादारभ्यते कर्म तत्तामसमुदाहृतं २५
मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते २६

[illegible] त्वभिमानोऽहंकारस्तद्वता साहंकारेण वा शब्दश्चार्थे क्रियते बहुलायासं अतिश्रमं कृतं तत्कर्म राजसमु
दाहृतं २४ अनुबध्यतेऽनेनेत्यनुबंधः फलं क्षयं शक्तेर्व्ययं नाशं हिंसां परपीडां पौरुषं सामर्थ्यं अनपेक्ष्य अ
नालोच्य केवलं मोहादविवेकतो यदारभ्यते कर्म तत्तामसमुदाहृतं २५ कर्तृत्रैविध्यमाह मुक्तेत्या
दिना मुक्तसंगः त्यक्ताभिनिवेशः अनहंवादी गर्वोक्तिरहितः धृतिर्धैर्यं उत्साहः साधयिष्याम्येवेति दृ
ढबुद्धिनिश्चयः ताभ्यां समन्वितः सिद्ध्यसिद्ध्योः कर्मण आरब्धस्येति शेषः निर्विकारः हर्षविषादशून्यः ए

रागी विषयसक्तो लुब्धः रात एव कर्मणः फलं प्रेप्सतीति कर्मफलप्रेप्सुः लुब्धः परद्रव्यादौ संजाततृष्णः तीर्थादौ वा द-
व्याणां त्यागी हिंसात्मकः परपीडाकरस्वभावः अशुचिर्बाह्यांतः दृष्टानिष्टप्राप्तौ हर्षशोकान्वितश्च यः कर्ता स
राजसः परिकीर्तितः २७ अयुक्तः अनवहितः प्राकृतोऽत्यंतसंस्कृतबुद्धिर्बालसमः स्तब्धः दंडवदनम्रः निकृ
ष्टोचितशाठः शक्तिगूहनकारी नैकृतिकः परावमानी वा अलसः अप्रवृत्तिशीलः कर्तव्येष्वपि विषादी स
दा अवसन्नस्वभावः दीर्घसूत्री चिरकाली एकाहसाध्यं कार्यं मासेनापि करोतीत्यर्थः य एवंभूतः कर्ता

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः २७
अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः विषादी दीर्घसूत्री च कर्ता तामस उच्यते २८
बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु प्रोच्यमानमशेषेण पृथक्त्वेन धनंजयः २९
प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकी ३०

स तामस उच्यते २८ बुद्धिधृत्योस्त्रैविध्येन व्याख्यानमाह बुद्धेरिति तत्र बुद्धिर्विशिष्टश्चिदाभासः कर्तृवद्धि रा-
ज्ञानेच प्रागुक्तं अत्र तु केवला बुद्धिर्वृत्तिमत्तोऽनदोपहत्यंतरोपलक्षणार्थं तद्धृतिविशेषो धृतिश्च कथ्यते त्रैवि
ध्येन कथ्यते इत्यर्थः २९ प्रवृत्तिनिवृत्ती शास्त्रविहितप्रतिषिद्धविषये यज्ञेन स्वर्गकामः न सुरां पिबेदित्यादिरू
पं कार्यं कृतिसाध्यं स्वर्गादि अकार्यं नित्यसिद्धं तेन नित्यानित्यवस्तुनी भयाभये कार्यनिमित्ते बंधमोक्षौ च
या वेत्तीति पूर्ववत् करणे कर्तृत्वोपचारः बुद्धिः सा पार्थ सात्विकी ३०

स्ता १

चिरं मवस्थापयति ३

अयथावत्संदेहास्पदत्वेन स्पष्टमस्मात् ३१ अधर्मम् इति विपरीतग्राहिणी बुद्धिस्तामसी पार्थः ३२ यया धृत्या अव्यभि-
चारिण्या समाध्यनुगतया मनःप्राणेंद्रियाणां क्रियाश्चेष्टाः संकल्पश्वासरूपादिग्रहणं च योगेन चित्तवृत्तिनिरो-
धेन एकाग्र्येण वा संपन्नास्ताः तत्स्थेव तिरोधानावस्थायामेकाग्रावस्थायां वा धारयति सा धृतिः पार्थ सात्विकी ३३
यया धृत्या धर्मादीन् धारयते अनुरुध्यते नोति प्रसंगेन धर्मादेः संबंधेन फलकांक्षी च भवति पुरुषः सा धृतिः पा-
र्थ राजसी ३४ स्वप्नं निद्रां भयं त्रासं शोकं प्रसिद्धं विषादं विषसानां मदं अशास्त्रीयविषयसेवया चित्तस्यावलि-

यया धर्ममधर्मं च कार्यं वा कार्यमेव च अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ३१
धर्म अधर्मम् इति या मन्यते तमसावृता सर्वार्थान्विपरीतांस्त बुद्धिः सा पार्थ तामसी ३२
धृत्या यया धारयते मनःप्राणेंद्रियाक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी ३३
यया तु धर्मकामार्थान्धृत्या धारयतेर्जुन प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ३४
यया स्वप्नं भयं शोकं विषादं मदमेव च न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी ३५
सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ अभ्यासाद्रमते यत्र दुःखांतं च निगच्छति ३६

सत्वं एतान्न मुंचति धारयत्येव यया सा धृतिः पार्थ तामसी ३५ गुणभेदेन क्रियाणां त्रैविध्यं उक्तं तत्फलस्य सुखस्य
त्रैविध्यमाह सुखं त्विति आदिना अभ्यासात् योनः पुण्येन सेवनात् यत्र सात्विके राजसे तामसे वा सुखे रमते रतिं प्रा-
प्नोति पारत्याद् दुःखस्य पुत्रशोकादेरपि अंतं अवसानं निगच्छति निश्चयेन प्राप्नोति तत्सुखं त्रिविधं शृणु
पदालयमप्यर्थः सात्विकसुखस्यैव लक्षणं यस्तादा यत्र समाधिसुखे अभ्यासाद्रमतेनन्तु विषसु-
दुःखरागात् दुःखांतं मोक्षं च निगच्छतीत्यर्थः ३६

यत्तत्प्रसिद्धं सर्वेषामिति प्रेमास्पदं अग्रे तमभ्यासारंभकाले मनःप्राणेंद्रियस्पंदनिरोधेन परमसंप्रयासस्य प्रयासोऽचि
यमानं विषमिवातीववेदनाकरं परिणामे सात्विकाध्यान्निरुद्धासु मनस्त्रादिक्रियासु प्रमृतोपमं आत्मा ह्लादपरं
आत्मनः स्वस्यैव बुद्धेः प्रसादो नैर्मल्यं रजस्तमोमलराहित्यं तज्जं तस्मात् आविर्भूतं न तु विषयसंगजं निर्मलस्या
दिजं वा तत्सुखं सात्विकं ३७ राजसं सुखमाह विषयेति अग्रे भोगकाले परिणामे विषमिव विप्रयोगकाले इहामु

यत्तदग्रे विषमिव परिणामेऽमृतोपमं तत्सुखं सात्विकं विद्धि आत्मबुद्धिप्रसादजं ३७
विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमं परिणामे विषमिव तत्सुखं राजसं स्मृतं ३८
यदग्रे चानुबंधे च सुखं मोहनमात्मनः निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ३९
न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः सत्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४०

त्रं च दुःखप्रदत्वात् ३८ अग्रे आरंभे अनुबंधे परिणामे मोहनं मोहकरं आत्मनो बुद्धेः यतो नि
द्रोत्थं ३९ प्रकरणार्थमुपसंहरन्ननुक्तमपि संगृह्णन् न तदस्तीति सत्वं प्राणिजातमन्यद्वा जडस्या
पि सर्वस्यापि सर्वस्य त्रिगुणविकारत्वात् प्रकृतिजैर्जन्मांतरीयधर्माधर्मसंस्कारजैः मायाप्रभवै
क्लेशैरसंस्पृष्टं ४०

एवं पंचदशे संसारवृक्षमसंगशस्त्रेण छित्वा परं पदं प्रार्थितव्यमित्युक्तं तत्रात्मनोऽसंगत्वोपपादनाय क्रियाकारक
फललक्षणस्य कृत्स्नस्य संसारस्य त्रिगुणात्मकत्वमुक्तं न ह्यात्मा नात्मनोर्गुणातीतगुणात्मकयोः संगः संभ
वतीति न ह्याकाशं तद्वर्तिपृथिव्यादिगुणैर्गंधादिनाकाशः संसृज्यते तद्वदित्युक्तं समाप्तः शास्त्रार्थः अथेदा
नीं सर्वगीताशास्त्रार्थमुपसंहर्तुमसंगशस्त्रेणास्यापायं च प्रदर्शयितुं प्रकरणांतरमारभते ब्राह्मणेत्यादिना शूद्रा
मसमासकरणं वेदानधिकारात् प्रविभक्तानि निःश्रेयसकीर्णानि तत्र हेतुमाह स्वभावप्रभवैर्गुणैः स्वभाव ई
श्वरस्य प्रकृतिस्त्रिगुणात्मिका मायासैव प्रभवो हेतुर्येषां गुणानां ते स्वभावप्रभवास्तैः यद्वा ब्राह्मणस्वभावस्य स

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः
४१

त्त्वगुण एव प्रभवः शांतत्वात् क्षत्रियस्वभावस्य सत्त्वोपसर्जनं रजः ईश्वरस्वभावत्वात् वैश्यस्वभावस्य
तम उपसर्जनं रजः कृष्यादिस्वभावत्वात् शूद्रस्य रज उपसर्जनं तमः मूढभावत्वात् अथवा स्वभाव
प्राग्भवीयः संस्कारस्तत्प्रभवैः न तु जातिमात्रप्रभवैः पक्षिणामाकाशगमनवत् अत एव जात्यंतरव्यावृ
त्तो धर्मो गुणं शमादिषु पाठो न दृश्यते न हि शूद्राद्व्यावृत्तं त्रैवर्णिकानामध्ययनादिकं वापेश्तरव्या
व्यावृत्तं ब्राह्मणानामध्ययनादिकं वा दृश्यते किंतु सर्वे सर्वजातीयानां साधारणा धर्माः शा
मादयो दृश्यंते तथा हि कुलादिषु ब्राह्मणेष्वपि शौर्यादिकं भारतादिषु क्षत्रियेष्वपि शमादिकं दृष्टं
एवमितिरतस्माद्यस्मिन् कस्मिंश्चित् वर्णे शमादयो दृश्यंते स शूद्रोऽपि एतैर्लक्षणैर्ब्राह्मण एव

१२६ वः पत्तचब्राह्मणो पि भ्रष्टधर्मो दृश्यंते सभ्रष्ट एव तथा चारण्यके सर्पीभूतं नहुषं प्रति युधिष्ठिरवा
क्यं सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा दृश्यंते यत्र नागेंद्र स ब्राह्मण इति स्मृता तथा यत्रै
दृश्यते सर्पवृत्ते स ब्राह्मणः स्मृतः यत्रैतन्न भवेत्सर्प तं शूद्रमिति निर्दिशेदिति जातिधर्मास्तु
मनुना दर्शिताः अध्यापनं चाध्ययनं याजनं तथा दानं प्रतिग्रहं चैव ब्राह्मणानामक
ल्पयत् प्रजानां रक्षणं दानमिज्याध्ययनमेव च विषयेष्वप्रसक्तिं च क्षत्रिय
स्य शमादिशत् पशूनां रक्षणं दानमिज्याध्ययनमेव च वाणिज्यं
कुसीदं च वैश्यस्य कृषिमेव च एकमेव तु शूद्रस्य प्रभुः
कर्म शमादिशत् एतेषामेव वर्णानां शुश्रूषामनसूय
येति तस्मात् शमादयो यत्र ब्राह्मणे ब्राह्मणो वा दृश्यंते
स एव ब्राह्मण इत्यत्र विवक्षितं स्वे स्वे कर्मण्यभिरतः
संसिद्धिं लभते परामित्यत्र तु उक्ता अध्यापनादीन्येव
स्वकर्म[illegible]णि ग्राह्याणि न तु शमादीनि न हि स्तानविज्ञा
नवतो ऽस्याः संसिद्धिर्वक्तव्यास्ति तस्मात् शमद
मादयो ब्रह्मनिष्ठस्यैव ब्राह्मणस्य लक्ष
णमिति दिक् ४१

ब्राह्मणकर्माण्याह शमइति शमंतःकरणनिग्रहणंशमः बाह्येंद्रियनिग्रहोदमः तपः पूर्वोक्तंशारीरादिभेदेनत्रिवि
धंशौचंबाह्यमृज्जलाभ्यांआभ्यंतरंभावशुद्धिः क्षांतिः क्षमा आर्जवमकौटिल्यंज्ञानंशास्त्रीयंकर्मब्रह्मविषया
विज्ञानंतदनुष्ठानानुभवात्मकंआस्तिक्यंश्रद्धाएतदात्मकंब्रह्मकर्मब्राह्मणत्वजात्यभिव्यंजकंकर्मस्वभावजं
प्राचीनधर्मसंस्कारं ४२ शौर्यंपराक्रमः तेजः प्रागल्भ्यंधृतिर्धैर्यंदाक्ष्यंयुद्धेकौशलमुत्साहोवादानंऔदार्यंईश्व

समोदमस्तपःशोचंक्षांतिरार्जवमेवच ज्ञानंविज्ञानमास्तिक्यंब्रह्मकर्मस्वभावजं ४२
शौर्यंतेजोधृतिर्दाक्ष्यंयुद्धेचाप्यपलायनं दानमीश्वरभावश्चक्षात्रंकर्मस्वभावजं ४३
कृषिगोरक्ष्यवाणिज्यंवैश्यकर्मस्वभावजं परिचर्यात्मकंकर्मशूद्रस्यापिस्वभावजं ४४
स्वेस्वेकर्मण्यभिरतःसंसिद्धिंलभतेनरः स्वकर्मनिरतःसिद्धिंयथाविंदतितछृणु ४५

रभावः उन्मार्गवर्तिनांनियमनशक्तिः एतत्क्षात्रंकर्मस्वभावजं ४३ वैश्यशूद्रयोःकर्मण्याह कृषीति
स्पष्टार्थः ४४ कर्मप्रविभागफलमाह स्वेस्वइति स्वेस्वेमन्वादिभिरुक्तेऽध्ययनादौअसाधारणेशमदम
दमादौसाधारणेचकर्मण्यभिरतः निष्ठावान्संसिद्धिंज्ञानयोग्यतांलभतेनरः एतदेवविपरीतं
प्रतीजानीतेस्वेतिसिद्धिंवक्ष्यमाणंशृणुस्वसंन्यासलक्षणांनैष्कर्म्यसिद्धिंयथायेनप्रकारेण ४५

तमेवप्रकारमाह यतइति प्रवृत्तिः कायवाङ्मनोनिर्वर्त्याचेष्टायतोहेतोः अंतर्यामिणः येनवागभ्युद्यतइत्यादिश्रुतेः
येनइदंसर्वदृश्यंततंव्याप्तं उपादानत्वात् स्वकर्मणातमभ्यर्च्यसंतर्प्यसिद्धिंविमोक्षंविंदतिलभतेमानवोमनुष्या
धिकारत्वात्स्वस्वपरमेश्वरोनित्यकर्मणामेवमोक्षदातृत्वमित्यर्थः ४६ स्वकर्मणेवविशेषस्यफलमाह श्रेया
न्इतिस्वधर्मोविगुणः किंचिदंगहीनोपिश्रेयान्प्रशस्ततरः परधर्मात्स्वनुष्ठितात्सम्यग्विहितात् उ
क्तेवस्वधर्मेनिधनंश्रेयपरधर्मोभयावहइतिस्वभावनियतंएवंक्ताविधस्वभावाज्जातंकर्मकुर्वन्नाकि

यतःप्रवृत्तिर्भूतानांयेनसर्वमिदंततं स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवः ४६
श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात् स्वभावनियतंकर्मकुर्वन्नाप्नोति
किल्बिषं ४७ सहजंकर्मकौंतेयसदोषमपिनत्यजेत् सर्वारंभाहिदोषेणधूमेनाग्नि
रिवावृताः ४८

ल्बिषंनाप्नोतितिविषकृमेर्विषमिवनदोषकृत्तस्मात्तवभैक्ष्यंहिंसाशून्यमपिनयुक्तं किंतुहिंसायुक्तोस्वधर्मए
वप्रशस्यतरः धर्मत्वेनविहितेस्मिन्नग्नीषोमीयपश्वालंभवत् एवंकृतेसतिनकिल्बिषप्रसंगोस्तीत्यर्थः
४७ किंचसहजंस्वभाविकंत्वात्त्वंकर्मसदोषंहिंसामिश्रमपिनत्यजेत् हियस्मात्सर्वारंभाःसर्वेदोषेण
हिंसादिनाप्रावृतोभवंति यस्मात्परधर्मोभयावहस्तस्मात्स्वकर्मनत्याज्यमित्यर्थः ४८ यंपश्वालंभ

स्वकर्मणामीश्वरे समर्पणं कर्तव्यमित्युक्तं॥ अनंतरश्लोकद्वयेन स्वकर्मणामावश्यकत्वमुक्तं तेषां परमेश्वरेर्पणे
न किं फलं स्यादित्यत आह असक्तेति संन्यासीन कार्यपत्कर्म नियतं क्रियतेर्जुन संगंत्यक्त्वा फलं चैव सत्यागः
सात्विको मतः इति पूर्वोक्तेनानुव्यसात्विकत्यागेन असक्तबुद्धिः पुत्रदारादिषु सक्तिपदेषु आसक्तिवर्जि
ता बुद्धिर्यस्य सोऽसक्तबुद्धिः विरक्त इत्यर्थः अत एव जितात्मा यतांतःचित्तः विगतस्पृहः विशेषेण गता स्पृहा
तृष्णा यस्य सतो ऽयं भूत्वा नैष्कर्म्यसिद्धिं कात्स्न्येन स्वरूपतः कर्मत्यागलक्षणां परिव्रज्यासिद्धिं परमां प्र

असक्तबुद्धिःसर्वत्रजितात्माविगस्पृहः नैष्कर्म्यसिद्धिंपरमांसंन्यासेनाधिगछति ४९
सिद्धिंप्राप्तोयथाब्रह्मतथाप्नोतिवोधमे समासेनैवकौंतेयनिष्टाज्ञानस्ययापरा ५०

वोक्तां मुख्यत्यागापेक्षयातिश्रेष्ठं न द्वेष्ट्यकुशलं कर्मेति श्लोके व्याख्यातं अधिगच्छति प्राप्नोति ४९ स्वक
र्मनिरतः सिद्धिं यथा विंदति तेत्युक्तं तस्मात्ज्ञानमुपपादितं इदानीं नैष्कर्म्यसिद्धिं प्राप्तोपि परिव्राट वशीकारसंज्ञा
वैराग्यवान् सर्वं ब्रह्म प्राप्नोति तत्र यथा यथा व क्रमेण जायते सिद्धिमिति सिद्धिं निबोध बुध्यस्व मेम वचनात
समासेन कौंतेय यथा वत प्राप्य ब्रह्म विधेयाध्येव संस्त्रीतं ज्ञानस्य परा निष्ठा पदपेक्षया ऽन्यते श्रेष्ठं प्राप्त
व्यं नास्तीत्यर्थः ५०

तमेव ब्रह्मप्राप्तिप्रकारमाह त्रिभिः बुद्ध्येति बुद्ध्या वेदान्तश्रवणमननपरिपाकोत्थया अहं ब्रह्मास्मीति निश्च-
यरूपया विशुद्धया सर्वभूतेषु मे आदिभावनया विशोधितया धृत्या धैर्येण योग तैमादि निमित वैष्णवग्रहणलोह
त्यनरूप॰॰मानं देहेन्द्रियसंघातं नियम्य वशीकृत्येत्यर्थः चकारात् प्राणं च नियम्य शब्दादीन् विषयान्
त्यक्त्वा ततः इंद्रियाणि प्रत्याहृत्येत्यर्थः प्रत्याहृत्य करणोपि श्रांतमनसैव विषयान् स्मरति तत्परित्यागमाह
रागद्वेषौ व्युदस्य चेति सकलं त्यक्त्वेत्यर्थः स हि विषयपरीतस्य तत्र रागं जनयतीति प्रसिद्धं तथा चाहस्पादः

बुध्याविशुद्धयायुक्तोधृत्यात्मानंनियम्यच शब्दादीनविषयांस्त्यक्त्वारागद्वेषोव्युदस्यच ५१
विविक्तसेवीलघ्वाशीयतवाक्कायमानसः ध्यानयोगपरोनित्यंवैराग्यंसमुपाश्रितः ५२

चार्थस्तत्रैव भवति मित्रं स्यादयो विषयाः संकल्प्यैते योगयोग्यो भवतीति तत्त्वायेन संबंधः ५१ केन साधनजातेन एवंभूतो
न एवंभूतो भवतीत्यत आह। विविक्तेति यतः छद्वाद्याहारेण योग्यं नित्यमिति सर्वत्र संबंधनीयं। नित्यं विविक्तसे-
वी एकांतशीलो लघ्वासी मिताशनशीलश्च तथा नित्यं वैराग्यं रागाभावं समुपाश्रितश्च तथा नित्यं ध्यानयोग-
परो ये भवति यतं वाक्कायमनसो भवति यतकायः आसनहा— नियम्या विषयेभ्यः इंद्रियाणां प्रत्याहरणेन
यतमानसः सर्वसंकल्पत्यागेन अत्रैव तुभिः साधनैर्यतवाक्कायमनसो भूत्वा ब्रह्मभूयाय कल्पते इत्युत्तरेणै-

एवंयतमानस्ययोगिनोयोगजाः सिद्धयउपतिष्ठंतिताश्चश्रुत्यादर्शिताः पृथ्व्याप्यतेजोनिलखेसमुत्थितेपंचा
त्मकेयोगगुणेप्रवृत्तेनतस्यरोगोनजरानमृत्युः प्राप्तस्ययोगाग्निमयंशरीरमितितथायंयंलोकंमनसासंविभातिविशु
द्धसत्वः कामयतेयांश्चकामान् तंतंलोकंजयतेतांश्चकामांस्तस्मादात्मज्ञंह्यर्चयेद्भूतिकामइत्यसंभाविनिसंकल्प
त्रिलोकंलोचनीयमतीतानागतमर्थजातंकामानकाम्यमानान्विषयान्जयत्युपलभतेइतिश्रुतिपद्यानामर्थः
तथानाविरतोदुश्चरितान्नाशांतोनासमाहितः निरुद्धचित्तवृत्तिरपिअशांतमानसोयोगैश्वर्यसक्तचित्तएनमात्मा
नंनप्राप्नुयादितिश्रुत्यर्थः तदिदमासंग्रहंतिपरन्तुयोगीयतमानसोऽस्मितामात्रप्रतियोभवति तदानीमेवास्मिता
स्थितिर्विषयाभिमुखोऽहंकारइत्युच्यते।विषयविमुखत्वमस्मितेतितंतदाहमहंकारंनिगृह्य यानंतत्तान्निग्रहेयोगा

अहंकारंबलंदर्पंकामंक्रोधंपरिग्रहं ।विमुच्यनिर्ममःशांतोब्रह्मभूयायकल्पते ५३

बलंसत्यसंकल्पत्वादिसामर्थ्यमात्मनः यस्मात्दर्पंकरोतिनमत्तुल्योऽन्योस्तीतिमन्यतेतेनसश्चदर्पोधर्ममतिक्रम
तीत्यायस्तंवचनात्दिव्यान्कामान्निरीक्षतितत्रकेनचिन्निमित्तेनकामप्रतिबंधेसतिक्रोधवान्भवतितंतःपरो
त्सादनायपरस्यसंशिष्यादिपरिग्रहंसंपादयति ततोनपश्यतीतितस्मात्सर्वानर्थमूलभूतमहंकारमेवविमुच्यान
एतान्विमुच्यतिअहंकारविमोक्षेऽपिनिर्ममत्वंतत्प्रदर्शितेषुममतास्पदत्वेसत्यहंकारःशिथिलीभूतोवि
षयवैमुख्यंप्राप्यसुकारणोऽस्मितायांविलीयतेततःशांतास्मितायामप्रविप्लवयानिरिंधनाग्निवदुपर
तोयोगीब्रह्मभूयायकल्पते ५३

अस्यैवं वशांतस्य केवलस्य योगिनो व्युत्थानावस्थामाह ब्रह्मभूत इति योहि सुप्तोत्थये वा संपन्नो योगी च व्युत्थितस्स च जड
देहः तस्योगस्तद्वतं द्रालरिव तिष्टति ब्रह्मभूतस्तु प्रसन्नात्मा अप्रमत्तचेताः लघुशरीरः अस्तेन वसमाधिसुखेनतृ
प्तः तदेकप्रवणो न शोचति नष्टं नाप्यप्राप्तं कांक्षति दारादिसर्वेषु चतुर्विधेषु समः ब्रह्मैवेदं सर्वमिति बुध्यावैषम्यव
र्जितः सन् परां मद्भक्तिं द्वैतदृष्टिविवर्जितां भावनां लभते पातंजलयोगी तु न परां दृष्टिं लभते भेददर्शित्वात् अयं
च भक्तः श्रीभागवते दर्शितः सर्वभूतेषु येनैकं भगवद्भावमीक्षते भूतानि भगवत्याद्ये ष भागवतोत्तम इति सा चतु
र्थो भक्तो ज्ञानी त्वात्मैव मे मत इति भगवता दर्शितः ५४ अस्याद्वैतात्मज्ञाननिष्ठालक्षणाया भक्तेः फलमाह भक्त्येति

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ५४
भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं ५५

मं उक्तविधया भक्त्या ज्ञानी अभिमितः साकल्येन जानाति साकल्यमेवाह यावानिति अणुपरिमाणो वा देहसंमितो वा
ना विकलो वा किमिदा काशवत्सकलमूर्त्तद्रव्यसंयोगीलक्षणं विभुत्वमस्य यो वा संप्रपंचो द्वैतवादिनामिव स्वगतभेदवान्
का अखंडैकरसो वेति मायावश्यादतस्तु ततो मां तत्त्वदार्थं जानाति तथा यश्चास्मीति किं देहेंद्रियप्राणमनसामन्यतः
किं परिछिन्नस्थायी वा ईश्वरोत्रिक विज्ञानस्वरूपो वा स्वरूपे वा कर्ता भोक्ता वा जडरूपो वा चिद्रूपो भोक्ता वा कर्तृत्वभोक्तृत्व
वर्जित आनंदघनो वेत्येवमामजरममरमभयसंशोकं जानाति तथा च श्रुतिः भिद्यते हृदयग्रंथिश्छिद्यंते सर्वे
संशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति आत्मदर्शने सति सर्वसंशयोच्छेदं दर्शयति राव चैत्र
ज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत इत्युक्तेः सर्वक्षेत्रेष्वेवं मां विभुं सच्चिदानंदघनं ज्ञात्वा

सर्वोपाधिविनिर्मुक्तं यथात्मेनज्ञात्वा साक्षात्कृत्य ततो ब्रह्मप्राप्तो ब्रह्मभावंगतो भवतीत्यर्थः ब्रह्मविद् ब्रह्मैव भव
तीति श्रुतिः पदात् ज्ञानदृतिकरणं ब्रह्मभावापत्तिः सर्वात्मरूपाप्रथमनमुक्तापयेत दाहं ब्रह्मास्मीति स इदं सर्वं भवति
सर्वात्मनैव पुरुषं ब्रह्मतत्तनमपश्यदिति श्रुतिभ्यो मुक्तानां सर्वात्मावगमात् ततमेकस्तच्छब्दस्य प्रक्रिया
हृष्टवाः इति श्रुतिभाष्यश्चनंतरकारणाभावात् परंतु पदमेवतत्त्वब्रह्मतत्पदाभिधेयंतदिति वा एतस्य महतो भू
तस्य नाम भवतीति श्रुतेः शुद्धं ब्रह्मविशतीति दर्पणाद्युपाधेप्रतिबिंबो बिंबमिव प्रविशति कार्योपाधी
नो ज्ञानात् कार्यणोपाधीश्वरप्राप्तिद्वारैवनिष्फलब्रह्मप्राप्तिरित्याबेदितं प्राज्ञेवप्रदामज्ञात्वा
ता तद्विशत इत्येतावता ज्ञानप्रवेशयोः पौर्वापर्ये सिद्धे तदनंतरमिति पदेन तच्छब्देन बुद्धि
स्थं देहपातानंतरमिति व्याख्येयं यतो ज्ञानोत्पत्ति ज्ञानेपाव देहपा
तेप्रारब्धकर्मणां प्रतिबंधाद्विदेहकैवल्यं न प्राप्यते अन्यथा ज्ञानसम
कालमेव देहपातापत्तिः स्यात् विमुच्यते भस्मान्ते विश्वमायानिवृ
त्तिरित्यादि मुक्तस्य मुक्तिनिवृत्तापाश्च मायायाः पुनर्निवृत्ति
वदतां जीवन्मुक्तिशास्त्रं च बाधितं स्यात् यथा तार्किकाणां
नष्टेपि समवायिकारणे पटादिकं क्षणमात्रमेव तिष्ठ
त्येवमस्माकमविद्यानादिकार्यदेहाद्युपादाने भ
नायाश्चविद्याया विनाशेपि किंचित्कालं देहाभिधा
नं युज्यते ईदृशमेव जीवन्मुक्तमपेक्ष्य भगवतोक्तं उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इति स्थितिप्रज्ञलक्षणे

स्मरं सिरपितत्स्याऽगाभिधेऽनेवेवप्र हंसेदिक

ननु सघइषीकात्तूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त इति पूर्वकर्मणां ज्ञानेन प्रायश्चित्तेनेव सत्यपि नाशे प्रवर्त्तमा
ज्ञानोत्तरकालीन[illegible]नानां कर्मणां नाशाभावे ज्ञानोत्तरमपि देहधारणे स्वाभाविकानां कर्मणां वर्जयितुमसंभवादवश्यं ज्ञानिनोऽपि बं
धः स्यादित्याशंक्याह सर्वकर्माणीति मद्व्यपाश्रयो हमेव प्रज्ञानघनः प्रत्यगात्मा व्यपाश्रयः आश्रयो यस्य स मद्व्यपाश्रयो
ज्ञानी सर्वकर्माणि विहितानि निषिद्धानि वा सदा कुर्वाणोऽपि मत्प्रसादात्मदनुग्रहात्शाश्वतं नित्यं परमं मम[illegible]
दनीयं मोक्षमवाप्नोति न तु ज्ञानोत्तरमपि क्रियमाणैः कर्मभिर्बध्यते तस्य पुत्रा दायमुपयान्ति सुहृदः साधुकृत्यां द्विषन्तः
पापकृत्यामिति न ह वा एवंविदि किंचन रजः आध्वंसते विदित्वा न लिप्यते कर्मणा पापकेन इत्यादि श्रुतिभ्यो ज्ञानं[illegible]
नः कर्मालेपश्रवणात् ५६ एवं वर्णाश्रमादिकर्मपुरस्कारेण स्वसाध्यज्ञानस्य फलावृत्तविद्या निरूपिता प्राप्तये पुनः सा

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं ५६
चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ५७
मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्षसि ५८
यदहंकारमाश्रित्य न योत्स्य इति मन्यसे मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ५९
स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ६०

धनत्वेन भक्तिमेव विधत्ते चेतसेति चेतसा विवेकबुद्ध्या सर्वाणि नित्यनैमित्तिकानि मयि भगवति वासुदेवे संन्यस्य तत्करो
मीति पदस्थाने सुकरीत्यासमर्प्य मत्परः अहमेव परः प्राप्यो यस्य सः बुद्धियोगं पूर्वोक्तं सिध्यसिध्योः समत्वलक्षणं च कर्म
णां मोक्षहेतुत्वसंपादकं अपाश्रित्य मच्चित्तः मदेकशरणः सततं सर्वदा भव ५७ ततस्य भक्तियोगस्य करणे गुणमकरणे दोषं
चाह मच्चित्त इति दुर्गाणि अध्यात्मिकाधिलौकादीनि संकटानि अहंकारात् स्वपाण्डित्याभिमानात् न श्रोष्यसि मद्वाक्यं तर्हि
विनंक्ष्यसि पुरुषार्थभ्रष्टो भविष्यसि ५८ स्वतंत्रोऽहं त्वदुक्तं न करिष्यामीत्याशंक्याह यदिति यत्तु यदि अहंकारं गर्वं आश्रि
त्य न योत्स्ये युद्धं न करिष्ये इति मन्यसे एष ते तव व्यवसायो मिथ्या यतः प्रकृतिः क्षत्रियस्वभावः त्वां नियोक्ष्यति प्रवर्तयिष्यं ५९

क्तां सो परमेश्वरो यदहमस्मीत्यत आह ईश्वर इति ईश्वरः ईशनशीलोऽन्तर्यामी पृथिव्यादीनां सर्वभूतानां हृद्देशे बुद्धि
हायां सर्वप्राणिप्रवर्तकस्तिष्ठति कीदृशः सर्वभूतानि भ्रामयन्नूर्ध्वाधो मार्गेषु संसारयन्काष्ठपुत्रिका इव सूत्र
धरः यन्त्रारूढानि यन्त्रमिव यन्त्रं देहकर्मसाधनं नाध्यात्मिक निगदितं यन्त्रारूढानि मायया स्वशक्त्या भ्रामयन्नितिसं
बंधः हे अर्जुन त्वमस्माद्विशुद्धांतःकरणे सेश्वरोऽसीति भावः अयं अहंकारेऽर्वकं यः कर्म करोति यस्त्व ईश्वर परवशोऽहं क
रोमीति बुध्या करोति तयोरत्यंतवैलक्षण्यप्रदर्शनार्थो मंत्रो भाष्ये उदाहृतो अहश्च कृष्णमहरर्जुनं च विवर्तेते अज
सी वेद्याभिरिति भारद्वाजार्थ अहश्च कृष्णमर्जुनं येन्याग्निमारुतस्य प्रतिपादितं ब्राह्मणे नत्राग्निमारुतमस्य स्वविनियुक्तापृथ
मे यस्मिन्दिवसे सोमः स्तूयते यागार्थं ते देवजन्मसाफल्यदिनं मुख्यं अहः शब्देनाभिधीयते अन्यत्तु दिनमेव निष्फ

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ६१

लत्वात् तथा च स्मृतिः दशभिर्जन्मभिर्वेदा अधीते शतजन्मभिः सहस्रैर्जन्मभिः सोमं ब्राह्मणः पातुमर्हतीति सोम
याजस्य दौर्लभ्यं दर्शयति तदयमहःशब्दः कालवचनोऽपि सोमे कर्मणि वर्तते यथा दर्शपूर्णमासशब्दो तदेवं सति
हः यागः कृष्णं अविदुषा कृतं अप्रकाशमिव भवतीति तथाहरर्जुनं स्वच्छं ददेव विदुषा कृतं प्रकाशरूपमिव भवतीति
एतेन उभे विद्वद्विद्वत्कृते अहनी यजनसी प्रकृतिरूपत्वात् तेनगुणकार्ये अपि वेद्याभिकर्मणोऽवगम्य [illegible]
वा अहंकारो मीत्यभिमानरूपं वा विद्या विज्ञानाति ताभिः निवर्तते वैपरीत्येन वर्तते सोपासनं कर्मस्थितं परमा
त्मतत्त्वप्रकाशकं बंधविच्छेदहेतुः मूढकृतं कर्म कृष्णं स्वरूपावरकं बंधहेतुरित्यर्थः तदेवं भगवान्पार्थं अ
र्जुनेति संबोधयन्नेतस्य स्वच्छांतःकरणत्व द्योतनेन युक्तं धर्माधिकारं दर्शयति ६१

न. भा
मी.
३१

तमेवईश्वरंसर्वभावेनसर्वात्मनाशरणंगच्छआश्रयस्वततः प्रसादात्तदनुग्रहात्परांशांतिमुपरतिंसमाधिमितिप
वंत तथाचसूत्रंसमाधिसिद्धिरीश्वरप्रणिधानादितिस्थानंचपरंविष्णोः पदंमोक्षंशाश्वतंनित्यंप्राप्स्यसि ६२ स
र्वगीतार्थमुपसंहरतिइतीति एवंप्रकारंतेतुभ्यंमयासर्वज्ञेनपरमकारुणिकेनज्ञानंआख्यातंगुह्यात्गुह्यतरंमंत्रतंत्ररसाय
नादिरूपात्गुह्यात्गुह्यतरंअतिशयितंरहस्यंएतद्यथोक्तंशास्त्रार्थजातंमयासम्यगालोच्यपश्चाद्यथेच्छसितथाकुरु
वि१

तमेवशरणंगच्छसर्वभावेनभारत तत्प्रसादात्परांशांतिंस्थानंप्राप्स्यसिशाश्वतं ६२
इतितेज्ञानमाख्यातंगुह्याद्गुह्यतरंमया विमृश्यैतदशेषेणयथेच्छसितथाकुरु ६३
सर्वगुह्यतमंभूयःशृणुमेपरमंवचः इष्टोसिमेदृढमितिततोवक्ष्यामितेहितं ६४

६३ एवंयथेष्टकरणमभ्यनुज्ञायापिअतिवात्सल्यात् श्लोकद्वयेनैवकृत्स्नंशास्त्रार्थमुपदेक्ष्यन्तद्ग्रहणेसौक
र्यमस्यसंपादयितुंआहसर्वेतिसर्वेभ्यःगुह्येभ्यः अतिशयितंभूयःपुनःअसकृदुक्तमपिमेममवचनंशृणुपर
मंपरमार्थविषयत्वात्नलोभान्नापिभयात्वावक्ष्यामिकिंतर्हिमेममइष्टोसिपरमाप्तोसिइतिहेतोर्दृढंअतिश
यितंतेनतवहितंपततस्ततोवक्ष्यामितवइष्टत्वात् विषयाद्विहितत्वात् इदंचनंअतस्तेनावश्यंकर्तव्यमितिभावः ६४

तदेव गुह्यतमं हितमाह मन्मना इति ग्रहं प्रत्यगात्मानंदैकघनः परिपूर्णः तदाकारं मनो यस्य स मन्मना भव
एतेन ब्रह्मात्माभेदज्ञानपि साक्षात्कारणीय इति उत्तरषट्कार्थ उक्तः कथमेवंविधा ज्ञाननिष्ठा लभ्यते अतः आह
मद्भक्तो भव एतेन भगवदुपासनात्मको मध्यमषट्कार्थ उक्तः कथमल्पपुण्यस्य भक्तिः उदेतीति उच्यते आह
मद्याजी भगवदर्थं करणशीलो भव एतेन कर्मप्रधानस्य आद्यषट्कार्थो विवृतः ननु यस्य भगवद्याजित्वं न सं
भवति दारिद्र्यात् तस्य आद्यभावाद्यानस्य भगवद्भक्तिः दौर्लभ्यात् ब्रह्माकाराचेतोवृत्तिर्दुर्लभतरेत्याशंक्याह मां

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ६५

नमस्कुरु प्राकृतभक्तो वा प्रतिमादौ भगवंतं सर्वोपचारसमर्पणेन नमस्कारादिना सम्यगुपधारयेत्यर्थः तथाश्व
लायनो नमस्कारस्यैव यज्ञत्वमुदाहरति यो नमसा स्वध्वर इति यज्ञो वै नम इति हि ब्राह्मणं भवतीति चरणव
तुष्टस्य सोपानत्रयाह्वस्य फलमाह मामिति मामेव तत्पदार्थं सर्वजगत्कारणं सर्वेश्वरं सर्वशक्तिमदखं
डैकरसं त्वं एष्यसि प्राप्स्यसि बिंबप्रतिबिंबं घटाकाश इव महाकाशं अस्मिन्नर्थे शपथं करोतीति तव
पुरः सत्यं अबाधितार्थं यथा तथा प्रतिजाने प्रतिज्ञां करोमि मामेवैष्यसीति प्रियोऽसि मे यतस्त्वं मे मम प्रियोऽसि अ
तः प्रतारणां नाहं त्वयि सत्यमेवाहं ब्रवीमीत्यर्थः ६५

एवंनमनयजनभजनभवनक्रमेण सांख्यनिष्ठायां उक्तायां सर्वध्यानेनात्मनि पश्यंतीत्यनेन श्लोकेन दर्शितः इदानीं
अस्येवमजानंतः श्रुत्वान्येभ्य उपासते तेपि चातितरंत्येव मृत्युं श्रुतिपरायणा इति केवलोपास्तिनिष्ठा योगाख्या
उक्ता तामाह सर्वधर्मानिति सर्वेषां वर्णानामाश्रमाणां देहेंद्रियबुद्धीनां च धर्मान् अग्निहोत्रादीन् सुखदुः
खादींश्च त्यक्त्वा मामेकं सर्वेश्वरं सर्वशक्तिं सोपाधिं निरुपाधिं वा अखंडैकरसानंदघनं दयनं परमात्मानं
शरणं श्रयणमिति हिनस्ति विघादीनं त्वो शरणमिति शरणम् माश्रयः परायणं गच्छ प्राप्नुहि मदेकशरणो भवेत्यर्थः
अत्र अन्नं भुक्त्वैव तृप्यते न तु जलमात्रं पीत्वेति वत् हेतुत्वं उक्त्वा प्रत्ययार्थः सर्वधर्मपरित्यागेन मां शरणं व्र

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज। अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ६६

म जेत्यर्थः यथोक्तं अन्नादर्शनेनैव परात्मानमुपास्महे एतस्य भगवच्छरणीकरणस्य फलमाह अहं त्वेति अहं तु
त्वच्छरणात्मा स्वरूपाध्यंतर्यामी नारायणः सकलपापविनिर्मुक्तः सम्यक् ज्ञातः सन् त्वां त्वां सर्वपापेभ्यः संचितक्रियमाण
भोगो ज्ञवधादिभ्यः मोक्षयिष्यामि मा शुचः शोकं मा कर्षीः तथा हि तत्त्वज्ञानफलं पापास्पर्शः शोकतरणं च सर्वश्रु
तिस्मृतिप्रसिद्धं आदित्यांतर्वर्तिनं नारायणं प्रकृत्य छांदोग्ये श्रूयते स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः
पाप्मभ्यो य एवं वेद तरति शोकमात्मवित् तत्र को मोहः कः शोक एकत्वमनुपश्यत इति उदितः ऊर्ध्वं गतो गतः
पापान्युत्क्रम्य गतो निष्पापः इति श्रुतिपदस्यार्थः वर्णाश्रमधर्मसंन्यासपूर्वकं बंधाध्यायोक्तेन देहादीनां

एवंश्लोकद्वयेनज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनामितिसांख्ययोगोद्वितीयाध्यायेदर्शितोऽपसंह
त्यविद्यासंप्रदायविधिमाह इदंतेतित्रयेणनतपस्कायतपश्चालोचनंतद्रहितायअपतनशीलायेत्यर्थः अभक्ता
यश्रद्धाहीनायअशुश्रूषवेगुरुसेवाअकुर्वतेमांपरमात्मानंयोभ्यसूयतिमदीयगुणेषुहिस्तुतयानिंदोषा
रोपपरोभवति तस्मैनत्वोप्रत्येकंसंबध्यत्वादेतेषांविशेषणानामन्यतमाभावेपिकदाचनमहत्तपसिसंकटेर्
देनवाच्यंनोपदेष्टव्यंअत्रविद्याहवै ब्राह्मणमाजगामगोपायमांसेवधिष्टेहमस्मिअसूयकाया
नजवेयतायनमाब्रूयातवीर्यवतीतथास्यांयस्यदेवेपराभक्तिर्यथादेवेतथागुरौतस्यैतेकथिताह्यर्थाः प्रकाशंत

इदंतेनातपस्कायनाभक्तायकदाचनः नचासुश्रूषवेवाच्यंनचमांयोभ्यसूयति ६७
यइदंपरमंगुह्यंमद्भक्तेष्वभिधास्यति भक्तिंमयिपरांकृत्वामामेवैष्यत्यसशयं ६८

तेमहात्मनः इतिश्रुतेः अनसूयारहितायआर्जवोपेतयाभ्यासशीलायगुरुपरमेश्वराराधनपरायचरहस्यंदे
यंनान्यस्मैइत्यर्थः ६७ एवंसंप्रदायविधिमुक्त्वासंप्रदायकर्तुःफलमाहयइदमितिइदंपरमंगुह्यंयोभक्तिहीनोमा
नहृजायार्थसिद्धयेनमद्भक्तेष्वपिधास्यतिसोपितत्र मयिपरमेश्वरेचिदेकरसेपरांभक्तिंअद्वैतत्वेनस्मरणं
उपासनांकृत्वातत्रादरंप्राप्यतामनुष्यामस्त्वमामेवैष्यतिमुक्तिंप्राप्स्यतीत्यर्थः अत्रांशसंशयोत्रनास्ति
स्मर्यतेहिअजामिलादीनांभक्तिगंधहीनानामपिपुत्रसंकेतितेननारायणेतिनाम्नाग्रहवशादाहूयतांतावन्मात्रेणु
हेनभगवतासद्गतिर्दत्ताकिमुवक्तव्यंयोवाचाएतावत्तत्स्वरहस्यंप्रतिपादयतितस्यभक्तिलाभादिक्रमेण

भा.
गी.
३२

ननुयइमंद्यपाकृतंसर्वस्वर्धामितित्वयैवोक्तंकथममक्तस्यापिएतच्छास्त्राभिधानंतेनतपादित्नामः सांभवेदित्याशं
क्याह नचेतितस्मात्एतच्छास्त्रप्रवर्तकात् अन्योमनुष्येषुमेममप्रियकृत्तमः नचकश्चिदस्तिइयमेवममम
हतोनास्तिकामलिस्तोकृत्वोसोपानारोहक्रमेणममप्रियतरोभविताभविष्यतिअनिच्छयाविसंस्पृष्टोदहत्ये
वाहपावकइतिनचभुविएतस्मात्स्यात्परमार्थसाधनमस्तीतिभावः अक्षरार्थः स्पष्टः ६९ अध्यापक
स्यफलमुक्त्वाध्येतुफलमाह अध्येष्यतेचेतिज्ञानयज्ञेननिर्विकल्पसमाधिनाइष्टः सहिधर्ममेघना

के :प्रिय

नचतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्तमः भवितानचमेतस्मादन्यःप्रियतरोभुवि ६९
अध्येष्यतेचयइमंधर्म्यंसंवादमावयोः ज्ञानयज्ञेनतेनाहमिष्टःस्यामितिमेमतिः ७०
श्रद्धावाननसूयश्चशृणुयादपियोनरः सोपिमुक्तःशुभांल्लोकान्प्राप्नुया
त्पुण्यकर्मणां ७१

माप्नुयात्पुण्यवृष्टिकरस्तद्देतस्यशास्त्रस्याध्ययनमपीत्यर्थः इतिमेममसर्वेश्वरस्यमतिः तेनाहंस्तुतिमाहे
वेमदितिनमंतव्यंकिंतुभक्तार्थानुवादएवायमितिभावः ७० प्रवक्तुरध्येतुश्चफलमुक्त्वाश्रोतुरपिफलमाह
श्रद्धावानितिश्रृणुयादपि अक्षरस्यश्रवणंकुर्यादपि किंतुवक्तुमत्रादरेणार्थग्रहणंयः कुर्यात्सतुउक्तंफ
लंमाप्नुयादितिस्पष्टार्थःश्लोकः तथाचोक्तंश्रीभगवतेवासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनातिहिव
क्तारंपृष्ठकंश्रोतृंस्तत्पादसलिलंयथेति ७१

श्रीव

सर्वोत्तमोगीता सर्वज्ञोपि भगवान् लोकशिक्षार्थं शिष्यस्य ज्ञानेनवेति पृच्छति प्रश्नव्याजपुनः स्वयमेव उपदेशं कर्तु
वतोत्स मगुणानिदाघइवमायाचंशातकृत्वोप्युपदेशेनकृतार्थः कर्तव्यइत्याशयेनाह कच्चिदिति कच्चित्प्रवेद
नेहे पार्थ एतत्त्वया एकाग्रेण चेतसा श्रोतव्यं शास्त्रं तो यतस्य बोधव्यामितिमम कामोस्ति ततस्त्वां पृच्छामि
किमिदं त्वया श्रुतमिति अत एव तोपि ततः अज्ञानकृतः संमोहः विपर्ययः अनात्मन्यात्मधीरूपः स्वधर्मे
ष्वेवाधर्मधीरूपश्चेति सद्विविधोपि नष्टः कच्चिन्मत्कृपया साफल्यामिच्छंस्त्वां महं पृच्छामीत्यर्थः ७२ एवंप

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ७२
अर्जुन उवाच नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत। स्थितोस्मि गतसंदेहः
करिष्ये वचनं तव ७३

ष्टः स्वस्य कृतकृत्यतां ज्ञापयन्नर्जुन उवाच नष्टो मोह इति मोहः पूर्वोक्तो द्विविधोपि नष्टः स्मृतिः एयमहम
स्मि परं ब्रह्मेत्यात्मानुसंधानरूपा आत्मतत्वविषयालब्धापस्याः लाभेन सर्वहृदयग्रंथीनां पापानामश्च
श्रीतत्वे तद्वत्पत्रौ हतानां विजुडे कंभमप्रभवानां विमोक्षो भवति न यावद्भूपत्तं स्मृतिलाभे सर्वग्रंथीनां वि
प्रयोग इति त्वत्प्रसादात् मयाच्युत स्मृतिर्लब्धेति संबंधः स्थितोस्मि गतसंदेहो नष्टसंदेह इत्यनेनात्म
न्यात्मधीरूपो मोहो नष्टा इति दर्शितं करिष्ये वचनं तव इत्यनेन स्वधर्मे धीरूपो मोहो नष्ट इति दर्शितं ७३

समाप्तः शास्त्रार्थः इदानीं कथाप्रबंधमेवानुवर्त्तयन् संजय उवाच इतीति अद्भुतं चेतसो विस्मयकरं रोमहर्षणं रोमा
ञ्चोद्रेकजनकं ७४ कथमेतत्त्वया दूरस्थेनापि वासुदेवार्जुनयोः संवादः श्रुत इत्यत आह व्यासप्रसादादिति भगव
ता व्यासेन दिव्यं चक्षुः श्रोत्रादिकं मह्यं दत्तं येनाहमव्यवहितं विप्रकृष्टं वा सर्वं करतलामलकवद्विजानामि
अतो व्यासप्रसादात् तस्मात् स्वयं परं गुह्यं योगं श्रुतवान् योगं च यस्य मे योगमैश्वरमिति प्रतिज्ञापूर्वकं प्रदर्शि
तं वैश्वरूपं तमपि दृष्टवानिति शेषः स्वयं कथयत इत्युक्ते ग्रन्थमहतो भूतस्य निश्वसितमेतद्यदृग्वेद
इति श्रुतेः स्वनिश्वसितं वेदं शिष्याचार्यपरंपरया कथितमित्यायातीति दर्शितं साक्षात्कथयत इति दृष्टान्तो

संजय उवाच इत्यहं वासुदेवस्य पार्थस्य च महात्मनः संवादमिममश्रौषमद्भुतं रोमहर्षणं ७४
व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परं योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयं ७५ राजन्
संस्मृत्य संस्मृत्य संवादमिममद्भुतं केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ७६

व्यासात्पुत्रीवदिदानीमर्जुनं प्रति साक्षात्कथयतः श्रुतवानहमित्यर्थः तेनभगवदनुग्रहपात्रत्वमात्मनः सूचितं
स्वमस्य योगस्य तेजस्त्वात् योगमित्यभेदेनान्वये तु गद्यं च त्वयापरं योगमिति पुन्नपुंसकलिंगयोरपि सामानाधि
करण्यं श्रावं च यत्किंचिदस्तीति वेदेनुपहतमित्यादाविव पूर्वप्रवृत्तलिंगसंस्कारप्राबल्यादुत्तरत्र भिन्न
लिंगविशेष्यत्वेऽपि पूर्वसंस्कारेण निवर्त्तत इति सामानाधिकरण्ये च लिंगयोरपि वक्तुं शक्यमिति ज्ञेयं
७५ केशवार्जुनसंवादस्य वक्ता विश्वरूपात्मयोगदर्शनं चाह्लादकमेण श्लोकद्वयेनाह राजन्निति
राजन् धृतराष्ट्र पुण्यं पुण्यकरं पापहरं चेत्यर्थः तं संस्मृत्य संस्मृत्येति संभ्रमे द्विरुक्तिर्योगवत्

तत्रेति [illegible] विश्वरूपं [illegible] हि ब्रह्मणामीशमिति देशितो विपृकृष्टं वक्षालिते [illegible] विशंतीति व[illegible]
वासं [illegible] भीष्मादिन पयेचकारत नाम लक्षवद्दृष्टवान् तच्च न गतो मिथ्यात्वमं तरेण न संभवतीति प्रति[illegible]
वेदांतकृतके अतीतानागतं वस्तु वीक्ष्यते करविल्ववत् योगी संकल्पमात्रोत्थमिति शास्त्रेषु [illegible] मायो
सर्वदा सर्वं सर्वावस्थमिदं जगत् अस्तीति तदुपाधिश्रितसर्वात्म्यात् सर्वमोक्ष्यते ९ आरंभपरिणामा
[illegible]न रूपेण यत्र सत् अतीतानागतं वस्तु योगी तद्दीक्षताकथं २ संकल्पमात्रभातं च स्वतानादि प[illegible]

तच्च सं[illegible]त्य संस्मृत्य रूपमत्यद्भुतं हरे । विस्मयो मे महाराजन हृष्यामि च पुनः पुनः ७७
यत्र योगेश्वरो कृष्णो यत्र पार्थो धनुर्धरः तत्र श्री र्विजयो भूति र्ध्रुवा नीतिर्मतिर्मम ७८
इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सन्यासादि
त्त्वनिर्णययोगो नामाष्टादशोध्यायः १८

नष्टस्त्री दर्शनाभं तस्या [illegible] मिशानमप्रभा ८ योगो संकल्पमात्रेण तस्योत्पत्तिर्यदीष्यते ईषसंकल्पमात्रेणास
[illegible]त्पत्तिस्तदेष्यतां आरंभे परिणामे वा देशकालाद्यतिक्रमः नैव दृष्टः क्वचित्स्वप्नस्वप्नमायादिषु स्फुटः ८
युगपद्दृश्यते कुंभोनानादेशस्थ योगिभिः जलसूर्य इवास्मा मिस्तेनासौ कल्पितः स्फुटः योगिभिर्गृह
मारत्वा [illegible]यः सर्वत्र सर्वदा सन्नेवास्तीति चेत्कार्यं कथमीदृग्विधं भवेत् ९ सोहं तेही यावे [illegible]युग
पद्भिन्नदेशतात्त्वकल्प

नाविनास्येत्यंत सत्वनोत्तियः ७ यस्मान्नोस्मु भैरारब्धमिति वन्ना [illegible] जव्यवतत्प्रकाशे परिणव
जगत्किंत्विंद्रजालवत् १९ सत्संचइंद्रजालामविश्वंसर्वपरागृहांश्चनाधिष्ठानादनेस्पृहंनास्तिवतेदया
द्विंति २२ स्पष्टार्थमल्ला लोक ७५ यस्मादनंतैश्वर्यो भगवान् तदनुग्रहीतो नो युधिष्ठिरपत्नेत्तिग्र
नस्त्वयाजयाशानकार्येत्याह एवेति यत्र पक्षे ध्रुवेतिसर्वत्र संवध्यते श्रीदेवहसनादिशोभावि
जयः प्रसिद्धः भूतिऐश्वर्यसर्वनियंतृत्वंनीतिर्नयश्च एतत्सर्वं तत्रतस्मिन्पक्षे ध्रुव
मितिममतिः अतः पांडवैः सहसंधिरेव कर्तव्यइतिभावः ७८
इतिश्रीमत्पदवाक्यप्रमाणज्ञमर्यादाधुरंधरवंशावतंसश्रीगोविंदसू
नोः श्रीनीलकंठस्सूरिर्वैर्यस्यकृतौ भारतभावदीपेभीष्मपर्वणि
गीतार्थप्रकाशेऽष्टादशोध्यायः ७८ संवत १८६२ ज्यष्ट
मासेकृष्णपक्षे चतुर्थी चंद्रवासरे लिषतंलालजी
मल्लमिश्रकुरुक्षेत्रांतरकपिस्थलिमध्ये लि०
यादृशंपुस्तकंदृष्ट्वा तादृशंलिषतंमया
यदिशुद्धविशुद्धंवा ममदोषोनदी
यते ॥१॥ गौरीशंकराभ्यांनमः
गुरुदेवायनमः